इतिनानाविधैर्भावैरुत्तमप्रीतिसंयुतौ क्रीडंतौ तौ वने तस्मिंश्चेरतुस्तुष्टमानसौ
विकाले च समं गोभिर्गोपवृंदसमन्वितौ विहृत्य च यथा जोषं व्रजमेत्य महाबलौ
गोपैः समानैः सहितौ चिक्रीडातेऽमराविव ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे षष्ठोऽध्या
यः ॥ एकदा तु विना रामं कृष्णो वृंदावनं ययौ विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्ज्व
लः ॥ स जगामाथ कालिंदीं लोलकल्लोलशालिनीम् तीरसंलग्नफेनौघैर्हसंतीमि
व सर्वतः ॥ तस्यां चातिमहाभीमं विषाग्निसृतवारिणम् ह्रदं कालियनागस्य ददर्शाति
विभीषणम् ॥ विषाग्निना प्रसरता दग्धतीरमहातरुम् वाताहताम्बुविक्षेपस्पर्शदग्ध
विहंगमम् ॥ तमतीव महारौद्रं मृत्युवक्त्रमिवापरम् विलोक्य चिंतयामास भगवान्मधुसू
दनः ॥ अस्मिन्वसति दुष्टात्मा कालियोऽसौ विषायुधः यो मया निर्जितस्त्यक्त्वा दुष्टो नष्टः
पयोनिधिम् तेनेदं दूषितं सर्वं यमुनाम्बु सागरंगमम् न नरैर्गोधनैर्वापि तृषार्तैरुपभुज्यते

राम॰

ततस्तत्रापित्रेतायांमेकालेद्विजोत्तम प्राप्तेकालेइवोद्भेनेनवणाद्येसमेनतः
समस्तभावास्थितःसर्वोव्रजोवृन्दावनेतथा शाकटीवाटपर्यन्तःचन्द्रार्धाकारसंस्थितः
वत्सपालौचसंवृत्तौरामदामोदरौतदा तत्रस्थानस्थितौगोष्ठेचेरतुर्बाललीलया
बर्हिपत्रकृतापीडौवन्यपुष्पावतंसकौ गोपवेणुकृतातोद्यपत्रवाद्यकृतस्वनौ
काकपक्षधरौबालौकुमाराविवपावकी हसंतौचरमंतौचचेरतुःस्ममहावनम्
क्वचिद्वहंतावन्योन्यंक्रीडमानौतथापरैः गोपपुत्रैःसमंवत्सांश्चारयंतौविचेरतुः
कालेनगच्छतातौतुसप्तवर्षौमहाव्रजे सर्वस्यजगतःपालौवत्सपालौबभूवतुः
प्रावृट्कालस्ततोतीवमेघौघस्थगिताम्बरः बभूववारिधाराभिरैक्यंकुर्वन्दिशामिव
प्ररूढनवशष्पाढ्याशक्रगोपाचितामही तथामारकतीवासीत्पद्मरागविभूषिता
ऊहुरुन्मार्गवाहीनिनिम्नगाम्भांसिसर्वतः मनांसिदुर्विनीतानांप्राप्यलक्ष्मींनवामिव
नरेजेन्तरितश्चंद्रोनिर्मलोमलिनैर्घनैः सद्वादिवादोमूर्खाणांप्रगल्भाभिरिवोक्तिभिः
निर्गुणेनापिचापेनशक्रस्यगगनेपदं अवाप्यताविवेकस्यनृपस्येवपरिग्रहे
मेघपृष्ठेबलाकानांरराजविमलाततिः दुर्वृत्तेवृत्तचेष्टेवकुलीनस्यातिशोभना
नबबंधांबरेस्थैर्यंविद्युदत्यंतचंचला मैत्रीवप्रवरेपुंसिदुर्जनेनप्रयोजिता
मार्गाबभूवुरस्पष्टास्तृणशष्पचयावृताः अर्थान्तरमनुप्राप्ताःप्रजडानामिवोक्तयः

दाम्नाबद्ध्वातदामध्येबबंधाथउलूखले कृष्णमक्लिष्टकर्माणमाहचेदममर्षिता
वि. यदिशक्तोसिगच्छत्वमतिचंचलचेष्टित इत्युक्त्वाथनिजंकर्मसाचकारकुटुंबिनी
प्र. व्यग्रायामथतस्यांसकर्षमाणउलूखलम् यमलार्जुनमध्येनजगामकमलेक्षणः
टी. कर्षतावृक्षयोर्मध्येतिर्यग्गतमुलूखलम् भग्नावुत्तुंगशाखाग्रौतेनतौयमलार्जुनौ
२५८ ततःकटकटाशब्दसमाकर्णनतत्परः आजगामव्रजजनोददर्शचमहाद्रुमौ
भग्नस्कंधौनिपतितौभग्नशाखौमहीतले ददर्शचाल्पदंतास्यंसितहासंचबालकं
तयोर्मध्यगतंबद्धंदाम्नागाढंतथोदरे ततश्चदामोदरतांसययौदामबंधनात्
गोपवृद्धास्ततःसर्वेनंदगोपपुरोगमाः मंत्रयामासुरुद्विग्नामहोत्पातातिभीरवः
स्थानेनेहननःकार्यंव्रजामोन्यन्महावनम् उत्पाताबहवोह्यत्रदृश्यंतेनाशहेतवः
पूतनायाविनाशश्चशकटस्यविपर्ययः विनावातादिदोषेणद्रुमयोःपतनंतथा
वृंदावनमितःस्थानात्तस्माद्गच्छाममाचिरम् यावद्भौममहोत्पातदोषोनाभिभवेद्व्रजं
इतिकृत्वामतिंसर्वेगमनेतेव्रजौकसः ऊचुःस्वंस्वंकुलंशीघ्रंगम्यतांमाविलंबथ
ततःक्षणेनप्रययुःशकटैर्गोधनैस्तथा यूथशोवत्सपालाश्चकालयंतोव्रजौकसः रा.म. १
द्रव्यावयवनिर्धूतंक्षणमात्रेणतत्तथा काकभाससमाकीर्णंव्रजस्थानमभूद्द्विज
वृंदावनंभगवताकृष्णेनाक्लिष्टकर्मणा शुभेनमनसाध्यातंगवांसिद्धिमभीप्सता

सपितः शाकटस्याधो बालपर्यंकिकातले ॥ तेच गोपा महद्दृष्ट्वा पूतनायाः कलेवरम्
मृतायाः परमं त्रासं विस्मयं च तदा ययुः ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे पंचमोऽध्यायः
॥ श्रीः ॥ कदाचिच्छाकटस्याधः शयानो मधुसूदनः चिक्षेप चरणावूर्ध्वं स्तन्यार्थी प्ररुरो
दवै तस्य पादप्रहारेण शाकटं परिवर्तितम् विध्वस्तकुंभभांडं तद्विपरीतं पपात वै
ततो हाहाकृतः सर्वो गोपीगोपजनो द्विज आजगामाथ ददृशे बालमुत्तानशायिनम्
गोपाः केनेति केनेदं शाकटं परिवर्तितं तत्रैव बालकाः प्रोचुः पादेनानेन पातितम्
रुदता दृष्टमस्माभिः पादविक्षेपपातितम् शाकटं परिवृत्तं वै नैतदन्यस्य चेष्टितम्
ततः पुनरतीवासन्गोपा विस्मितचेतसः नंदगोपोपि जग्राह बालमत्यंतविस्मितः
यशोदा गर्भमारूढं भग्नभांडकपालिकम् शकटं चार्चयामास दधिपुष्पफलाक्षतैः
गर्गश्च गोकुले तत्र वसुदेवप्रचोदितः प्रच्छन्न एव गोपानां संस्कारानकरोत्तयोः
ज्येष्ठं च राममित्याह कृष्णं चैव तथापरम् गर्गो मतिमतां श्रेष्ठो नाम कुर्वन्महामतिः
स्वल्पेनैव हि कालेन रिंगिणौ तौ तदा व्रजे घृष्टजानुकरौ विप्र बभूवतुरुभावपि
करीषभस्मदिग्धांगौ भ्रममाणावितस्ततः न निवारयितुं सेहे यशोदा तौ न रोहिणी
गोवाटमध्ये क्रीडंतौ वत्सवाटगतौ पुनः तदहर्जातगोवत्सपुच्छाकर्षणतत्परौ
यदा यशोदा तौ बालावेकस्थानचरावुभौ शशाक नो वारयितुं क्रीडंतावपि चंचलौ

वि॰ पु॰ टी॰ २०१

न्तं कृष्णमुपादाय रात्रौ तस्मै ददौ स्तनम् यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति
तस्य तस्य क्षणेनांगं बालकस्योपहन्यते कृष्णस्तु तत्स्तनं गाढं कराभ्यामतिपीडितं
गृहीत्वा प्राणसहितं पपौ क्रोधसमन्वितः सातिमुक्तमहारावा विच्छिन्नस्नायुबंधना
पपात पूतना भूमौ म्रियमाणातिभीषणा तन्नादश्रुतिसंत्रासप्रबुद्धास्ते व्रजौकसः
ददृशुः पूतनोत्संगे कृष्णं तां च निपातितां आदाय कृष्णं संत्रस्ता यशोदापि द्विजोत्तम
गोपुच्छभ्रामणेनाथ बालदोषमपाकरोत् गोकरीषमुपादाय नंदगोपोपि मस्तके
कृष्णस्य प्रददौ रक्षां कुर्वन्निदमुदीरयन् नंदः रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः
यस्य नाभिसमुद्भूतपंकजादभवज्जगत् येन दंष्ट्राग्रविधृता धारयत्यवनी जगत्
वराहरूपधृग्देवः स त्वां रक्षतु केशवः नखांकुरविनिर्भिन्नवैरिवक्षस्थलो विभुः
नृसिंहरूपी सर्वत्र रक्षतु त्वां जनार्दनः वामनो रक्षतु सदा भवंतं यः क्षणादभूत्
त्रिविक्रमक्रमाक्रांतत्रैलोक्यः स्फुरदायुधः शिरस्ते पातु गोविंदः कंठं रक्षतु केशवः
गुह्यं च जठरं विष्णुर्जंघे पादौ जनार्दनः मुखं बाहू प्रबाहू च मनः सर्वेंद्रियाणि च
रक्षत्वव्याहतैश्वर्यस्तव नारायणोव्ययः शंखचक्रगदापाणेः शंखनादहताः क्षयं
गच्छंतु प्रेतकूष्मांडराक्षसा ये तवाहिताः त्वां पातु दिक्षु वैकुंठो विदिक्षु मधुसूदनः
हृषीकेशोंबरे भूमौ रक्षतु त्वां महीधरः एवं कृतस्वस्त्ययनो नंदगोपेन बालकः

राम॰ ७

हास्यं मे जायते वीरास्तेषु यत्नपरेष्वपि ॥ तथापि खलु दुष्टानां तेषामभ्यधिकं मया
अपकाराय दैत्येंद्रा यतनीयं दुरात्मनाम् ॥ ये यशस्विनः केचित्पृथिव्यां ये च यज्वि
नः कार्यो देवापकाराय तेषां सर्वात्मना वधः ॥ उत्पन्नश्चापि मृत्युर्मे भूतपूर्वः स वै किल
इत्येतद्बालिका प्राह देवकीगर्भसंभवा ॥ तस्माद्बालेषु परमो यत्नः कार्यो महीतले
यत्रोद्रिक्तं बलं बाले स हंतव्यः प्रयत्नतः ॥ इत्याज्ञाप्यासुरान्कंसः प्रविश्यात्मगृहं ततः
मुमोच वसुदेवं च देवकीं च विरोधतः ॥ कंसः ॥ युवयोर्घातिता गर्भा वृथैवैते मयाधुना
कोप्यन्य एव नाशाय बालो मम समुद्गतः ॥ तदलं परितापेन नूनं तद्भाविनो हि ते
अर्भका युवयोर्दोषाद्यायुषो यद्वियोजिताः ॥ इत्याश्वास्य विमुक्त्वा च कंसस्तौ परिशं
कितः ॥ अंतर्गृहं द्विजश्रेष्ठ प्रविवेश पुनः स्वकम् ॥ इति श्रीविष्णुपुराणे पंचमेंशे चतुर्थो
ध्यायः ॥ पराशरः ॥ विमुक्तो वसुदेवोपि नंदस्य शकटं गतः ॥ प्रहृष्टं दृष्टवान्नंदं पुत्रो जा
तो ममेति वै ॥ वसुदेवोपि तं प्राह दिष्ट्या दिष्ट्येति सादरम् ॥ वार्धकेपि समुत्पन्नस्तनयोयं त
वाधुना ॥ दत्तो हि वार्षिकः सर्वो भवद्भिर्नृपतेः करः ॥ यदर्थमागताः कार्यं तन्निष्पन्नं किमा
स्यते ॥ भवद्भिर्गम्यतां नंद तच्छीघ्रं निजगोकुलम् ॥ ममापि बालकस्तत्र रोहिणीप्रभवो
हि यः ॥ स रक्षणीयो भवता यथायं तनयो निजः ॥ इत्युक्ताः प्रययुर्गोपा नंदगोपपुरोगमाः
शकटारोपितैर्भांडैः करं दत्त्वा महाबलाः ॥ वसतां गोकुले तेषां पूतना बालघातिनी

वि. कंसायावेदयामासुर्देवकीप्रसवं द्विज कंसस्तूर्णमुपेत्यैनां ततो जग्राह बालिकां
पु. मुंच मुंचेति देवक्या सन्नकंठे निवारितः चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थि-
टी. ता अवाप रूपं च महत्सायुधाष्टमहाभुजम् प्रजहास तथैवोच्चैः कंसं च रुषिताब्रवीत्
१२६ किं मया क्षिप्तया कंस जातो यस्त्वां वधिष्यति सर्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते
तदेतत्संप्रधार्याशु क्रियतां हितमात्मनः इत्युक्त्वा प्रययौ देवी दिव्यस्रग्गंधभूषणा
पश्यतो भोजराजस्य स्तुता सिद्धैर्विहायसि ॥ इति श्रीविष्णुपुराणे पराशरीयायां संहि-
तायां पंचमेंशे तृतीयोऽध्यायः पराशरः कंसस्तूद्विग्नमनाः प्राह सर्वान्महासुरान्
प्रलंबकेशिप्रमुखानाहूयासुरपुंगवः कंसः हे प्रलंब महाबाहो केशिन्धेनुक पूतने
अरिष्टाद्यास्तथा चान्ये श्रूयतां वचनं मम मां हंतुममरैर्यत्नः कृतः किल दुरात्मभिः
मद्वीर्यतापितैर्वीरा न त्वेतान्गणयाम्यहं किमिंद्रेणाल्पवीर्येण किं हरेणैकचारिणा
हरिणा वापि किं साध्यं छिद्रेष्वसुरघातिना किमादित्यैः किं वसुभिरल्पवीर्यैः किमग्नि-
भिः किं वान्यैरमरैः सर्वैर्मद्बाहुबलनिर्जितैः किं न दृष्टोऽमरपतिर्मया संयुगमेत्य सः राम.
पृष्ठेनैव वहन्बाणानपगच्छन्न वक्षसा मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा २
मद्बाणभिन्नैर्जलदैरापो मुक्ता यथेप्सिताः किमुर्व्यामवनीपाला मद्बाहुबलभीरवः
न सर्वे सन्नतिं याता जरासंधमृते गुरुं अमरेषु ममावज्ञा जायते दैत्यपुंगवाः

म वसुदेवः ॥ ज्ञातोसि देवदेवेश शंखचक्रगदाधर दिव्यं रूपमिदं देव प्रसादेनोपसंहर ।
अद्यैव देव कंसोयं कुरुते मम यातनाम् अवतीर्णमिति ज्ञात्वा त्वमस्मिन् मम मंदिरे
देवक्युवाच ॥ योनन्तरूपोखिलविश्वरूपो गर्भेपि लोकान् वपुषा बिभर्ति प्रसीदतामेष
स देवदेवो यो मायया विष्कृतबालरूपः उपसंहर सर्वात्मन् रूपमेतच्चतुर्भुजम् जानातु
मावतारं ते कंसोयं दितिजात्मनः श्रीभगवानुवाच स्तुतोहं यत्त्वया पूर्वं पुत्रार्थिन्या तदद्य
ते सफलं देवि संजातं जातोहं यत्तवोदरात् पराशरः इत्युक्त्वा भगवांस्तूष्णीं बभूव मु
निसत्तम वसुदेवोपि तं रात्र्यामादाय प्रययौ बहिः मोहिताश्चाभवंस्तत्र रक्षिणः सू
तिकागृहे मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ वर्षतां जलदानां च तोयमत्युल्बणं
निशि संछाद्यानुययौ शेषः फणैरानकदुन्दुभिम् यमुनां चातिगंभीरां नानावर्तशताकु
लाम् वसुदेवो नयद्विष्णुं जानुमात्रवहां ययौ कंसस्य करदानाय तत्रैवाभ्यागतांस्तटे
नंदादीन् गोपवृद्धांश्च यमुनायां ददर्श सः तस्मिन् काले यशोदापि मोहिता योगनिद्रया
तामेव कन्यां मैत्रेय प्रसूता मोहिते जने वसुदेवोपि विन्यस्य बालमादाय दारिकाम्
यशोदाशयनात् तूर्णमाजगामामितद्युतिः ददृशे च प्रबुद्धा सा यशोदा जातमात्मजम्
नीलोत्पलदलश्यामं ततोत्यर्थं मुदं ययौ आदाय वसुदेवोपि दारिकां निजमंदिरम्
देवकीशयने न्यस्य यथापूर्वमतिष्ठत ततो बालध्वनिं श्रुत्वा रक्षिणः सहसोत्थिताः

तपस्त्वं त्वं क्षमा लोकस्य त्वं ब्रह्मा त्वमखिलेश्वरे तदेतस्मिन्स्थिता देवदेवे त्वे गंधर्वचारणाः
महोरगाश्च यक्षाश्च सुरदैत्याश्च गुह्यकाः मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि
तैरेवस्थैरनंतोसौ सर्वगः सर्वभावनः रूपकर्मस्वरूपाणि न परिच्छेदगोचरे
यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरंबरे
त्वं सर्वलोकरक्षार्थमवतीर्णा महीतले प्रसीद देवि सर्वस्य जगतस्त्वं शुभं कुरु
प्रीत्या तं धारयेशानं धृतं येनाखिलं जगत् ॥ इति श्रीविष्णुपुराणे पंचमेंशे द्वितीयो
ध्यायः २ पराशरः एवं संस्तूयमाना सा देवैर्देवमधारयत् गर्भेण पुंडरीकाक्षं जग
तस्त्राणकारणं ततोखिलजगत्पद्मबोधायाच्युतभानुना देवकीपूर्वसंध्यायामा
विर्भूतं महात्मना तज्जन्मदिनमत्यर्थमाह्लाद्यमलदिङ्मुखम् बभूव सर्वलोकस्य कौ
मुदी शशिनो यथा संतः संतोषमधिकं प्रशमं चंडमारुताः प्रसादं निम्नगा याता जाय
माने जनार्दने सिंधवो निजशब्देन वाद्यं चक्रुर्मनोहरम् जगुर्गंधर्वपतयो ननृतुश्चाप्स
रोगणाः ससृजुः पुष्पवर्षाणि देवा भुव्यंतरिक्षगाः जज्वलुश्चाग्नयः शांता जायमाने जना
र्दने ध्रुवपातेऽखिलाधारे जायमाने जनार्दने मंदं जगर्जुर्जलदाः पुष्पवृष्टिमुचो द्विज राम:
फुल्लेंदीवरपत्राभं चतुर्बाहुमुदीक्ष्य तं श्रीवत्सवक्षसं जातं तुष्टावानकदुंदुभिः
अभिष्टूय च तं वाग्भिः प्रसन्नाभिर्महामतिः विज्ञापयामास तदा कंसाद्भीतो द्विजोत्त

न वै तदा षड्गर्भविन्यासं चक्रे चान्यस्य कर्षणम् । सप्तमे रोहिणीं प्राप्ते गर्भे गर्भेन ततो हरिः
लोकत्रयोपकाराय देवक्याः प्रविवेश वै । योगनिद्रा यशोदायास्तस्मिन्नेव ततो दिने
संभूता जठरे तद्वद्यथोक्तं परमेष्ठिना । ततो ग्रहगणाः सम्यक्प्रचचार दिवि द्विज
विष्णोरंशे भुवं याते ऋतवश्चाभवञ्छुभाः । न सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा
ज्वाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमाययुः । अदृष्टाः पुरुषस्त्रीभिर्देवकीं देवमानवाः
बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् । प्रकृतिस्त्वं परा सूक्ष्मा ब्रह्मगर्भाभवत्पुरा
ततो वाणी जगद्धातुर्वेदगर्भासि शोभने । सृज्यस्वरूपगर्भा च सृष्टिभूता सनातने
बीजभूता तु सर्वस्य यज्ञगर्भाभवस्त्रयी । फलगर्भा त्वमेवाज्यं वह्निगर्भा तथारणिः
अदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः । ज्योत्स्ना प्रभा च गर्भा त्वं त्वनगर्भासि सन्ततिः
नयगर्भा धरानीतिर्लज्जा त्वं प्रश्रयोन्नता । कामगर्भा तथेच्छा त्वं तुष्टिः सन्तोषगर्भिणी
मेधा च बोधगर्भासि धैर्यगर्भोद्वहा धृतिः । ग्रहर्क्षतारकागर्भा द्यौरस्याखिलहेतुकी
एता विभूतयो देवि तथान्याश्च सहस्रशः । तथासंख्या जगद्धात्रि साम्प्रतं जठरे तव
समुद्राद्रिनदीद्वीपवनपत्तनभूषणा । ग्रामखर्वटखेटाढ्या समस्ता पृथिवी शुभे
समस्तवह्नयोंऽभांसि समस्ताश्च समीरणाः । ग्रहर्क्षतारकाचित्रं विमानशतसंकुलम्
अवकाशमशेषस्य यद्ददाति नभस्थलम् । भूर्लोकोऽथ भुवर्लोको स्वर्लोकोऽथ महर्जनः

वि.
पु.
टी.
१२८

संभविष्यति गोकुले तु वसुदेवस्य भार्यान्या रोहिणी स्थिता तस्याः स संभूतिसमये देवि नेय
स्त्वयोदरे सप्तमो भोजराजस्य भयात्क्रोधोपरोधतः देवक्याः पतितो गर्भ इति लोको वदि
ष्यति गर्भसंकर्षणात्सोऽथ लोके संकर्षणेति वै संज्ञामवाप्स्यते वीरः श्वेताद्रिशिखरोप
मः ततोऽहं संभविष्यामि देवकीजठरे शुभे गर्भं त्वया यशोदाया गंतव्यमविलंबितम्
प्रावृट्काले च नभसि कृष्णाष्टम्यामहं निशि उत्पत्स्यामि नवम्यां तु प्रसूतिं त्वमवाप्स्यसि
यशोदाशयने मां तु देवक्यास्त्वामनिंदिते मच्छक्तिप्रेरितमतिर्वसुदेवो नयिष्यति
कंसश्च त्वामुपादाय देवि शैलशिलातले प्रक्षेप्स्यत्यंतरिक्षे च संस्थानं त्वमवाप्स्यसि
ततस्त्वां शतधा शक्रः प्रणम्य मम गौरवात् प्रणिपातानतशिराः भगिनीत्वे ग्रहीष्यति
ततः शुंभनिशुंभादीन्हत्वा दैत्यान्सहस्रशः स्थानैरनेकैः पृथिवीमशेषां मंडयिष्यसि
त्वं भूतिः सन्नतिः कांतिः क्षांतिर्द्यौः पृथिवी धृतिः लज्जा पुष्टिरुषा या च काचिदन्या त्वमेव सा
ये त्वामार्येति दुर्गेति वेदगर्भांबिकेति च भद्रेति भद्रकालीति क्षेमदा भाग्यदेति च
प्रातश्चैवापराह्णे च स्तोष्यंत्यानम्रमूर्तयः तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यति
सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता नृणामशेषकामांस्त्वं प्रसन्ना संप्रदास्यति
ते सर्वे सर्वदा भद्रे मत्प्रसादादसंशयम् असंदिग्धा भविष्यंति गच्छ देवि यथोदितम् ॥
इति श्रीविष्णुपुराणे पंचमेंऽशे प्रथमोऽध्यायः पराशरः यथोक्तं सा जगद्धात्री देवदेवे

राम. १

सर्व: समर्था: समीरणाग्निप्रमुखालोकपालास्तथात्मे त्वत्त: समस्ता: सुरनाथकार्यमेभिर्यदेवयत्स्वरी
यमर्थम् आज्ञापयाशेषतिपालयंतस्तथैवतिष्ठामसदात्वदोषा: परापर: एवंसंस्तूय
मानस्तुभगवान्परमेश्वर: उज्जहारात्मन: केशौसितकृष्णौमहामुने उवाचचसुरानेतौम
त्केशौवसुधातले अवतीर्यभुवोभारक्लेशहानिंकरिष्यत: सुराश्चसकला: स्वांशैरवती
र्यमहीतलम् कुर्वंतुयुद्धमुन्मत्तै: पूर्वोत्पन्नैर्महासुरै: तत: क्षयमशेषास्तेदैतेयाधर
णीतले प्रयास्यंतिनसंदेहोमद्दृक्पातविचूर्णिता: वसुदेवस्ययापत्नीदेवकीदेवतोप
मा तस्यायमष्टमोगर्भोमत्केशोभवितासुरा: अवतीर्यचतत्रायंकंसंघातयिताभुवि
कालनेमिंसमुद्भूतमित्युक्त्वांतर्दधेहरि: अदृश्यायततस्तस्मैप्रणिपत्यमहात्मने मेरु
पृष्ठंसुराजग्मुरवतेरुश्चभूतले कंसायचाष्टमोगर्भोदेवक्याधरणीधर: भविष्यतीत्या
चचक्षेभगवान्नारदोमुनि: कंसोपितदुपश्रुत्यनारदात्कुपितस्तत: देवकींवसुदेवं
चगृहेगुप्तावधारयत् जातंजातंचकंसायतेनैवोक्तंयथापुरा तथैववसुदेवोपिपुत्रमर्पि
तवान्द्विज हिरण्यकशिपो: पुत्रा: षड्गर्भा इतिविश्रुता: विष्णुप्रयुक्तातान्निद्राक्रमाद्गर्भे
न्ययोजयत् योगनिद्रामहामायावैष्णवीमोहितंयया अविद्ययाजगत्सर्वंतामाहभग
वान्हरि: श्रीभगवान् निद्रेगच्छममादेशात्पातालतलसंश्रयान् एकैकमनुषड्गर्भा
न्देवकीजठरेनय हतेषुतेषुकंसेनशेषाख्योंशस्ततोमम अंशांशेनोदरेतस्या: सप्तम:

वि॰
पु॰
टी॰
१२३॰

ध्याभवान्सर्वगतोनन्तरूपीरूपाननेकाननुपश्यसीश । एकस्त्वमग्र्यःपरमःपदंयत्पश्यंति
त्वामुरयोगाज्ञानदृष्ट्यम् नतोन्यात्किंचिदस्तिस्वरूपंयद्वाभूतंयच्चभव्यंपरात्मन् । व्य
क्ताव्यक्तस्वरूपस्त्वंसमस्तव्यक्तरूपकम् सर्वज्ञःसर्वदृक्सर्वसर्वशक्तिबलर्द्धिमान् श्र
द्धान्नस्थापयवृद्धिस्त्वमाविनोवाविमान्वयी क्रमतेश्रीभयक्रोधकामादिभिरसंयुतः
निरवद्यःपरःप्राप्तेर्निरधिष्ठोक्षरःक्रमः सर्वेश्वरपराधारधाम्नांधामात्मकोक्षयः
सकलावरणातीतोनिरालंबनभावनः महाविभूतिसंस्थानदृष्टास्तेपुरुषोत्तम
नाकारणाःकारणाद्वाकारणाकारणान्नच शरीरग्रहणंव्यापिन्धर्मत्राणायतेपरं
इत्थंसंस्तवमानस्तुभगवानजः ब्रह्माणमाहविश्वात्माविश्वरूपधरोहरिः
श्रीभगवान् ब्रह्मेऽत्रहींत्वयामत्तःसद्वदेवैर्यदिष्यते तदुच्यतामशेषंचसिद्धमेवाव
धार्यतां पराशरः ततोब्रह्माहरेर्दिव्यंविश्वरूपमवेक्ष्यतत् तुष्टावभूयोदेवेषुसाध्वस
वनतात्मसु ब्रह्मा नमोनमस्तेऽस्तुसहस्रमूर्त्तयेसहस्रबाहोबहुवक्त्रपाद् नमोन
मस्तेजगतःप्रवृत्तिविनाशसंस्थानकराप्रमेय सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाण गरी
यसामप्यतिगौरवात्मन् प्रधानबुद्धीन्द्रियवत्प्रधानमूलापरात्मन्भगवन्प्रसीद
एषामहीदेवमहीप्रसूतैर्महासुरैःपीडितशैलबंधा परायणंत्वांजगतामुपैति भाराव
तारार्थमपारपारम् एतेवयंवृत्ररिपुस्तथायं नासत्यदस्रौवरुणस्तथैव इमेचरुद्रा १

रामः
१

तत्तातस्तत्तास्सामः दीनात्रेस्तरमुत्तमम् नत्वापायहरिंतस्मै सर्वविस्तापयामवै
सर्वदेवजगत्पूर्थससर्वात्माजगन्मयः श्रुत्यांपुत्रोमावनीर्योर्व्यो पसेस्मरुत्तरूतेस्थिनिं
पयाशयाः इत्त्वकाग्रयथीमत्रमहदेवैःपितामहः समाहितमतिश्चैवेतद्दावगरुडध
जे श्रीब्रह्मः हैविधेनपिनां ... वाप्यपरानथा तपवमवृतोरूपेसूर्तोसूर्तोत्मकेप्र
मे देवस्तोत्रणीयस्तानस्थलनाम्नवसर्ववित् शाहूदलापरंदैवब्रह्मस्वब्रह्मसर्वंजगत्
स्येदस्लंयत्स्वेदमाममेवेदस्तर्वंच शिवाकल्पोनिरुक्तैवश्छंदोज्योतिषमेवच
इतिहासपुराणानिस्तुतयान्याकरणंत्रमो मीमांसान्यायकेतद्धर्मशास्त्राणिनादय
श्चान्यान्मदेहगुणवद्विवाचाचारियद्भवः तदणा ------ नात्यध्यात्मतत्त्वरूपवत्
तमध्यात्मनिर्देश्यमविज्ञानामवर्णकम् अपाणिपादरूपंचविदनिर्त्यपरंपदम्
सूक्ष्मोध्यकर्णःपरिपश्यमिनमवदत्रैकोवहुरूपरूप अपादहस्तोजवनोग्रहीता
तंवेत्तिसर्वंनचसर्ववेद्यः अणोरणीयांसमहतोमहीयां पश्यनेताननिष्प्रनिरस्था यै
येस्मवीर्यसविभनितान्यहरेणपरूपापरतः परात्मनः तंविष्णुमादिर्भवतस्थगोसा
सर्वेणिभूतानिनवांतवाणि यदूतमध्योनदणोवणीयान्स्मात्स्वमेकः प्रकृतेः प्रवक्ता
त पकश्चवर्णभगवान्भूतान्यवृद्धोविभूतिंजगतोदधाति तंविष्णनश्चलरूपेनमूर्जेवि
धायदेवैनिरव्ययेविधानः यथाग्निरेकोवहुधासमुद्धानैर्विकारभेदैरविकाररूपः त

तदंशभूतःसर्वेषांसमूहोवःसुरोत्तमाः आदित्यामरुतःसाध्यारुद्रावस्वश्विवह्नयः
पितरोयेचलोकानांस्रष्टारोत्रिपुरोगमाः एतत्तवाप्रमेयस्यरूपंविष्णोर्महात्मनः
यक्षराक्षसदैतेयपिशाचोरगदानवाः गंधर्वाप्सरसश्चैवरूपंविष्णोर्महात्मनः
ग्रहर्क्षतारकाचित्रगगनाग्निजलानिलाः अहंचविषयाश्चैतत्सर्वंविष्णुमयंजगत्
तथाप्यनेकरूपस्यतस्यरूपाण्यहर्निशम् बाध्यबाधकतांयांतिकल्लोलाइवसागरे
तत्सांप्रतमिमेदैत्याःकालनेमिपुरोगमाः मर्त्यलोकंसमाक्रम्यबाधंतेहर्निशंप्रजाः
कालनेमिर्हतोयोसौविष्णुनाप्रभविष्णुना उग्रसेनसुतःकंसःसंभूतःसमहासुरः
अरिष्टोधेनुकःकेशीप्रलंबोनरकस्तथा सुंदोसुरस्तथात्युग्रोबाणश्चापिबलेःसुतः
तथान्येचमहावीर्यानृपाणांभवनेषुये समुत्पन्नादुरात्मानस्तान्नसंख्यातुमुत्सहे
अक्षौहिण्योत्रबहुलादिव्यमूर्तिधृताःसुराः महाबलानांदृप्तानांदैत्येंद्राणांममोपरि
तद्भूरिभारपीडार्तानशक्नोम्यमरेश्वराः बिभर्तुमात्मानमहमितिविज्ञापयामिवः
क्रियतांतन्महाभागाममभारावतारणम् यथारसातलंनाहंगच्छेयमतिविह्वला प
राशरः इत्याकर्ण्यधरावाक्यमशेषैस्त्रिदशैस्ततः भुवोभारावतारार्थंब्रह्माप्राहप्रचोदि
तः ब्रह्मोवाच यथाहवसुधासर्वंसत्यमेतद्दिवौकसः अहंभवोभवंतश्चसर्वेनारायणा
त्मके सर्वविभूतयःतस्यतासामेवपरस्परम् न्यूनताधिकताबाध्यबाधकत्वेनवर्तते

मैत्रेयः॥ ॐनृपाणांकथितःसर्वोभवतावंशविस्तरः वंशानुचरितंचैवयथावदनुवर्णि
तं अंशावतारोब्रह्मर्षेयोयंयदुकुलोद्भवः विष्णोस्तंविस्तरेणाहंश्रोतुमिच्छाम्यशेषतः
चकार यानिकर्माणिभगवान्पुरुषोत्तमः अंशांशेनावतीर्योर्व्यांतत्रतानिमुनेवद
पराशरः मैत्रेयश्रूयतामेतद्यत्पृष्टोहमिहत्वया विष्णोरंशांशसंभूतिचरितंजगतोहि
तम् देवकस्यसुतांपूर्वंवसुदेवोमहामुने उपयेमेमहाभागांदेवकींदेवतोपमाम् कं
सस्तयोर्वररथंचोदयामाससारथिः वसुदेवस्यदेवक्याःसंयोगेभोजनंदनः अथांतरि
क्षेवाग्गुच्चैःकंसमाभाष्यसादरम् मेघगंभीरनिर्घोषंसमाभाष्येदमब्रवीत् यामेतांवह
सेमूढसहभर्त्रारथस्थिताम् अस्यास्तवाष्टमोगर्भःप्राणानपहरिष्यति पराशरः॥
इत्याकर्ण्यसमुत्पाट्यखड्गंकंसोमहाबलः देवकींहन्तुमारब्धोवसुदेवोब्रवीदिदम्
नहंतव्यामहाभागदेवकीभगिनीतव समर्पयिष्येसकलान्गर्भानस्योदरोद्भवान् प
राशरः तथेत्याहततःकंसोवसुदेवंद्विजोत्तम नघातयामासचतांदेवकींसत्यगौरवात्
एतस्मिन्नेवकालेतुभूमिर्भारावपीडिता जगामधरणीमेरौसमाजेत्रिदिवौकसाम्
सब्रह्मकान्सुरान्सर्वान्प्रणिपत्याथमेदिनी कथयामासतत्सर्वंखेदात्करुणभाषिणी
अग्निःसुवर्णस्यगुरुर्गवांसूर्यःपरोगुरुः ममाप्यखिललोकानांगुरुर्नारायणोगुरुः
प्रजापतिपतिर्ब्रह्मासर्वेषामपिपूर्वजः कलाकाष्ठानिमेषात्माकालश्चाव्यक्तमूर्तिमान्

श्री
वि·पु·
२०१

नृपागतान् महाबलान्महावीर्याननन्तधनसंचयान् कृतान्कालेनबलिनाकथाशेषा
न्नराधिपान् श्रुत्वानपुत्रदारगृहक्षेत्रादिकेतथा द्रव्यादौवाकृतप्रज्ञोममत्वंकुरु
तेनरः तप्तंतपोयैःपुरुषप्रवीरैरुद्बाहुभिर्वर्षगणाननेकान् इष्ट्वाश्चयज्ञान्ब
लिनोतिवीर्याःकृतास्तुकालेनकथावशेषाः पृथुस्समस्तान्विचचारलोकानव्या
हतोयोरिविदारचक्रः सकालवाताभिहतःप्रनष्टःक्षिप्तंयथाशाल्मलितूलमग्नौ
यःकार्तवीर्योबुभुजेसमस्तान्द्वीपान्समाक्रम्यहतारिचक्रः कथाप्रसंगेष्वभिधी
यमानःसएवसंकल्पविकल्पहेतुः दशाननाविक्षितराघवाणामैश्वर्यमुद्भासि
ताननानाम् भस्मापिजातंनकथंक्षणेनभ्रूभंगपातेधिगन्तकस्य कथाश
रीरत्वमवापयद्वैमान्धातृनामाभुविचक्रवर्ती श्रुत्वापितत्कोहिकरोतिसाधुः
ममत्वमात्मन्यपिमन्दचेताः भगीरथाद्याःसगरःककुत्स्थोदशाननोराघवल
क्ष्मणौच युधिष्ठिराद्याश्चबभूवुरेतेसत्यंनमिथ्याक्वनतेनविद्मः येसाम्प्रतंयेच
नृपाभविष्याप्रोक्तामयाविप्रवरोग्रवीर्याः तेतेकथात्मेवकथाभिधेयास्सर्वेभवि
ष्यन्तियथैवपूर्वे एतद्विदित्वाननरेणकार्यंममत्वमात्मन्यपिपण्डितेन तिष्ठन्तुता
वत्तनयात्मजायाक्षेत्रादयोयेचशरीरतोन्ये॥ इतिश्रीविष्णुपुराणेश्रीपाराशा
रीयायांसंहितायांचतुर्थांशेचतुर्विंशतितमोध्यायः २४ इतिचतुर्थांशःसमाप्तः॥

गीताः श्लोकाश्चत्वारो निबोधनात् यानाहृत्य मेधाविने तनकाभ्यामितो मुनिः हृष्टिश्चुवाच क
श्चमेधनैव्हाणां संपंथोनुद्धिमतामपि येनकेणारायमीणामानिविश्रुत्यैवनमः पूर्वेमात्म
नयंकृतानेनमिक्रुनिमेत्रिमः ननोभृत्योश्चपैतोश्च जिमीबंनिनयाविभून कमेणानेतो
ह्यामोवयंपेहृष्टीममाधारान् उमासक्तोविपोमन्ने नपयपत्यविहूरयो मम्बुद्धावरणीयानिमः
मेउत्तममनोपिवं किमयदात्मनयाटेनत्मुक्तियानमत्रेयफले उन्नत्पपूर्वेजायांनायांनाटाय
गानत्पिता नोममनिविमूढनाजेनमिक्रुनिपार्थिवाः मत्कृतेमिवपुत्राणांश्चानृणांवा
पिविग्रहः मायंतेत्यंनमोहेनममन्वाहनवेनमा हृष्टीममेयंमकलामभेयंममेयमेवा
ममयाश्चवनेयं येयोमलोलत्रवभवरोजाक्रतुद्धिरामी दिनिनस्पनस्य हृष्टामममन्नाहृनवि
नमेकविहाप्यमात्मन्युपपंयत्रुतेने नस्यान्वयस्त्रत्रकयंममनेहृ[illegible]घाम्प्टमनुभवकरोति ह
ष्टीममैवाष्युपरिन्यजेनावरंनियेहूनमुक्तेः स्वयानून नमोपिपाकेषुममानिहामः पुनश्च
मूढेषुनयाभ्युपैति प्रायः हृत्वेनैयरहीगीताः श्लोकामेत्रेययेः कृतेः ममवंक्लियंया
निनापत्सेयपद्याहृर्मि उमेपकायितःसम्यङ्ग्नोवेषोमययानव यत्रास्थितिश्रद्दत्रस्मविस्म
रेषांशाकान्पूणाः श्रूयोतियदुर्यमभक्तामनोविशामनक्रमान् नस्पपापमशेषंवेप्रणान्मसः
मलामनः धनधान्यद्धिमत्काला प्राप्तोत्पयाहतेद्विपः कृतेनमालिवेवंशप्रशान्तेशार्णा
सूर्ययोः उत्वाकृतज्ञमान्मानस्मायाविलनात्रकून यथाविनहूमायांश्चुत्वानानिष्टाः

श्री
वि.पु.
२०।

नियदाचैतेपूर्वाषाढां महर्षयः तदानंदात्प्रभृत्येष कलिर्वृद्धिंगमिष्यति यस्मिन्कृष्णो
दिवंयातस्तस्मिन्नेवतदाहनि प्रतिपन्नंकलियुगंतस्यसंख्यांनिबोधमे त्रीणिलक्षाणि
वर्षाणांद्विजमानुषसंख्यया षष्टिश्चैवसहस्राणिभविष्यत्येषवैकलिः शतानितानि
दिव्यानिसप्तपंचचसंख्यया निःशेषेणततस्तस्मिन्भविष्यतिपुनःकृतं ब्राह्मणाःक्षत्रि
यावैश्याःशूद्राश्चद्विजसत्तम युगेयुगेमहात्मानःसमतीताःसहस्रशः बहुत्वान्नामधेया
नांपरिसंख्याकुलेकुले पुनरुक्तबहुत्वात्तुनमयापरिकीर्तिताः देवापिःपौरवोराजामरु
श्चेक्ष्वाकुवंशजौ महायोगबलोपेतौकलापग्रामसंश्रयौ कृतेयुगेत्विहागम्यक्षत्रप्रावर्तकौ
कौहितौ भविष्यतेमनोर्वंशबीजभूतौव्यवस्थितौ एतेनक्रमयोगेनमनुपुत्रैर्वसुंधरा कृ
तत्रेतादिसंज्ञानियुगानित्रीणिभुज्यते कलौतबीजभूतास्तुकेचित्तिष्ठंतिवैमुने यथैवदेवा
पिमरूसांप्रतंसमवस्थितौ एषतूद्देशतोवंशस्तवोक्तोभूभुजांमया निखिलोगदितुंशक्यो
नैषजन्मशतैरपि एतेचान्येचभूपालायैरत्रक्षितिमंडले कृतंममत्वंमोहांधैर्नित्यंहेयक
लेवरे कथंममेयमचलामत्पुत्रस्यकथंमही मद्वंशस्येतिचिंतार्ताजग्मुरंतमिमेनृपाःतेभ्यः
पूर्वतराश्चान्येतेभ्यस्तेभ्यस्तथापरे भविष्याश्चैवयास्यंतितेषामन्येचयेप्यनु विलोक्यात्म
जयोद्योगयात्राव्यग्रान्नराधिपान् पुष्पप्रहासैःशरदिहसतीववसुंधरा मैत्रेयपृथिवी

तीर्थे सकलम्लेच्छदस्युदुष्टचरणचेतसामशेषाणामपरिछिन्नशक्तिमहात्म्यः क्षयं
करिष्यति स्वधर्मेषु चाखिलमेव संस्थापयिष्यतीत्यनंतरं चाशेषकलेरवसाने निशा
वसानप्रबुद्धानां तेषामेवजनपदानाममलस्फटिकदलशुद्धमतयोभविष्यंतिते॰
षांचबीजभूतानामशेषमनुष्याणांपरिणतानांचपितत्कालकृतापत्यप्रसूतिर्भविष्यति
तानिचतदपत्यानिकृतयुगधर्मानुसारीण्येवभविष्यंतीत्यत्रोच्यते यदाचंद्रश्चसूर्यश्च
यदातिष्यबृहस्पती एकराशौसमेष्यंतिभविष्यतितदाकृतं ॥ अतीतानागतानाथव
र्तमानाश्चैवच एतेवंशेषुभूपालाः कथितामुनिसत्तम यावत्परीक्षितोजन्मयावन्नं
दाभिषेचनं एतद्वर्षसहस्रंतुज्ञेयंपंचदशोत्तरं सप्तर्षीणांतुयौपूर्वौदृश्येतेउदितौ॰
दिवि तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि तेनसप्तर्षयोयुक्तास्तिष्ठंत्यब्दशतंनृणां
तेतुपारीक्षितेकालेमघास्वासन्द्विजोत्तम तदाप्रवृत्तश्चकलिः द्वादशाब्दशतात्मकः
यदैवभगवद्विष्णोरंशोयातोदिवंद्विज वसुदेवकुलोद्भूतः तदैवात्रागतःकलिः या
वत्सपादपद्माभ्यांपस्पर्शेमांवसुंधरां तावत्पृथ्वीपरिष्वंगेसमर्थोनाभवत्कलिः गते
सनातनस्यांशेविष्णोस्तत्रभुवोदिवं तत्याजसानुजोराज्यंधर्मपुत्रोयुधिष्ठिरः विपरी
तानिदृष्ट्वाचनिमित्तानिसपांडवः यातेकृष्णेचकाराथसोभिषेकंपरीक्षितः प्रयास्य

णोत्कृष्टानां चार्थस्य विपर्ययेन वर्तमानाः प्रजाः क्षयं यास्यन्ति ततश्चानुदिनमल्पाल्पह्रास-
व्यवच्छेदाद्धर्मार्थयोर्जगतः संक्षयो भविष्यति ततश्चार्थ एवाभिजनहेतुर्बलमेवाशेषधर्म-
हेतुरभिरुचिरेव दाम्पत्यसंबंधहेतुरनृतमेव व्यवहारजयहेतुः स्त्रीत्वमेवोपभोगहे-
तुरत्नवतीत्वमेव पृथ्वीहेतुः ब्रह्मसूत्रमेव विप्रत्वहेतुर्लिंगधारणमेवाश्रमहेतुरन्या-
य एव वृत्तिहेतुः दौर्बल्यमेवावृत्तिहेतुरभयप्रगल्भोच्चारणमेव पांडित्यहेतुः दानमेव धर्महेतुः
अनाढ्यतैवासाधुत्वहेतुः स्नानमेव प्रसाधनहेतुः स्वीकरणमेव विवाहहेतुः सद्वेशधा-
र्येव पात्रं दूरायतनोदकमेव तीर्थमित्येवमनेकदोषोत्तरे तु भूमंडले सर्ववर्णेष्वेव यो ब-
लवान्स भूपतिर्भविष्यत्येवं चातिलुब्धकरभारासहाः शैलानामंतरद्रोणीः प्रजाः संश्र-
यिष्यंति मधुशाकमूलफलपत्रपुष्पाद्याहाराश्च भविष्यंति तरुवल्कलपर्णचीरप्रा-
वरणाश्चातिबहुप्रजाः शीतवातातपवर्षसहाश्च भविष्यंति न च कश्चित्त्रयोविंशतिव-
र्षाणि जीविष्यति अनवरतं चात्र कलियुगे क्षयमायात्यखिल एवैष जनः क्षयमुपैष्य-
ति श्रौतस्मार्ते धर्मे विप्लवमत्यंतमुपगते क्षीणप्राये च कलावशेषजगत्स्रष्टुश्चराचर-
गुरोरादिमध्यांतरहितस्य ब्रह्ममयस्यात्मरूपिणो भगवतो वासुदेवस्यांशः शंभल-
ग्रामप्रधानब्राह्मणविष्णुयशसः गृहेऽष्टगुणर्द्धिसमन्वितः कल्किरूपी जगत्यत्राव

पुत्रे स्ततश्च वंशात्तरभूतनंदनः सुनंदि स्तद्भ्रातानंदियशाः शुक्रप्रवीरो चैतेस्मा
हृर्षशतं षट् च वर्षाणि भविष्यंति ततस्तत्पुत्रास्त्रयोदशैते बाह्लिकाश्च त्रयस्ततः पुष्प
मित्रपटुमित्रः त्रयोदश मेकलाश्च सप्त कोसलायां तु नवैव भू
पतयो भविष्यंति नैषधास्तु त एव मागधायां विश्वस्फटिसंज्ञोन्यान्वर्णान्करिष्य
ति कैवर्तपटुपुलिंदब्राह्मणान्राज्ये स्थापयिष्यंति उत्साद्याखिलक्षत्रजातिं नव ना
गाः पद्मावत्यां नाम पुर्यामनुगंगाप्रयागं गयायाश्च मागधा गुप्ताश्च भोक्ष्यंति कोसलांध्रपुंड्रता
म्रलिप्तसमुद्रतटपुरीं च देवरक्षितो रक्षिष्यति कलिंगमाहिषकमाहेंद्रभौमान्गुहा भो
क्ष्यंति नैषधनैमिषकालकोसकान् जनपदान्मणिधान्यकवंशा भोक्ष्यंति त्रैरा
ज्यमूषिकजनपदान्कनकाह्वयो भोक्ष्यति सौराष्ट्रावंतिशूद्राभीरान्नर्व मरुविषयांश्
च व्रात्यद्विजातीनां शूद्राद्या भोक्ष्यंति सिंधुतटदाविकोर्वीभागान् काश्मीरविष
यांश्च व्रात्यम्लेच्छशूद्रादयो भोक्ष्यंती मे नेच तुल्यकालाः नोपिनश्चकाश्मीयन्नाउपिभं
ति सर्वे पृथिव्यां भूभृतो भविष्यंत्यल्पप्रसादाः बृहत्कोपाः सर्वकालमनृताधर्मरुचयः
स्त्रीबालगोवधकर्तारः परस्वादानरुचयोऽल्पसारा उदितास्तमितप्राया अल्पायुषो
महेच्छाह्यल्पधर्माश्च भविष्यंति ते च विमिश्रा जनपदास्तच्छीलवर्तिनो राजाश्रयशुष्मि

स्यापत्यः स्वयमवनीं भोक्ष्यति तस्य पुत्रो भूमित्रः तस्यापि नारायणः नारायणस्यात्मजः सु
शर्मा एते काण्वायनाश्चत्वारः पंचचत्वारिंशद्वर्षाणि भूपतयो भविष्यंति सुशर्माणं तु काण्व
स्य भृत्यो बली शिप्रकनामा ते हत्वांध्रजातीयो वसुधां भोक्ष्यति ततश्च कृष्णनामा तद्भ्रा
ता पृथिवीपतिर्भविता तस्यापि पुत्रः श्रीशातकर्णिः तस्यापि पूर्णोत्संगः तत्पुत्रश्शातक
र्णिः तस्माच्च लंबोदरः तस्माच्च जीविलः ततो मेघस्वातिः ततः पटुमान् ततश्चारिष्टक
र्मा ततो हालो हालात् पत्तलकः ततः पुरिंद्रसेनः ततस्सुंदरः शातकर्णी तस्माच्च चकोरः शा
तकर्णी ततः शिवस्वातिः ततश्च गोमतीपुत्रः तत्पुत्रः पुलिमान् तस्यापि शातकर्णी शि
वश्रीः ततश्शिवस्कंदः तस्मादपि यज्ञश्रीः ततो यज्ञस्ततश्चंद्रश्रीः तस्मात्पुलोमापि
एवमेते त्रिंशच्चत्वार्यब्दशतानि षट्पंचाशदधिकानि भोक्ष्यंति पृथिवीम् आंध्रभृत्याः
सप्ताभीराः दश गर्दभिल्लाश्च भूभुजो भविष्यंति ततष्षोडश भूपतयो भवितारः तत
श्चाष्टौ यवनाश्चतुर्दश तुरुष्का मुरुंडाश्च त्रयोदश एकादश मौनाः एते वै त्रयोद
श पृथिवीं वर्षशतानि नवनवत्यधिकानि भोक्ष्यंति ततश्च मौना एकादश भूपतयो
ऽब्दशतानि त्रीणि पृथिवीं भोक्ष्यंति तेषूत्सन्नेषु पुनः किलिकिला यवना भूपतयो भवि
ष्यंति मूर्द्धाभिषिक्तास्तेषामवंध्यशक्तिस्ततः पुरंजयः ततो रामचंद्रः तस्माद्धर्म

स्मादर्भकोस्यार्भकादुदयः तस्मान्नंदिवर्धनस्ततमहानंदी इत्येते शैशुनागा दशभू
मिपालाः त्रीणिवर्षशतानिद्विषष्ट्यधिकानिभविष्यंति महानंदिनस्ततश्शूद्रागा
र्भोद्भवोतिलुब्धोमहापद्मोनंदः परशुरामइवापरोखिलक्षत्रांतकारीभविष्यति त
तःप्रभृतिशूद्राभूमिपालाभविष्यंतिसचैकच्छत्रामनुल्लंघितशासनोमहापद्मः पृथ्वीं
भोक्ष्यति तस्याप्यष्टौसुतानामहापद्मस्यानुभोक्ष्यंति महापद्मस्तत्पुत्राश्चैकंवर्षशतमवनीप
तयोभविष्यंति नवैतान्नंदान्कौटिल्योब्राह्मणःसमुद्धरिष्यति तेषामभावेमौर्याःपृथ्वीं
भोक्ष्यंतिकौटिल्यएवचंद्रगुप्तंराज्येभिषेक्ष्यति तस्यापिपुत्रोबिंदुसारोभविष्यति तस्या
प्यशोकवर्धनः ततस्सुयशाः ततश्चदशरथः ततश्चसंगतः ततश्शालिशूकः त
स्मात्सोमशर्मातस्मात्शतधन्वातस्मात्बृहद्रथनामाभविता एवमेतेमौर्यादशभूपतयो
भविष्यंति अब्दशतंसप्तत्रिंशदुत्तरं तेषामंतेपृथिवींदशशुंगाभोक्ष्यंतिपुष्यमित्रःसे
नापतिःस्वामिनंहत्वाराज्यंकरिष्यति अस्यात्मजोग्निमित्रस्तस्मात्सुज्ये
ष्ठस्ततोवसुमित्रस्तस्मादुदंकस्ततःपुलिंदकस्ततोघोषवसुः तस्मादपिवज्रमित्रः
ततोभागवतस्तस्माद्देवभूतिरित्येतेशुंगाद्वादशोत्तरंवर्षशतंपृथ्वींभोक्ष्यंति ततः
कण्वान्भूर्यास्यति देवभूतिंतुशुंगराजानंव्यसनिनंतस्यैवामात्यःकण्वोवसुदेवनामक

यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलाविति ॥ इति श्रीविष्णुपुराणे ब्राह्मोडे पाराशरी-
यायां संहितायां चतुर्थेंऽशे द्वाविंशोऽध्यायः २२ श्रीपराशर उवाच मागधानां बृहद्रथानां
भाविनमनुक्रमं कथयाम्यत्र हि वंशे महाबला जरासंधप्रधाना बभूवुः जरासंधस्य तनयः स-
हदेवात्सोमापिस्तस्माच्छ्रुतश्रवास्तस्याप्ययुतायुस्ततश्च निरमित्रस्तत्तनयः सुक्षत्रः
तस्मादपि बृहत्कर्मा ततश्च सेनजित् तस्माच्छ्रुतंजयः श्रुतंजयाद्विप्रः तस्य च पुत्रः शु-
चिर्नामा भविष्यति तस्यापि क्षेम्यस्तस्य सुव्रतः सुव्रताद्धर्मस्ततः सुश्रवाः ततो दृढसेन-
ततः सुमतिः तस्मात्सुबलः सुबलात्सुनीतो भविता ततः सत्यजित् सत्यजितो विश्व-
जित् तस्यापि रिपुंजयः इत्येते बार्हद्रथा भूपतयो वर्षसहस्रमेकं भविष्यन्तीति ॥ इति श्री
विष्णुपुराणे ब्राह्मोडे पाराशरीयायां संहितायां चतुर्थेंऽशे त्रयोविंशतितमोऽध्यायः २३
पराशर उवाच योऽयं रिपुंजयो नाम बार्हद्रथोऽन्त्यस्तस्य मुनिको नामामात्यो भवि-
ष्यति स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानमभिषेक्ष्यति तस्यापि बालको नाम पु-
त्रो भविता ततश्च विशाखयूपस्तत्पुत्रो जनकस्तस्य च नंदिवर्धनः इत्येते अष्टात्रिंशदु-
त्तरमब्दशतं पंच प्रद्योताः पृथ्वीं भोक्ष्यन्ति ततश्च शिशुनागस्तत्पुत्रः काकवर्णो भवि-
ता तस्य च पुत्रः क्षेमधर्मा तस्यापि क्षत्रौजाः तत्पुत्रो विधिसारः ततश्चाजातशत्रु-

स्यति तस्याप्युष्णः पुत्रो भविता उष्णाच्चित्ररथः ततश्च शुचिद्रथः तस्माद्वृष्णिमांस्ततः
सुषेणः तस्मात्सुनीथः सुनीथान्नृचक्षुस्तस्मात्सुखबलः सुखबलात्पारिप्लवस्तस्मात्ततश्च
सुनयः तस्यापि मेधावी मेधाविनो नृपंजयस्ततो मृदुस्तस्माच्च तिग्मः तिग्माद्बृहद्रथो
बृहद्रथाद्वसुदानस्ततोऽपरः शतानीकः तस्माच्चोदयनः उदयनादहीनरः ततश्च दण्डपा
णिः ततो निमिः तस्माच्च क्षेमकः अत्रायं श्लोकः ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षि-
सत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे
एकविंशतितमोऽध्यायः २१ श्रीपराशरः अतश्चेक्ष्वाकवो भविष्याः पार्थिवाः कथ्यन्ते बृ
हद्बलस्य पुत्रो बृहत्क्षणः तस्मादुरुक्षयः तस्माच्च वत्सव्यूहो ततश्च प्रतिव्योमः तस्यापि
दिवाकरः तस्मात्सहदेवः सहदेवाद्बृहदश्वः तत्सूनुर्भानुरथः तस्य च प्रतीताश्वः तस्या
पि सुप्रतीकः ततो मरुदेवः तस्मात्सुनक्षत्रः तस्मात्किन्नरः किन्नरादन्तरिक्षः तस्मात्सु
पर्णः ततश्चामित्रजित् ततश्च बृहद्भ्राजः तस्यापि धर्मी धर्मिणः कृतंजयः कृतंजयाद्र-
णंजयः रणंजयात्संजयः तस्माच्छाक्यः शाक्याच्छुद्धोदनः तस्माद्राहुलः ततः प्रसेन-
जित् ततश्च क्षुद्रकः क्षुद्रकात्कुण्डकः तस्मादपि सुरथः ततः पुत्रश्च सुमित्रो इत्येते चेक्ष्वा-
कवो बृहद्बलान्वयाः अत्रानुवंशश्लोकः इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति

मात्मजाः तथ्यायौधेयी युधिष्ठिराद्देवकं पुत्रमवाप हिडिम्बा घटोत्कचं भीमसेनात्पुत्रं ले
भे काशी च भीमसेनाद्देवं सर्वगं सुतमवाप सहदेवात्सुविजया सुहोत्रं आसवनीकरेणुम
त्यां च नकुलोपि निरमित्रमजीजनत् अर्जुनेनाप्युलूप्यां नागकन्यायामिरावान्नाम पुत्रो
भवत् मनपूरपतिपुत्र्यां च पुत्रिकाधर्मेण बभ्रुवाहनं नाम पुत्रमर्जुनोजनयत् सुभद्रा
यां चार्भकत्वेपि योसावतिबलपराक्रमः समस्तारातिरथविजेता सोभिमन्युरजायत अभि
मन्योरुत्तरायां परिक्षीणेषु कुरुषु अश्वत्थाममुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भग
वतः सकलसुरासुरवंदितचरणयुगलस्यात्मेच्छया कारणमानुषरूपधारिणोनुभावा
त्पुनर्जीवितमवाप्य परीक्षिज्जज्ञे योयं सांप्रतमेतद्भूमंडलमखंडितायतिधर्मेण पालयति ॥
इति श्रीविष्णुपुराणे चतुर्थेंशे विंशोध्यायः २० पराशर उवाच अतः परं भविष्यानहं भूपा
लान्कीर्तयिष्यामि योयं सांप्रतमवनीपतिः परीक्षित् परिक्षितो जनमेजयश्रुतसेनोग्र
सेनभीमसेनाश्चत्वारः पुत्रा भविष्यंति तस्यापि शतानीको भविष्यति योसौ याज्ञवल्क्या
द्वेदमधीत्य कृपादस्त्राण्यवाप्य विषमविषयविरक्तचित्तवृत्तिः शौनकोपदेशाद्वेदान्वि
ज्ञानप्रवीणः परं निर्वाणमवाप्स्यति शतानीकादश्वमेधदत्तो भविता तस्मादप्य
धिसीमकृष्णोधिसीमकृष्णान्निचक्नुः यो गंगयापहृते हास्तिनपुरे कौशाम्ब्यां निव

नेकप्रकारं नानाह ततस्ते ब्राह्मणाः शंतनुमूचुः अग्रजज्येष्ठो भ्राता अस्मत्तानिर्वेदेन
प्रशांतनपवासावपि वनात्युषितो देवापतितो यमनादिकालसाहितवेदवचनदूषणाभ्या
सागात्पतितस्याग्रजोनेवपरिवेत्ताभवतीत्युक्तः शंतनुः स्वपुरमागम्य राज्यमकरोत् वद
वादविरोधवचनोऽश्मारणाहृषितेन तस्मिन्देवापौ तिहन्त्यादिप्राप्तिर्विलम्बस्तनिष्टात्पर्यव
वर्षं भगवान्पर्जन्यः बाह्लीकस्य सोमदत्तः पुत्रोऽभवत् सोमदत्तस्य भूरिभूरिश्रवशल्यसं
ज्ञास्त्रयः पुत्रा बभूवुः शंतनोरप्यमरनद्यां जाह्नव्यामुदारकीर्तिरशेषशास्त्रार्थविद्भीष्मः
पुत्रोऽभूत् सत्यवत्यां चित्रांगदविचित्रवीर्यौ द्वौ पुत्रावुत्पादयामास शंतनुः चित्रांगदस्तु बा
लएव चित्रांगदेनैव गंधर्वेणाहवे निहतः विचित्रवीर्योऽपि काशिराजतनये अम्बिकाम्बा
लिके उपयेमे तदुपभोगातिखेदात् यक्ष्मणा गृहीतः पंचत्वमगमत् सत्यवतीनियोगाच्च म
त्पुत्रः कृष्णद्वैपायनो मातुर्वचनमनतिक्रमणीयमिति विचित्रवीर्यक्षेत्रे धृतराष्ट्रपांडू तन्न
हितभुजिष्यायां च विदुरमुत्पादयामास पांडोरप्यरण्ये मृगशापोपहतप्रजननसामर्थ्य
स्य धर्मवायुशक्रैर्युधिष्ठिरभीमसेनार्जुनाः कुंत्यां नकुलसहदेवौ चाश्विभ्यां माद्र्यां पंच
पुत्राः समुत्पादिताः तेषां च द्रौपद्यां पंच पुत्रा बभूवुः युधिष्ठिरात्प्रतिविंध्यो भीमसेनाच्छ्रु
तसोमः श्रुतकीर्तिरर्जुनाच्छतानीको नकुलाच्छ्रुतकर्मा च सहदेवात् अपरे च पांडवाना

र्वभौमाज्जयत्सेनः तस्मादाराधितस्ततश्चायुतायुः अयुतायोरक्रोधनः तस्माद्देवातिथिः ततश्च
ऋक्षः ऋक्षाद्भीमसेनः ततश्च दिलीपः दिलीपात्प्रतीपः तस्यापि देवापिशंतनुबाह्लीकसंज्ञास्त्र
यः पुत्रा बभूवुः देवापिर्बाल एवारण्यं विवेश शंतनुस्तु महीपालोऽभूत् अयं च श्लो
कः पृथिव्यां गीयते यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः शांतिं चाप्नोति येनाग्र्यां क
र्मणा तेन शंतनुः तस्य च शंतनो राष्ट्रे द्वादश वर्षाणि देवो न ववर्ष ततश्चाशेषराष्ट्रविनाश
मवेक्ष्यासौ राजा ब्राह्मणानपृच्छत् कस्मादस्माकं राष्ट्रे देवो न वर्षति को ममापराध इति
ते तमूचुः अग्रजस्य ते देवापेरियमवनिस्त्वया भुज्यते परिवेत्तानेन देवो न वर्षति इत्यु
क्तस्स राजा पुनस्तानपृच्छत् किं मयात्र विधेयमिति ततस्ते पुनरप्यूचुः यावद्देवापिर्न पत
नादिभिर्दोषैरभिभूयते तावदेतत्तस्यार्हं राज्यं तदलमेतेन तस्मै दीयतामित्युक्ते तस्य मंत्रि
प्रवरेणाश्मसारिणा तत्रारण्ये तपस्विनो वेदवादविरोधवक्तारः प्रयुक्ताः तैरस्याप्यृजु
मतेर्महीपतिपुत्रस्य बुद्धिः वेदवादविरोधमार्गानुसारिण्यक्रियत राजा च शंतनुः द्विजव
चनोत्पन्नपरिदेवनशोकस्तान्ब्राह्मणानग्रतः कृत्वाग्रजराज्यप्रदानायारण्यं जगाम तदा
श्रममुपगताश्चावनीपतिपुत्रं देवापिमुपतस्थुः ते ब्राह्मणा वेदवादानुबन्धीनि वचां
सि राज्यमग्रजेन कर्तव्यमित्यर्थवंति तमूचुः असावपि देवापिर्वेदवादविरोधयुक्तिदूषितम

धृतेस्तवराप्सरसमुर्वशींदृष्ट्वानेनशुक्रंशरस्तंभेपपाततच्चद्विधागतमपत्यद्वयंकुमा
रःकन्यकाचाभवत् मृगयामुपगतःशंतनुर्दृष्ट्वाकृपयाजग्राह ततःसकुमारःकृपःक
न्याचकृपाश्वत्थाम्नोजननीकृपीद्रोणपत्न्यभवत् दिवोदासस्यमित्रयुःमित्रयोःच्यवनो
नामराजाच्यवनात् सुदासःसुदासात्सहदेवःतस्यापिसोमकःसोमकाज्जंतुःपुत्रशत
ज्येष्ठोभवत् तेषांयवीयान्पृषतःपृषताद्द्रुपदःतस्माद्धृष्टद्युम्नःततोधृष्टकेतुः अ
जमीढस्यान्योऋक्षनामापुत्रोभवत् ऋक्षात्संवरणःपुत्रोभवत्संवरणाच्चकुरुःयइदंध
र्मक्षेत्रंकुरुक्षेत्रंचकार सुधनुर्जन्हुःपरीक्षित्प्रमुखाःकुरोःपुत्राबभूवुः सुधनुषःपुत्रःसु
होत्रस्तस्माच्च्यवनःच्यवनात्कृतकःततश्चोपरिचरोवसुः बृहद्रथप्रत्यग्रकुशांब मा
वेल्लमत्स्यप्रमुखावसोःपुत्राःसप्तजायंत बृहद्रथात्कुशाग्रः कुशाग्राद्वृषभःवृषभात्
पुष्पवान् तस्मात्सत्यहितःतस्यापिसुधन्वातस्यचजंतुः बृहद्रथस्यान्यश्शकलद्वयज
न्माजरयासंधितोजरासंधनामातस्मात्सहदेवःसहदेवात्सोमापिःततश्श्रुतश्रवाइ
त्येतेमागधाभूभृतः ॥ इतिश्रीविष्णुपुराणेचतुर्थेंशेपाराशरीयायांसंहितायामे
कोनविंशतितमोध्यायः १९ श्रीपराशरः परीक्षितोजनमेजयश्रुतसेनोग्रसेनभीमसेना
दयश्चत्वारःपुत्राजन्होःतुसुरथोनामात्मजोबभूवुः तस्यचविदूरथःततस्सार्वभौमःसा

श्री
वि॰पु॰
१६४

तिनः पुत्राः रुचिराश्वपुत्रः पृथुसेनः पृथुसेनात्पारः पारान्नीपः तस्मान्नयनाततस्मात्कंभौमः
ततः पौरवः तस्मात्रुकाश्यः तस्यैकंशतंपुत्राणांतेषांप्रधानः काम्पिल्याधिपतिः समरः सम
रस्यापिपारसुपारसदश्वास्त्रयः पुत्राः पारात्पृथुः पृथोस्सुकृतिः सुकृतेर्विभ्राजः ततश्चाणु
होयः शुकदुहितरं कृत्वींनामोपयेमे अणुहाद्ब्रह्मदत्तः ततश्चविष्वक्सेनः विष्वक्सेनादु
दक्सेनः भल्लाटस्तस्यात्मजः द्विमीढस्य तु यवीनरसंज्ञः तस्यापिधृतिमान् तस्मात्सत्य
धृतिः ततश्चदृढनेमिः ततोजनमेजयः तस्मात्सुपार्श्वः ततश्चसुमतिः ततश्चसन्नति
मान् सन्नतिमतः कृतः पुत्रोभूत् यंहिरण्यनाभोयोगमध्यापयामास यश्चतुर्विंशतिः
प्राच्यसामगानांसंहिताश्चकार कृताच्चोग्रायुधोयेनप्राधान्येननीपक्षयः कृतः उग्रा
युधात्क्षेम्यः क्षेम्यात्सुधीरः तस्माद्रिपुंजयः तस्माच्चबहुरथः इत्येतेपौरवाः अजमीढ
स्यनलिनीनामपत्नीतस्यांनीलसंज्ञः पुत्रोभवत् तस्माच्छान्तिः ततः सुशान्तिः सुशां
तेः पुरुजानुः तस्माच्चऋक्षः ततश्चहर्यश्वोहर्यश्वान्मुद्गलः संजय बृहदिषुयवीनरकां
पिल्याः पंचानामेतेविषयाणांरक्षणायालमेतेमत्पुत्रा इतिपित्राभिहिताः पंचालाः मुद्ग
लाश्चमौद्गल्याः क्षत्रोपेताद्विजातयोबभूवुः मुद्गलाद्ब्रध्यश्वेतोदिवोदास अहल्याचमिथु
नमभूत् ॥ शरद्वस्याहल्यायांशतानन्दोभवत् शतानन्दात्सत्यधृतिर्धनुर्वेदान्तगोजज्ञेसस्य

तेऽत्यन्तं मावमंस्थाः शकुंतलाम् रेतोधाः पुत्रो नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भ
स्य सत्यमाह शकुंतला इति भरतस्य पत्नीत्रयान्नवपुत्रा बभूवुः नैते ममानुरूपा इत्यभि
हिताः तान्मातरो जघ्नुः परित्यागभयात् ततोऽस्य वितथे पुत्रजन्मनि पुत्रार्थिनो मरुत्सोम
याजिनो दीर्घतमसा पार्ष्ण्यपास्ताद्बृहस्पतिवीर्यादुतथ्यपत्न्यां ममतायां समुत्पन्नो भरद्वाजाख्यो
नाम पुत्रो मरुद्भिर्दत्तः अस्यापि निर्वचनश्लोकः पठ्यते मूढे भरद्वाजमिमं भरद्वाजं बृ
हस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं भरद्वाजस्तस्यैवं वितथे पुत्रजन्मनि
मरुद्भिर्दत्तस्ततो वितथसंज्ञामवाप वितथस्यापि मन्युः पुत्रोऽभूत् बृहत्क्षत्रमहावीर्यनर
गार्ग्यास्तु मन्युपुत्राः नरस्य संकृतिः संकृतेर्गुरुप्रीतिरन्तिदेवौ गर्गाच्छिनिस्ततश्च गार्ग्याः शै
न्याः क्षत्रोपेता द्विजातयो बभूवुः महावीर्याच्च दुरुक्षयो नाम पुत्रोऽभवत् तस्य त्रय्या
रुणिः पुष्करिणी कपिश्च पुत्रत्रयमभूत् तच्च पुत्रत्रितयमपि पश्चाद्विप्रतामुपजगाम बृ
हत्क्षत्रस्य सुहोत्रः सुहोत्राद्धस्ती य इदं हस्तिनपुरं निवेशयामास अजमीढद्विमीढपुरु
मीढास्त्रयो हस्तिनस्तनयाः अजमीढात् कंठः कंठान्मेधातिथिः यतः कंठायना
द्विजाः अजमीढस्यान्यः पुत्रो बृहदिषुस्तस्य बृहद्धनुः बृहद्धनुषो बृहत्कर्मा ततश्च ज
यद्रथस्तस्मादपि विश्वजित् ततः सेनजित् रुचिराश्वकाश्यदृढहनुवत्ससंज्ञास्तस्य सुत

रोमपादसंज्ञो यस्मात्पुत्रो दशरथः शान्तां नाम कन्यकामनपत्याय दुहितृत्वे युयोज रोमपा
दाच्चतुरंगस्तस्माच्च पृथुलाक्षस्ततश्चंपो यश्चंपां निवेशयामास चंपस्य हर्यंगो नामा
त्मजोभूत् हर्यंगाद्भद्ररथः ततो बृहद्रथः ततो बृहत्कर्मा बृहत्कर्मणश्च बृहद्भानुः तस्मा
च्च बृहन्मना बृहन्मनसो जयद्रथो जयद्रथाद्ब्रह्मक्षत्रान्तरालसंभूतायां पत्न्यां विजयं नाम
पुत्रमजीजनत् विजयश्च धृतिं पुत्रमवाप तस्यापि धृतव्रतः पुत्रोभूत् धृतव्रतात्सत्यकर्मा स
त्यकर्मणस्त्वधिरथो योसौ गंगातटे मंजूषागतं पृथापविद्धं कर्णं पुत्रमवाप कर्णाद्वृषसेनः
इत्येतेंगाः अतः परं पूरुवंशं श्रोतुमर्हसीति ॥ इति श्रीविष्णुपुराणे चतुर्थेंशे अष्टादशोध्याय
१८ श्रीपराशर उवाच पूरोर्जनमेजयः पुत्रस्तस्यापि प्रचिन्वान् प्रचिन्वतः प्रवीरस्ततो मनस्युः
मनस्योश्चाभयदः तस्यापि सुद्युः सुद्योर्बहुगवः तस्यापि संयातिस्ततोहंयाती रौद्राश्वः ऋतेयु
स्थंडिलेयु कक्षेयु सन्नेयु स्थण्डिलेयु कृतेयु जलेयु स्थलेयु धर्मेयु संनतेयु वनेयु नामानो
दश पुत्रा बभूवुः ऋतेयोरन्तिनारः पुत्रोभूद् अप्रतिरथमप्रतिरथः पुत्रमवाप अप्रतिर
थस्यापि कण्वः पुत्रोभूत्तस्यापि मेधातिथिः यतः कण्वायना द्विजा बभूवुः ऐलिनस्यापि
रैभ्यः ऐलिनाद्दुष्यन्तादयश्चत्वारः पुत्रा बभूवुः ऐलिनस्य दुष्यन्तात्चक्रवर्ती भरतो बभूवुः
यन्नामहेतुर्देवैः श्लोको गीयते मातानिभस्त्रा पितुः पुत्रो येन जातः स एव सः भार्यास्व पु·

कश्चितस्तवंशोवंशमवधारय तुर्वशोर्वह्निरात्मजोवह्नेर्भार्गोभार्गाद्भानुः ततस्त्रै-
शानुस्तस्माच्चकरंधमस्तस्यापिमरुत्तः सोनपत्योभवत् ततश्चपौरवंमववेशदुष्यंतं
सपुत्रमकल्पयदेवंययातिशापात्तद्वंशः पौरवमेववंशमाश्रितवानिति ॥ इतिश्री-
विष्णुपुराणेचतुर्थेंशेषोडशोध्यायः १६ पराशरउवाच द्रुह्योस्तुतनयोबभ्रुःबभ्रोःसे-
तुःसेतुपुत्रोआरद्वोनामआरद्वस्यात्मजोगांधारः गांधारस्यधर्मः धर्माद्धृतोधृताद्दुर्दमः
ततःप्रचेताः प्रचेतसःपुत्रशतधर्माबहुलेम्लेच्छानामुदीच्यानामाधिपत्यमकरोत्
इतिश्रीविष्णुपुराणेचतुर्थेंशेसप्तदशोध्यायः १७ पराशरउवाच ययातेश्चतुर्थस्यपुत्र-
स्यानोस्सभान - रचक्षुसंज्ञास्त्रयाःपुत्राबभूवुः सभानपुत्रःकलकःकालात्सृंजयः सृ-
जयात्पुरंजयः तस्माज्जनमेजयः तस्मान्महासालः तस्माच्चमहासालःतस्माच्चमहाम-
नास्तस्यापुत्रौउशीनरतितिक्षुद्वौपुत्रावुत्पन्नौउशीनरस्यापिशिबिनृगनवकृमिदर्वाख्याः
पंचपुत्राबभूवुः पृषदर्भसुवीरकैकेयमद्रकाश्चत्वारःशिबिपुत्राः तितिक्षोरपिरु-
शद्रथःपुत्रोभूत्तस्यापिहेमोहेमस्यसुतपाःसुतपसश्चबलिःयस्यक्षेत्रेदीर्घतमसा
अंगवंगकलिंगसुह्मपौंड्राख्यंबालेयंक्षत्रमजन्यत तन्नामसंततिसंज्ञाश्चपंचविषया
बभूवुः अंगात्स्यनपानस्तस्यात्मजोदिविरथनामातस्यापिधर्मरथस्ततश्चित्ररथस्तस्य

श्री
वि॰पु॰

न्लेोकेवनीवां षोडशसहस्राण्येकोत्तरशताधिकानिभार्याणामभवंस्तासांचरुक्मि
णीसत्यभामाजाम्बवतीप्रमुखाह्यष्टौपत्न्यःप्रधानाः तासुचावयवभूतानिलक्षंचपु॰
त्राणांभगवानखिलमूर्तिरनादिरजनयत् तेषांप्रद्युम्नचारुदेष्णसाम्बादयस्त्रयोद
शप्रधानाः प्रद्युम्नोपिरुक्मिणस्तनयांककुद्मिनींनामोपयेमेतस्यामप्यनिरुद्धोजज्ञे
अनिरुद्धोपिरुक्मिणएवपौत्रींसुभद्रांनामोपयेमेतस्यामस्यचवज्रोभवत् वज्रस्यच
प्रतिबाहुः तस्यापिसुचारुरेवमनेकशतसहस्रपुरुषसंख्यस्य यदुकुलस्यपुरुष
संख्यावर्षशतैरपिवक्तुंनशक्यते यतोहिश्लोकाविमावत्रचरितार्थौ तिस्रःकोटिसह
स्राणामष्टाशीतिशतानिच कुमाराणांगृहाचार्याश्चापयोगेषुयेरताः संख्यानं
यादवानांकःकरिष्यतिमहात्मनां यत्रायुतानामयुतलक्षेणास्तेसदाहुकः देवासुराहे
तायेतुदैतेयास्तेमहाबलाः तेउत्पन्नामनुष्येषुजनोपद्रवकारिणः तेषामुत्सादनार्थाय
भुविदेवायदोःकुले अवतीर्णाःकुलशतंयत्रैकाभ्यधिकंद्विज विष्णुस्तेषांप्रमाणेचप्रभुत्वे
चव्यवस्थितः निदेशस्थायिनस्तस्यववृधुःसर्वयादवाः इतिप्रसूतिंवृष्णीनांयःशृणोति
नरःसदा ससर्वैःपातकैर्मुक्तोविष्णुलोकंप्रपद्यते ॥ इतिश्रीविष्णुपुराणेब्राह्मेउपाराश
रीयायांसंहितायांचतुर्थेंशेपंचदशोध्यायः १५ श्रीपराशरउवाच इत्येषसमासतस्ते॰

वसुदेवस्यानकदुंदुभेः पौरवी रोहिणी मदिरा भद्रा देवकीप्रमुखा बह्व्यः पत्न्योभवन्
बलभद्रसारणशठदुर्मदादीन्पुत्रान्रोहिण्यामानकदुंदुभिरुत्पादयामास बलदेवो
पि रेवत्यां विशठोल्मुकौ पुत्रावजनयत् सार्ष्टिमार्ष्टिमद्रिशिशुसत्यधृतिप्रमुखाः भद्रात्म
जा भद्राश्वभद्रबाहुदुर्मदभूताद्या रोहिण्याः कुलजा नंदोपनंदकृतकाद्या मदिराया
स्तनयाः भद्रायाश्चोपनिधिगदाद्या वैशाल्यां च कौशिकमेकमजनयत् आनकदुंदु
भेर्देवक्यामपि कीर्तिमत्सुषेणोदायिभद्रसेन ऋजुदासभद्रदेवाख्याः षट्पुत्रा ज
ज्ञिरे तांश्च सर्वानेव कंसो घातितवान् अनंतरं च सप्तमं गर्भमर्धरात्रे भगवत्प्रहिता योगनि
द्रा रोहिण्या जठरमवकृष्य नीतवती कर्षणाच्चासावपि संकर्षणाख्यामगमत् त
तश्च सकलजगन्महातरुमूलभूतो भूतभविष्यदादिसकलसुरासुरमुनिजन
मनसामप्यगोचरोऽब्जभवप्रमुखैः प्रणम्यावनिभारहरणाय प्रसादितो भगवान
नादिमध्यो देवकीगर्भमवततार वासुदेवः तत्प्रसादविवर्धितमहिमा च योगनि
द्रा नंदगोपपत्न्या यशोदाया गर्भमधिष्ठितवती प्रसन्नादित्यचंद्रादिग्रहमव्याला
दिभयं स्वस्थमानसमखिलमेवैतज्जगदपास्ताधर्ममभवत्तस्मिंश्च पुंडरीकनयने
जायमाने जातेनाखिलमेवैतत्सन्मार्गवर्ति जगदक्रियत भगवतोप्यत्र म

हिनिधने परमब्रह्मभूते भगवत्यनालंब[illegible] मनसो ननत्वयंर्त्थानन्नेषणं गणयाथी
ननयाजानकं समसक्तवेनमोदावारं [illegible] रिणः नष्टपदर्शनमेवासीत्तायमच्युतइ
त्यासक्तिः श्रुविमर्दनः कर्णाभ्यामानुषक्त्या [illegible] नैव केवलमनयाय पुनरच्युत विनिपा
तमात्रफलमखिलभूमंडलश्लाघ्यनाम[illegible] जन्मान्तरे[illegible] शिशुपालेनैवा
प्त तत्र नाखिलानामेव भगवन्नाम्नां कार्यकारणा[illegible] कृतनानामशेषा
णामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्धितं विद्वेषानुबंधिचित्तेनाभिहितं नमनज
नादिषूच्चारणमकुर्वन् तत्त्वरूपमुत्फुल्लपद्मदलामलाक्षमुज्ज्वलपीतवस्त्रधारिणम
लकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशंखचक्रगदापद्मधरमतिप्र
रूढवैरानुभवादटनभोजनस्नानासनशयनादिष्वशेषावस्थान्तरेष्वनन्यचेतसा
[illegible] मेवाक्रोशेषूच्चारयन् [illegible] भगवन्तं [illegible] मालोक्य
[illegible] स्वरूपपरमुज्ज्वलं पापमपगतद्वेषादिदोषो भगवन्तमद्राक्षीत् नावद्भ
गवतश्चक्रेणांशुमालोज्ज्वलेन [illegible] तत्क्षणाद्दग्धाखिलाघसंचयो भगवतान्तं नीतस्तेन
नः तस्मिन्नेव लयं गतः एतत्तवाखिलं मयाभिहितं अयं हि भगवान् कीर्तितः संस्मृत
श्च द्वेषानुबंधेनाप्यखिलसुरासुरादिदुर्लभं फलं प्रयच्छति किमुत सम्यग्भक्तिमतां

लोकेश्वरप्रभावोदशाननोभवत् बहुकालोपभुक्तभगवत्प्रसादाशेषशरीरपातोद्भव
पुण्यफलोभगवतैवराघवरूपिणासोपिनिधनमुपपादितः चेदिराजस्यदमघोषस्यात्मजः
शिशुपालनामाभवत् शिशुपालत्वेपिभगवतोभूभारावतारणायावतीर्णांशस्यपुंडरी
कनयनाख्यस्योपरिद्वेषानुबन्धमतितरांचकारभगवताचनिधनमुपनीतः तत्रैवपर
मात्मभूतेमनसएकाग्रतयासायुज्यमवाप भगवान्हिप्रसन्नोयथाभिलषितंददा
त्यप्रसन्नोपिनिघ्नन्दिव्यमनुपमंस्थानंप्रयच्छतीति ॥ इतिश्रीविष्णुपुराणे[illegible]पा
राशरीयायांसंहितायांचतुर्थेंशेचतुर्दशोध्यायः १४ श्रीमैत्रेयउवाच हिरण्यकशिपु
त्वेचरावणत्वेचविष्णुना अवापनिहतोभोगानप्राप्यानमरैरपि नलयंतत्रतेनैवनिहतः
सकथंपुनः संप्राप्तःशिशुपालत्वेसायुज्यंशाश्वतेहरौ एतदिच्छाम्यहंश्रोतुंसर्वधर्मभृ
तांवर कौतूहलपरस्यैतन्मेवक्तुमिहार्हसि श्रीपराशरउवाच दैत्येश्वरस्यवधा
याखिललोकोत्पत्तिस्थितिविनाशकारिणापूर्वंतनुग्रहणंकुर्वतानृसिंहरूपमावि
ष्कृतंतत्रचहिरण्यकशिपोस्सर्वंविष्णुरयमित्येतन्नमनस्यभूत् निरतिशयपुण्यसमुद्भू
तमेतत्सत्वजातमितिरजोद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात्ततोवाप्तवधहेतुकांनिर
तिशयामेवाखिलत्रैलोक्याधिकधारिणींदशाननत्वेभोगसंपदमवाप सतुतस्मिन्नना

श्री
वि॰पु॰
२६

शूरस्य मारिषानामपत्न्यभवत्तस्यांचासौदशपुत्रानजनयत् वसुदेवपूर्वान्वसुदेवस्यजात
मात्रस्यैवतद्गृहे भगवदंशावतारंदिव्यदृष्ट्यापश्यद्भिर्देवैर्दिव्यानकदुंदुभयश्चवादि
तास्ततोसावानकदुंदुभिसंज्ञामवाप तस्यचदेवभागदेवश्रववृहत्ककक्रंथकवत्सकवा
रुकसृंजकश्यामशमीकगंडूषसंज्ञानवभ्रातरोभवन् पृथाश्रुतदेवाश्रुतकीर्तिःश्रु
तश्रवाराजाधिदेवीचवसुदेवादीनांपंचभगिन्योभवन् शूरस्यकुंतिर्नामसखाभवत्तस्मै
चापुत्रायपृथामात्मजांविधिनाशूरोदत्तवान् तांचपांडुरुवाह तस्यांचधर्मानिलशक्रे
भ्यः युधिष्ठिरभीमसेनार्जुनाख्यास्त्रयःपुत्राःसमुत्पादिताः पूर्वमनूढायाःभगवताभा
स्वताकानीनःकर्णोनामपुत्रोजन्यत तस्याश्चसपत्नीमाद्रीनामाभूत्तांनासत्यदस्राभ्यां
नकुलसहदेवौपांडोःपुत्रौजनितौ श्रुतदेवांतुवृद्धधर्मानामकारूषउपये
मेतस्यांदंतवक्रोनाममहासुरोजज्ञे श्रुतकीर्तिमपिकेकयराजउपयेमे तस्यांसंत
र्दनादयःकैकयाःपंचबभूवुः राजाधिदेव्यामावन्त्यौविंदानुविंदौजज्ञाते श्रुतश्रवा
मपिचेदिराजोदमघोषनामाउपयेमेतस्यांसशिशुपालमुत्पादयामाससहिपूर्वम
प्युदारविक्रमोदैत्यानामादिपुरुषोहिरण्यकशिपुरभूत् यश्चभगवतासकल
लोकगुरुणाघातितः पुनरपिअक्षिणवीर्यशौर्यसंपत्पराक्रमगुणसमाक्रांतसकलत्रै

युधाननामा तस्मात्संजयस्तत्पुत्रः कुणिः कुणेर्युगंधरः इत्येते शैनेयाः अनमित्र-
स्यान्वये वृष्णिः तस्माच्छ्वफल्कः तत्प्रभावः कथित एव श्वफल्कस्यान्यः कनीयांश्चित्र-
को नाम भ्राता श्वफल्कादक्रूरो गान्दिन्यामभवत् ततोमद्गुः मद्गोर्मृदरमृदुर्विश्वा-
मेजयगिरिक्षत्रोपक्षत्रशतघ्नारिमर्दनधर्मभृग्दृष्टधर्मगंधमोजवाहप्रतिवा-
हाख्याः पुत्राः सुताराख्या च कन्या देववानुपदेवश्चाक्रूरपुत्रौ पृथुविपृथुप्रमुखाः चित्रक-
स्य पुत्रा बहवो बभूवुः कुकुरभजमानशुचिकंबलबर्हिषाख्यास्तथांधकस्य चत्वा-
रः पुत्राः कुकुराद्धृष्णिः तस्माच्च कपोतरोमा ततो विलोमा तस्मादपि तुम्बुरुसखो-
भवत्संज्ञश्चंदनोदकदुंदुभिः ततश्चाभिजित् ततः पुनर्वसुस्तस्य ततस्त्रिरथस्तस्याप्या-
हुकः पुत्रश्चाहुकी च कन्या आहुकस्य देवकोग्रसेनौ द्वौ पुत्रौ देवकस्योपदेवव-
सुदेवदेवरक्षिता देवा शांतिदेवा सहदेवा देवकी च सप्त भगिन्यः ताश्च सर्वा ए-
व वसुदेव उपयेमे ॥ उग्रसेनस्यापि कंसन्यग्रोधसुनामानकाह्वशंकुसुभूमिराष्ट्रपालयु-
द्धतुष्टिमत्संज्ञाः पुत्राः कंसाकंसवतीसुतनूराष्ट्रपालीकंकाह्वाश्चोग्रसेनतनुजाः भज-
मानाच्च विदूरथः पुत्रोभवत् विदूरथाच्छूरः शूराच्छमी शमिनः प्रतिक्षत्रः तस्मात्स्वयंभो-
जस्ततश्च हृदिकः तस्यापि कृतवर्मशतधनुर्देवार्हाख्याः पुत्रा बभूवुः देवमीढस्यापि-

श्री
वि·पु·
१५५

र्याः पितृधनमित्यतीवच सत्यभामापिस्पृहयांचकार बलसत्यावलोकनात्कृष्णोप्या-
त्मानंगोचक्रांतरावस्थितमिवमेने सकलयादवसमक्षंचाक्रूरमाह एतद्धिमहारत्न
मात्मशोधनायैतेषांयदूनांमयादर्शितमेतच्चममबलभद्रस्यचसामान्यं पितृधनंचैत-
त्सत्यभामायानान्यस्यैतच्चसर्वकालंशुचिनाब्रह्मचर्यगुणवताध्रियमाणमशेषरा
ष्ट्रस्योपकारकमशुचिनाध्रियमाणमाधारमेवहंत्यतोहमस्यषो शस्त्रीसहस्रप
रिग्रहादसमर्थोधारणे कथंचैतत्सत्यभामास्वीकरोतु आर्यबलभद्रेणापिमदिरापाना-
द्यशेषोपभोगपरित्यागःकार्यः तदयंयदुलोकोहंबलभद्रश्चत्वांदानपतेप्रार्थयामः
एतद्भवानेवधारयितुंसमर्थः उद्धृतंचास्यराष्ट्रस्योपकारकंतद्भवानशेषराष्ट्रनिमि
त्तमेतत्पूर्ववद्धारयत्वन्यन्नवक्तव्यमित्युक्तोदानपतिस्तथेत्याह जग्राहचतन्महारत्नं
ततःप्रभृत्यक्रूरःप्रकटेनैवतेनातिजाज्वल्यमानेनात्मकंठासक्तेनादित्यइवांशुमा
लीचचार इत्येतद्भगवतोमिथ्याभिशस्तिक्षालनंयःस्मरतिनतस्यकदाचिदल्पापि
मिथ्याभिशस्तिर्भवत्यव्याहतेंद्रियश्चाखिलपापमोक्षमवाप्नोति ॥ इतिश्रीविष्णुपु-
राणेब्राह्मांडेपाराशरीयायांसंहितायांचतुर्थेंशेत्रयोदशोध्यायः ॥१३॥ श्रीपराशरउवा
च अनमित्रस्यसुतःशिनिर्नामाभवत्तस्यापिसत्यकःसत्यकात्सात्यकिःतस्ययु-

भूतस्य मेस्कारंरत्नं भवनस्य समर्पितं नन्दीश्वराष्ट्रोपकारकं भवनस्य काशे तिष्ठति
तिष्ठतु सर्वेषु ववर्यं तन्नुभावफलभुजः किं तेष वल्लभद्रोस्मानाशां किं नवान् तदस्य
प्रीतये दर्शये त्वामिहेति समचिंतयत् किमत्रानुष्ठेयमस्य याचेद्दवी स्मर्ह नकेवला
स्वरत्नं निरीयाननमविष्ठितो रत्नमेनेदस्यैतीति .... अथ नमोविलजगत्का-
रणभूतेनाथाय णामहाकुरः एतन्स्य मंनकं रत्नं शालयन्नुधामसमर्पितं मयगतेचत
स्मिन्नुघस्वः परस्त्रीवाभवान्याशिष्यनी स्मेनावेतकालमतिक्रम्यणाधारयन्नस्य चयार
णाक्के शेनाहमशोषभोगेषु संगिमानसोनवे स्मि स्वस्य स्वकलामनावन्मानमपणे ·
षराष्ट्रोपकारिधारयितुं न शक्नोतीति सा भगवन्नस्य तदस्यादिना नवोदितवाल
दिदं समंतकरत्नं गृहाणा मिक्षयायस्याभिमतं तत्स्य समर्पितां ततः सोवरवृत्तानिमो
पितानिलघुकनकसमुद्गकं प्रकटीकृतवान् ततस्तनिष्कं मस्यमंतकमणिं निस्मि
न्नुइसमाजेमुमोच मकमात्रेणा च नेनानि कांत्यानरं विलमास्थानमुर्घोतितमा
हचाकुरस्य पद्मगतिर्यश्शालयन्नपास्माकं समर्पितो यस्यायं स्वयं नेगृहाणातिति
नमालोका सर्वेयादवानां साधुसाधिस्मातिविस्मितमनसां वाश्रुयंत नमालोक्या
तीववल्लभद्रोममायं यदद्युनैनैवसामान्यः समन्विष्टितः इति कृतनस्पृहोभूत् सर्वे

श्री॰
वि॰पु॰
१५६

नाकालेनजातानानन्तरमस्याः पिता गांदिनीतिनामचकार तांचगांदिनींकन्यांश्वफल्का
योपकारिणेगृहमागतायार्घभूतांप्रादात् तस्यामयमक्रूरः श्वफल्काज्जज्ञे तदेव
वंगुणान्मिथुनादुत्पत्तिः कथमस्मिन्नपक्रांतेचास्माभिर्भवतांमरणाद्युपद्रवानभविष्यंति न
दयमानीयतामलमतिगुणवत्यपराधान्वेषणेनेति यदुवृद्धस्यांधकस्यैतद्वचनमा
कर्ण्यकेशवोग्रसेनबलभद्रपुरोगमैर्यदुभिः कृतापराधतितिक्षुभिरभयंदत्वा श्वा
फल्किःस्वपुरमानीतः तत्रचागतमात्रएवतस्यस्यमंतकस्यप्रभावादनावृष्टिमरकदु
र्भिक्षव्यालाद्युपद्रवोपशमाबभूवुः कृष्णश्चिंतयामास स्वल्पमेतत्कारणंयदयंगांदि
न्यांश्वफल्केनाक्रूरोजनितः सुमहांश्चायमनावृष्टिदुर्भिक्षमारकाद्युपद्रवप्रतिषेध
कारीप्रभावः तन्नूनमस्यसकाशेसमहामणिःस्यमंतकाख्यस्तिष्ठतितस्यह्येवंविधाः
प्रकाराः श्रूयंतेअयमपिचयज्ञादनंतरमन्यत्क्रत्वंतरंचतस्मादन्यद्यज्ञांतरं यजतीत्य
ल्पोपादानंचास्यसंशयमसौमणिस्तिष्ठतीति कृताध्यवसायोन्यप्रयोजनमुद्दि
श्यसकलयादवसमाजमात्मगृहएवाचीकरत् तत्रचोपविष्टेष्वखिलेषुपूर्वंप्रयोज
नमनुपन्यस्यपर्यवसितेचतस्मिन्प्रसंगांतरपरिहासकथामक्रूरेणसहकृत्वाज
नार्दनस्तमक्रूरमाह दानपतेजानीमएववयंयथाशतधन्वानमखिलजगत्सार

रकामानीतः अक्रूरोप्युत्तमसमागमं संभूतस्तवर्णोनवकर्नेषु तेययाज सवनगतो हित
त्रयवैरेषो नत्रजावल्लहाभवः ॥ विप्रकारे दोत्कृष्ठः प्रविष्टप्रेवेनसो हिषाष्टि
वधाशेषं नन्माश्रिप्रभावान्नोपसर्गामरुङ्गमितादिकंनाभूदक्रूरपत्नीयेभोजेःशत्रु
घ्नस्मान्ननस्यप्रपौत्रेयापादिनेभोजेस्महाक्रूरोहारकामपद्ययापक्रांतः नदपक्रांतादि
नादारभ्यतत्रोपसर्गाव्यालाघनाद्दृष्टिमरणाद्युपद्रवावभूवुः अथयादवबलभद्रोग्र
सेनसमवेतोमंत्रयत् भगवानुग्रसारिकतनः किंयदिदमेकदैवप्रचुरोपद्रवागमन
मनदालोच्यतामितुक्ते न्यकनामार्यवृद्धः प्राह अस्याक्रूरस्यपिताश्वफल्कोयत्रयत्रा
भूत्तत्रदुर्भिक्षमनादृष्ट्यादिकंवानाभूत् काशिराजस्यविषयेत्वनावृष्ट्यांश्वफल्कोनी
यतततस्तत्क्षणाद्देवदेवोववर्ष काशिराजपत्न्याश्चगर्भेकन्यापूर्वमासीत्साचपूर्णे
पिप्रसूतिकालेनवैनिश्चक्राम एवंचतस्यगर्भस्यद्वादशवर्षाण्यपिनिष्क्रामतोययुः
काशिराजाश्चतामात्मजांगर्भस्थामाह पुत्रिकस्मान्नजायसे निष्क्रम्यतामास्यंतेद्रष्टु
मिच्छाम्येतांचमातरंकिमर्थंचिरंक्लेशयसीत्युक्तागर्भस्थैवव्याजहार यद्येकैकांगां
दिनेदिनेब्राह्मणेभ्यः प्रयच्छसितदहमन्यैस्त्रिभिर्वर्षैरस्मात्गर्भान्नावश्यंनिष्क्र
मिष्यामीति एतद्वचनमाकर्ण्यराजादिनेदिनेब्राह्मणायगांप्रदात् सापितावत

श्री
वि.पु.
१५१

त्यमाना मिथिलावनोद्देशे प्राणानुत्ससर्ज शतधनुरपि तं परित्यज्य पदातिरेवाभवत् कृ
ष्णोपि बलभद्रमाह तावदत्र स्यंदने भवता वस्थेयं यावदहमेनमधमाचारं पदातिरेव
पदातिनमनुगम्य घातयामि अत्र हि भूभागे दृष्टदोषा हयाः मयानो नेश्वा भवता
मे भूमिभागमुल्लंघनीयाः तथेत्युक्त्वा बलभद्रो रथ एव तस्थौ कृष्णोपि द्विक्रोशमात्रं
भूमिभागमनुसृत्य दूरस्थितस्यैव चक्रं क्षिप्त्वा शतधनुषः शिरश्चिच्छेद तच्छरीरेवा
दिषु च बहुप्रकारमन्विष्यन्नपि स्यमंतकं नावाप यदाननो पुनश्च बलभद्रमाह वृथै
वायमस्माभिर्घातितः शतधनुः न प्राप्तमखिलजगत्सारभूतं तन्महारत्नं स्यमंतकाख्य
मित्याकर्ण्योद्भूतकोपो बलदेवो वासुदेवमाह धिक्त्वां यस्त्वमेवमर्थलिप्सुरेतच्च ते
भ्रातृत्वान्मर्षयेन तदयं पंथाः स्वेच्छया गम्यतां न मे द्वारकया न त्वया न चाशेषबंधुभिः
कार्यम् अलममेभिर्ममाग्रतो लीकशपथैरित्याक्षिप्य तत्कथंचित्प्रसाद्यमानोपि न तस्थौ
विदेहपुरीं प्रविवेश जनकराजश्चार्घपूर्वकमेनं गृहं प्रवेशयामास तत्रैव च तस्थौ
वासुदेवोपि द्वारकामाजगाम यावच्च जनकगृहे बलभद्रोवतस्थे तावद्धार्तराष्ट्रो दु
र्योधनस्तत्सकाशाद्गदाशिक्षामशिक्षत वर्षत्रयांते च बभ्रु उग्रसेनप्रभृतिभिर्यादवैः
न तद्रत्नं कृष्णेनापहृतमिति कृतमतिभिर्विदेहपुरीं गत्वा बलदेवः संप्रत्याय्य द्वा

प्राह स्म यथा गतं स्वसैन्यमटव्यां स॥ पानिजैर्वान सत्त्वानि नो॥ पुनश्चानयन्वनानि यत्नं प्राणि
नस्तु भयविनाशार्थं समाणि रत्न म॥ वाभ्यां सामान्यं भविष्यति निरुद्विग्ना रूपलनांरण्यः शान
यन्वनि यनापोषयं कुर्विण्भिर्हिन स्त्येनि सो ण्यन्निष्किनवान्॥ कृनोद्योगोचनाद्युपल
भ्य शानयन्ना कृनव मेला स्वशारणं जनानाम सोभ्याह॥ बलभद्र वासुदेवाभ्यां सह विरोधाद्याल
मिन्युक्त स्याकु समचोदयन्॥ श्रमावणाह॥ न हि किंचिद्गावन्नापाद प्रहान परिकल्पिन॥
जेगात्रयेण स्वरपर वनिनावेधव्यकाशिला प्रवर्षि पुरुषाद्युपनिहनचकेन च किरणमद
मुदितनयनावलोकितानि वनविशालनेनानि गुरुवैरिवारिणा॥ कर्मेणानिकूनमहि
मारुसीरिणसीरिणा च सह सकलजगाद्वेगानां मम रवराणामपि योद्धुं समर्थः किम्
नाहं॥ न दस्युनःशरणमभिलष्यतो॥ इत्युक्तश्चानयन्ना स्वाह यद्यस्मिन्नरिवाणा समर्थे
भवानात्मानमवगच्छति न दयमस्य॥ स्तलावच्याणि॥ संगृह्य लक्ष्यतामेव स्वजनसोण्य
ह॥ यच्यस्थेनयाम ण्यवस्यायानक स्यविद्भवानक्श्यपिष्यतीति॥ नटकृमेनेगृहीषामि
नयेन केचाकुरस्तनाणि रत्नेनगाह स्वशानयनृरण्यन्तलवेगाशानयोजनवाहिनी वड
वामारूह्यापक्रान्तः॥ सेन्यकृग्रीवमेघपुष्पवलाहकाश्वचतुष्टययुक्तरथावस्थितोऽथ
बलदेववासुदेवौ नमन्प्रयातौ सावदुवायोजनशान प्रमाणमार्गमतीतावपुनरपिवा

नमेत्रासः सोस्तनो सत्यभामां भगवानेभार्यां दत्तौ नौ चाक्रूरकृतवर्मशतधनुःप्रमुखायादव
प्रावरयांबभूवुः ततस्तत्प्रदानादवज्ञातमिवात्मानं मन्यमानाः सत्राजिते वैरानुबंधं चक्रुः
अक्रूरकृतवर्मप्रमुखाः शतधन्वानमूचुः अयमतीव दुरात्मा सत्राजितो योस्माभिर्भवता च प्रा
र्थितोप्यात्मजामस्मान्भवन्तं चाविगणय्य कृष्णाय दत्तवान् तदलमनेनास्य जीवता घातयित्वै
नं तन्महारत्नं त्वया किं न गृह्यते वयमभ्युपपत्स्यामो यद्यच्युतस्तवोपरि वैरानुबंध
करिष्यतीत्येवमुक्तस्तथेत्यसावप्याह जतुगृहदग्धानां च पाण्डुतनयानां विदितपरमा
र्थोपि भगवान्दुर्योधनप्रयत्नशैथिल्यार्थं तुल्यकरणाय वारणावतंगतः गते च त
स्मिन्सुप्तमेव सत्राजितं शतधनुर्जघान मणिरत्नं चाददात् पितृवधामर्षपूर्णा च
सत्यभामा शीघ्रं स्यंदनमारूढा वारणावतं गत्वा भगवन्तमाह प्रतिपादितेत्यक्षांतिमता शतध
न्वनास्मत्पिता व्यापादितः तच्च स्यमंतकमणिरत्नमपहृतं तदिदं यस्यावभास
नादालोच्य यद्युक्तं तत्क्रियतामिति कृष्णमाह तया चैवमुक्तः परितुष्टान्तःकरणो
पि कृष्णः सत्यभामाममर्षताम्रलोचनः प्राह सत्ये ममैषावहासना नाहमेतां तस्य दु
रात्मनः सहिष्ये न ह्युल्लंघ्य वनपादपं तन्नीडाश्रयिणो विहंगा वध्यन्ते तदलमत्यर्थं म
स्मत्पुरतः शोकप्रेरितवाक्यपरिकरेणेत्युक्त्वा द्वारकामभ्येत्यैकान्ते बलदेवं वासुदेवः

नाकुम्भानस्मानिनि ष्ठुरपादप्रहारपारिपीडिनाविलावयवमनिराहारतयाचवलः
हानिरभूद्भगवतावजिनचर्यांभवाद्गृणिपन्यबाजहारश्रमरसरगाथवायवलाद्
मादिभिरपराविले भगवान्नयाजेनैशाकः किम्मनावनिगोविरचवैरल्पवीयैर्न
वैनेयावयवभूतेश्चनिर्यंगपोन्यन्नसमानिभिः किंपुनरस्माद्दिपैरवशंपभवतास्मात्त्वामि
नानायायणेनसमेलचपुसकलजगतत्रायणासंशेनभगवताभाविनश्चामिन्नकस्त
स्येमभगवानवनिभावनारमाविमाचवन्तेग्रीमाभ्यंजिनकरनलस्पर्शेनैनचैन
मपगतयुद्धविदचकारपाचप्रतिपद्येनपुनरपिश्रमायजावलीनामकन्यागृहा
गताम्रदेभूतोग्राह्यामसस्मेनकमाणिमपिप्राणिपन्यनसमपूर्दहावच्छुनोपिग्र
तिप्रणतानस्मादग्राह्यमपिनन्माणिवत्नैसंशोधनायजग्राहजावबन्याचह्वारि
कामाजगामभगवद्दीयमनोक्ष्नह्रषीन्कध्रस्पद्धारकवासिजनस्यक्रमावलोक
नान्नत्वणमेवातिपरिणनवयसोपिनवयोवनमिवाभवत्तदिष्याद्दिष्टानिसक
लयादवाःस्त्रियश्चसमाजयामासभगवानपियथाभूतमशोषयादवसमाजस्य
यावदाचवहनसमनकेचसत्वाजिनायदानाभिश्याभिशाक्तिश्छदिमवापन्नाव
वतीशानःपुरानिवेशयामससत्वाजिनोपिमयासाभूतमतमारोपितरनि जा

श्री
वि॰पु॰
१५५

वसिंहपददर्शनेनकृतपरिशुद्धिःसिंहपदमनुसारऋक्षपतिनिहतंचसिंहमपश्यत्॥
भूमिभागेहस्तानन्तरंचरत्नगौरवादृक्षस्यापिपदान्यनुययौगिरितटेचसकलमे॥
वतद्यदुसैन्यमवस्थाप्यतत्पदानुसारीऋक्षबिलंप्रविवेशअर्धप्रविष्टश्चधात्र्याःसुकु
मारमुल्लापयन्त्यावाणींशुश्राव। सिंहःप्रसेनमवधीत्सिंहोजाम्बवताहतःसुकुमा
ररोदीस्तवह्येषस्यमन्तकःइत्याकर्ण्यचलब्धस्यमन्तकोन्तःप्रविष्टःकुमारक्रीडन॥
केचधात्र्याहस्तेतेजोभिर्जाज्वल्यमानंस्यामन्तकंददर्श तंचस्यमन्तकाभिलाष
चक्षुषमपूर्वपुरुषमागतमवेक्ष्यधात्रीत्राहित्राहीतिव्याजहार तदार्तिश्रवणान॥
तरंचामर्षपूर्णहृदयःसजाम्बवानाजगामतयोश्चपरस्परंयुद्धामर्षयोर्युद्धमेक॥
विंशतिदिनान्यभवत्तेचयदुसैनिकास्तत्रसप्ताष्टदिनानितन्निष्क्रान्तिमुदीक्षमा
णास्तस्थुःअनिष्क्रमणेचमधुरिपोरसाववश्यमत्रबिलेत्यन्तंनाशमवाप्तोभ
विष्यत्यन्यथातस्यजीवतःकथमेतावन्तिदिनानिशत्रुजयेव्याक्षेपोभवतीतिव्यव
सायाद्वारकामागम्यहतःकृष्णइतिकथयामासुःतद्बान्धवाश्चतत्कालोचितम
खिलमुपरतक्रियाकलापंचक्रुःततश्चास्ययुध्यमानस्यातिश्रद्धादत्तविशिष्टपात्रो
पयुक्तान्नतोयादिनाकृष्णस्यबलप्राणपुष्टिरभूत्इतरस्यानुदिनमतिगुरुपुरुष॥

न्यादित्य इत्याकर्ण्य प्रद्युम्नवचनानि ह भगवान्नेमिनाथमादित्यः सत्राजितो यमादित्यः इंद्रस्य
मेनकाख्येन महामणिं विश्वदत्तोपयानि नदेवं विस्तरोपशमनइन्द्रकालेयपृथुः सर्वनेम
मेनकं महामणिमानमानि विधानेन चके प्रतिदिन सुवर्णं मणिरत्नप्रवरसहस्रैकनक-
भारान् दद्याति तन्मभावात्सकलसैन्येव चाद्भुतोपसर्गाश्चाहृष्टिव्यालाग्निलयोद्भवा भीतादि-
भयं न भवत्यत्पुनोऽपि न इत्यलं मुग्रसेन सभूपतेर्योग्यमेनदिति लिप्सां चक्रे गोत्रभेदभ-
याद्धकोऽपि न जहार सत्राजितोऽप्यत्युनोमामेन याचित्पुनीत्यवगाननत्वलोभः स्वभ्रा
त्रे प्रसेनाय न इत्यलं मदत्तननं प्युस्तुविनाश्रयमानं मणोषमेव सव्वतिस्य वाधिकंगुणं
तज सत्राटयन्त्यथा आपारमेवहत्तीत्यसावपि प्रसेनः कंठसकेन नेनाप्रियसुमं
नकेनाश्वमारुह्य मृगयायां मृगाक्रान्तसिंहाद्धयमवाप सापश्वं वनेनिहत्य सिंहोप्यमले
मणिरत्नमास्यागृणदा याग्गकान्त सिंहः स्वक्ताधिपेन जाम्बवता हतानिनः सोऽपि नम-
णिमादाय स्वविलं प्रविवेश सकुमाराय सजाताय बालाय ददौ तेन वान् भगनाभाकांनि प्रसेनेह-
लो मणिरत्नमभिलषितेन वासुदेवेन चप्रासवान्नूनमेन दस्यकर्मइत्याविलपवयद्लोकंप
रस्परं कर्णाकर्णि कथयन् विदितं लोकापवादं ज्ञात्वा भगवान्सह सैन्यपरीवारः प्रसेन-
स्य पदवीमनुसमार ददर्श चाश्वसमेतं प्रसेनं सिंहेन विनिहितं मणिरहितजनपदमध्ये

यथासन्नयोन्तिकात् ॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ पुरुषाः षट्च षष्टिश्च
षट्सहस्राणि चाष्टच ॥ तेऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ महाभोजस्त्वतिधर्म्मात्मा तस्या
न्वये भोजमार्त्तिकावता बभूवुः वृष्णेः सुमित्रो युधाजिच्च पुत्रावभवतां ततस्तु सुमित्रादनमित्र
स्तथानमित्रान्निघ्नो निघ्नस्य प्रसेनसत्राजितौ तस्य च सत्राजितो भगवानादित्यः सखा
भवदेकदा त्वम्भोधितीरसंश्रयः सूर्यं सत्राजित्तुष्टाव तन्मनस्कतया भास्वानभिष्टूय
मानोग्रतस्तस्थौ ततस्त्वस्पष्टमूर्त्तिधरं चैनमालोक्य सत्राजितः सूर्यमाह यथैव व्योम्नि
वह्निपिण्डोपमं त्वामहमपश्यं तथैवाद्याग्रतो गतमप्यत्र न किंचिद्भगवत्प्रसादीकृतं विशे
षमुपलक्षयामीत्येवमुक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तकं नाम महामणिर
वमवतार्य एकान्ते न्यस्तः ततस्तमाताम्रमुज्ज्वलं ह्रस्ववपुषमीषदापिङ्गलनयनमादित्यमद्रा
क्षीत् कृतप्रणिपातस्तवादिकं च सत्राजितमाह भगवान्वरमस्मत्तोभिमतं वृणीष्वे
ति स च तदेव मणिरत्नमयाचत स चापि तस्मै तद्दत्वा वियति स्वधिष्ण्यमारुरोह सत्रा
जितोप्यमलमणिरत्नसनाथकण्ठतया सूर्य इव तेजोभिरशेषदिगन्तराण्युद्भासयन्द्वा
रकां विवेश द्वारकावासिजनस्तु तमायान्तमवेक्ष्य भगवन्तमादिपुरुषोत्तममवनि
भारावतारणायांशेन मानुषरूपधारिणं प्रणिपत्याह भगवन्भगवन्तं नूनं द्रष्टुमाया

कस्याश्चिन्नमुद्वहामानयेत्याह । शैब्या च तां तामहाधिष्ठानमनेनरं चाविमुत्रलगृहो
रोगकाश्चयवाङ्कितनपुत्रजन्मालापगुणवत्सुप्रशः परिणाममुपगता असौ अपि तस्यां
विदर्भाभिधानं समवाप कालेन च कुमारमजीजनत् तस्य च विदर्भ इति पिता नाम चक्रे स
च तां स्नुषामुपयेमे तस्यां चासौ क्रथकैशिकौ पुत्रावजनयत् पुनश्च तृतीयं रोमपादसं
ज्ञं कुमारमजीजनत् रोमपादाद्बभ्रुः बभ्रोः धृतिः कौशिकस्यापि चेदिः पुत्रोऽभूत्
यस्य संततौ चैद्या भूपालाः क्रथस्य स्नुषापुत्रः कुन्तिरभवत् कुन्तेर्धृष्टिः धृष्टेर्निधृतिः नि
धृतेर्दशार्हः ततश्च व्योमः तस्मादपि जीमूतः ततो विकृतिः ततो भीमरथस्तस्मान्नव
रथस्तस्यापि दशरथः ततः शकुनिः तत्तनयः करम्भिः करम्भेर्देवरातोऽभवत् तस्माद्देव
क्षत्रो देवक्षत्रस्यापि मधुर्मधोः कुरुवंशस्ततोऽनुः ततः पुरुहोत्रः ततश्चांशुः ततश्च
सत्वतः इत्येतां ज्यामघस्य संततिं श्रद्धासमन्वितः शृण्वन्सर्वपापैः प्रमुच्यते इति ॥ इति श्री
विष्णुपुराणे श्रीमत्पराशरीयायां संहितायां चतुर्थांशे द्वादशोऽध्यायः ॥ १२ ॥ पराशर उ
वाच । भजनभजमानदिव्यान्धकदेवावृधमहाभोजवृष्णिसंज्ञाः सात्वतस्य पुत्रा बभूवुः
भजमानस्य निमिकृकणवृष्णयः तथान्ये त्रैमात्राः शतजित्सहस्रजिदयुतजित्संज्ञा
स्त्रयः देवावृधस्यापि बभ्रुः पुत्रोऽभवत् तयोश्चायं श्लोको गीयते । यथैव शृणुमो दूरात्संप

श्री
वि॰पु॰
१५३

सचैकदा सनेकरथातिभूतगजतुरगाघसंमर्दातिदारुणमहाहवेयुध्यमानस्सकल
मेवारिचक्रमजयत्तच्चारिचक्रमपास्तपुत्रकलत्रबंधुबलकोशंस्वमधिष्ठानंपरित्य
ज्यदिशः प्रतिद्रुतंतस्मिंश्चविद्रुतेतित्रासलोलायतलोचनयुगलंत्राहि२ताततात
तांबभ्रातरित्याकुलविलापविधुरंराजकन्यारत्नमसौददर्शतद्दर्शनाच्चतस्यामनुरागा
नुगतोन्तरात्मासनृपोचिंतयत्साध्विदंममापत्यविरहितस्यवंध्याभर्त्तुः संप्रतेनविधि
नापत्यकारणंकन्यारत्नमुपपादितंतदेतत्समुद्वहाम्यथवैनांस्यंदनमारोप्यस्वमधि
ष्ठानंनयामितत्रैवदेव्याशैव्यायाहमनुज्ञातः समुद्वहामीत्यथैनांरथमारोप्यस्वनगर
मागच्छद्विजयिनंचराजानमशेषपौरभृत्यपरिजनामात्यसमेतवनाशैव्याद्रष्टुमधि
ष्ठानद्वारमागतासाचालोक्यराज्ञःसव्यपार्श्ववर्तिनींकन्यामीषदुद्भूतामर्षस्फुरद
धरपल्लवाराजानमवोचत् अतिचपलचित्तात्रस्यंदनेकेयमारोपितेत्यसावप्यना
लोचितोत्तरवचनोतिभयात्तामाह स्नुषाममेयमित्येवमभिहिते शैव्योवाच नाहंप्रसूता
पुत्रेणनान्यापत्न्यभवत्तव स्नुषासंबंधताह्येषाकतमेनसुतेनते पराशरउवाच
इत्यात्मेर्ष्याकोपकलुषितवचनमुषितविवेकभयाद्दुरुक्तपरिहारार्थमि
दमवनीपतिराह यस्तेजनिष्यत्यात्मजस्तस्यायमनागतस्यभार्यानिरूपितेत्या

शतप्रधानाः पंचपुत्रा बभूवुः शूरसेनवृषभमधुध्वजजयध्वजसंज्ञाः मधुध्वजात्ताल-
जंघः पुत्रोऽभवत् तालजंघस्य तालजंघाख्यं पुत्रशतमासीत् येषां ज्येष्ठो वीतिहो-
त्रस्तथान्यो भरतो भरताद्वृषः वृषपुत्रो मधुरभवत् तस्यापि वृष्णिप्रमुखं पुत्रशत-
मासीद्यतो वृष्णिसंज्ञामेतद्गोत्रमवाप मधुसंज्ञाहेतुश्च मधुरभूत् यादवाश्च यदुना-
मोपलक्षणादिति ॥ इति श्रीविष्णुपुराणे पाराशरीयायां संहितायां चतुर्थें-
शे एकादशोऽध्यायः ॥ ११ ॥ पराशर उवाच क्रोष्टोश्च यदुपुत्रस्यात्मजो ध्वजिनीवाननन-
स्वातिः ततो रुशंकुः रुशंकोश्चित्ररथस्तत्तनयः शशबिंदुः चतुर्दशमहारत्नच-
क्रवर्त्यभवत् तस्य च शतसहस्रं पत्नीनामभवन् दशलक्षसंख्याश्च पुत्रास्तेषां च
पृथुयशाः पृथुकर्मा पृथुजयः पृथुकीर्तिः पृथुदानः पृथुश्रवाश्च षट् पुत्राः प्रधाना
पृथुश्रवसश्च पुत्रस्तमस्तस्मादुशना यो वाजिमेधानां शतमाजहार । तस्य च शिने-
युर्नाम पुत्रोऽभूत् तस्यापि रुक्मकवचस्ततः परावृत् रुक्मेषुपृथुरुक्मज्यामघपलि-
तहरिसंज्ञाः पंचात्मजा बभूवुः पुत्रास्तथापि ज्यामघस्य श्लोको गीयते
भार्यावश्यास्तु ये केचिद्भविष्यन्त्यथवा मृताः तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभू-
न्नृपः अपुत्रा तस्य सा पत्नी शैब्या नाम तथाप्यसौ अपत्यकामोऽपि भयान्नान्यां भार्या-

श्री
वि·पु·
१५२

शतजितो विख्यातो परत्र्हनयाकृतिः सहस्रजित्को हैहनलनत्र्युसंज्ञा श्वलाशोपतु पुत्रा बभू-
वुः सहस्रजितः पुत्रः शतजिन्महैहयहैहयवेणहयास्त्रयः पुत्रा हैहयपुत्रो धर्मनेत्रः ततः
कुन्तिः कुन्तेः साहञ्जिः ततस्तस्माद्यो माहिष्मान्यो सौ माहिष्मतीं पुरीं निर्वापयामास तस्माद्भद्रश्रे-
ण्यस्ततो दुर्दमः तस्माद्धनकः धनकस्य कृतवीर्यकृताग्निकृतवर्मकृतौजसश्चत्वारः पुत्राः
कृतवीर्यादर्जुनः सप्तद्वीपाधिपतिः बाहुसहस्रो जज्ञे योऽसौ भगवदंशमत्रिकुलप्रसूतं दत्तात्रेया-
ख्यमाराध्य बाहुसहस्रमधर्मसेवानिवारणं धर्मेणाः पृथिवीजयं धर्मतश्चानुपालनमरा-
तिभ्योऽपराजयमखिलजगत्प्रख्यातपुरुषाच्च मृत्युमित्येतान्वरानभिलषितवांल्लेभे च
तेनेयमशेषद्वीपवती पृथ्वी सम्यक्परिपालिता दशयज्ञसहस्राण्यसावयजत तस्य च
श्लोकोऽद्यापि गीयते न नूनं कार्तवीर्यस्य गतिं यास्यन्ति मानवाः यज्ञैर्दानैस्तपोभिर्वा प्रश्र-
येण श्रुतेन वा अनष्टद्रव्यता च तस्य राज्येऽभवत् एवं पंचाशीतिसहस्राण्यव्याहतारो-
ग्यश्रीबलपराक्रमो राज्यमकरोत् माहिष्मत्यां दिग्विजयाभ्यागतो नर्मदाजलावगा-
हक्रीडातिपानमदाकुलेनायत्नेनैव तेनाशेषदेवदैत्यगन्धर्वेशजयो-
द्भूतमदावलेपो रावणः पशुरिव बद्ध्वा स्वनगरैकान्ते स्थापितः यश्च पंचाशीतिवर्षस-
हस्रोपलक्षणकालावसाने भगवन्नारायणांशेन परशुरामेणोपसंहृतः तस्य पुत्र-

स्त्रियः । एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत् । यदा न कुरुते भावं सर्वभूतेषु पाप
कं । समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः । या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जी
र्यतः । तां तृष्णां संत्यजन् प्राज्ञः सुखेनैवाभिपूर्यते । जीर्यन्ति जीर्यतः केशा दंता जीर्यन्ति जीर्य
तः । धनाशा जीविताशा च जीर्यतोऽपि न जीर्यति । पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः
तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते । तस्मादेनामहं त्यक्त्वा ब्रह्मण्याधाय मानसं । नि
र्द्वंद्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह । पराशर उवाच । पूरोस्सकाशादादाय जरां द
त्वा च यौवनं । राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनं । दिशि दक्षिणपूर्वस्यां तुर्वसुं पतिमादि
शत् । प्रतीच्यां च तथा द्रुह्युं दक्षिणायां ततो यदुं । उदीच्यां च तथैवानुं कृत्वा मंडलिनो
नृपान् । सर्वपृथ्वीपतिं पूरुं सोऽभिषिच्य ययौ वनं ॥ इति श्रीविष्णुपुराणेऽष्टादशसाह
स्र्यां संहितायां चतुर्थेऽंशे दशमोऽध्यायः ॥ पराशर उवाच । अतः परं ययातेः प्रथमपु
त्रस्य यदोर्वंशमहं कथयामि यत्राशेषलोकनिवासिमनुष्यसिद्धगंधर्वयक्षराक्षसगुह्य
ककिंपुरुषाप्सरोरगविहगदैत्यदानवादित्यवस्वश्विमारुतदेवद्विजर्षिभिर्मुमुक्षु
भिर्धर्मार्थकाममोक्षार्थिभिस्तत्फललाभाय सदाभिष्टुतोऽपरिच्छेद्यमाहात्म्यांशेन
भगवाननादिनिधनो विष्णुरवततार । अत्राह । यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते । य

मे अत्रानुवंशश्लोको भवति यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च श
र्मिष्ठा वार्षपर्वणी काव्यशापाच्चाकालेनैव ययातिर्जरामवाप प्रसन्नशुक्रवचनाच्च स्व
जरां संक्रमयितुं ज्येष्ठं पुत्रं यदुमुवाच वत्स त्वन्मातामहशापादियमकालेनैव जरा ममोप
स्थिता तामहं तस्यैवानुग्रहाद्भवतः संचारयाम्येकं वर्षसहस्रमतृप्तोस्मि विषयेषु त्वद्व
यसा विषयानहं भोक्तुमिच्छामि नात्र भवता प्रत्याख्यानं कर्तव्यमित्युक्तः स यदुर्नैच्छत्
जरामादातुं तं च पिता शशाप त्वत्प्रसूतिर्न राज्यार्हा भविष्यतीत्यनंतरं च तुर्वसुं द्रुह्युमनुं
च पृथिवीपतिर्जराग्रहणार्थं स्वयौवनप्रदानाय चाभ्यर्थयामास तैरप्येकैकेन प्रत्या
ख्यातस्तांश्शशाप अथ शर्मिष्ठातनयमशेषकनीयांसं पूरुं तथैवाह स चातिप्रवणमतिः स
बहुमानं पितरं प्रणम्य महाप्रसादोयमस्माकमित्युदारमभिधाय जरां जग्राह स्वकीयं च
यौवनं स्वपित्रे ददौ सोपि च पौरवं यौवनमासाद्य धर्माविरोधेन यथाकामं यथाका
लोपपन्नं यथोत्साहं विषयांश्चचार सम्यक्प्रजापालनमकरोत् विश्वाच्या देवयान्या सहो
पभोगं भुक्त्वा कामानामन्तं प्राप्स्यामीत्यनुदिनं तन्मनस्कोबभूवानुदिनं चोपभोगतः
कामानतीवातिरम्यान्मेने ततश्चैवमगायत न जातु कामः कामानामुपभोगेन श
शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते यत्पृथिव्यां व्रीहियवं हिरण्यं पशव

वकुः ननस्थवरूनिर्मकालेयतीनेहूहृष्यानिमेकांनेटस्थापहनवैलोकायज्ञभागः
शानक्रनकवाच वदरीफलमात्रमहेमिसमाप्यायनायपुरोकुगशावंदेटानुमिनु
क्राहूहृष्यानिरवे यथैवंलयाहेश्वंमवचोटिनःस्पानममनदस्थेकिमकनेयमि
मस्येवाहमहोभिस्तानिनपदंप्रापयिषामोन्यभिधायनेषामनुदिनाभिघाविकं
बुद्धिमोहाययाक्रमणेनमोभिवृद्धयेनहावनेचापिनेनवुद्धिमोहेनाभिभूयमाना
ब्रह्मद्विषःपमेस्यागिनोवेदवादपराङ्मुखावभूवुः ननस्तनपेनपमोचायानिद्रोच
त्वान पुरोहिनाप्याप्यितनेनाश्चर्विदिवमाकमनन् पनविंशपमवपरागोहंणाक्रनाप
कपस्थपरभ्रंशादौमान्यचनामोनिवंभस्तनपमोभवनत्वचदेहमनःप्रतिबवा
स्तनसेजयस्तस्मापिजयः ननस्थविजयस्तस्मायुजनेकृनःनमयहयंडनुःहयंइ
नोस्तनःमहदेवःनस्माद्दीनःनसवयनेनस्तनस्थसंकृनिस्तस्मात्रयवचयधर्मसंस
नेवात्रहद्स्यानोनहूपवंशंप्रवस्यामीति ॥ इतिश्रीविष्णुपुराणेब्राह्मांशेपापाश्री
पायांमहिनायांचनर्थोशोनवमोध्यायः ९ पराशरउवाच ॥ यतिपयानिसंपात्या
यातिविकृनिमेतानहूपवस्थवद्दपुत्रामहाबलपराक्रमावभूवुः यनिस्तराज्यनेच्छेन
ययातिस्तभूभृदभवत उशनसश्चदुहिनरंदेवयानीवार्षपर्वणीचशर्मिष्ठामुपये

ल्लसेनेतिः श्रूयतामिति ॥ इति श्रीविष्णुपुराणे ब्रह्मांडे पाराशरीयायां संहितायां चतुर्थेंशे-
ष्टमोध्यायः ८ श्रीपराशर उवाच ॥ रजेः पंचपुत्रशतान्यतुलवीर्यसाराण्यासन् देवासुर-
संग्रामारंभे च परस्परवधेप्सवो देवाद्यासुराश्च ब्रह्माणमपृच्छुः भगवन्नस्माकमत्र विरो-
धे कतमः पक्षो जेता भविष्यतीत्याह भगवान्येषामर्थे रजिरात्तायुधो योत्स्यतीत्यथ दैत्यै-
रुपेत्य रजिरात्मसाहाय्यदानायाभ्यर्थितः प्राह योत्स्येहं भवतामर्थे यद्यहममरजया-
न्भवतामिंद्रो भविष्यामीत्याकर्ण्यैतैरभिहितं न वयमन्यथा करिष्यामोऽस्माकमिंद्रः
प्रह्लादस्तदर्थमेवायमुद्यमः इत्युक्त्वा गतेष्वसुरेषु देवैरप्यवनीपतिरेवमेवोक्तः तेना-
पि च तथैवोक्तेः देवैरिंद्रस्त्वं भविष्यसीति समन्विष्टे रजिनापि देवसैन्यसहायेना-
नेकैर्महास्त्रैस्तदशेषमसुरबलं निषूदितमथ जितारातिपक्षश्चेंद्रो रजिचरणयुगल-
मात्मशिरसा निपीड्याह भयत्राणादन्नदानाद्भवानस्मत्पिता अशेषलोकानामुत्तमो-
भवान्यस्याहं पुत्रस्त्रिलोकेंद्रः स चापि राजा प्रहस्याह एवमस्त्वेवमस्त्वनतिक्रम-
णीया हि वैरिपक्षादप्यनेकविधचाटुवाक्यगर्भा प्रणतिरित्युक्त्वा स्वपुरं जगाम॰
शतक्रतुरपींद्रत्वं चकार स्वर्याते च रजौ नारदर्षिचोदिता रजिसुताः शतक्रतुमात्म-
पितृपुत्रसमाचाराद्राज्यं याचितवंतः अप्रदानाच्चावजित्येंद्रमतिबलिनः स्वयमिंद्रत्वं

सेनाख्यैवानेनापंचमः क्षत्रवृद्धात्सुहोत्रः पुत्रोभवत्काशलेशगृत्समदास्त्रयस्तस्यपु-
त्राबभूवुः गृत्समदस्यशौनकश्चातुर्वर्ण्यप्रवर्तयिताभूत्काशस्यकाशेयःकाशिराजः
तस्माद्दीर्घतमाःपुत्रोभूत्धन्वन्तरिस्तुदीर्घतमसःपुत्रोभवत्सहिसंसिद्धकार्यकर-
णः सकलसंभूतिष्वशेषज्ञानविद्भगवतानारायणेनातीतसंभूतौतस्मैवरोदत्तः
काशिराजगोत्रेवतीर्यत्वमष्टधासम्यगायुर्वेदंकरिष्यसियज्ञभागभुग्भविष्यसीतितस्य
धन्वन्तरेःपुत्रःकेतुमान्केतुमतोभीमरथः तस्यापिदिवोदासोदिवोदासात्प्रतर्दनः
सचभद्रश्रेण्यवंशविनाशनादशेषाःशत्रवोनेनजिताइतिशत्रुजिदभवत्तेनच
प्रीतिमतात्मपुत्रोवत्सवत्सेत्यभिहितः ततोवत्सोनामाभवत्सत्यपरतयाऋतध्वज-
संज्ञामवापपुनश्चकुवलयनामानमश्वंलेभे ततश्चकुवलयाश्वइत्यस्यांपृथिव्यांप्र-
थितस्तस्यचवत्सस्यपुत्रोलर्कोनामाभवत्तस्यायमद्यापिश्लोकोगीयते षष्टिंवर्षस-
हस्राणिषष्टिंवर्षशतानिच अलर्कादपरोनान्योबुभुजेमेदिनींयुवा तस्यापिसन्नति-
र्नामात्मजोभवत्सुनीथस्तस्यापिसुकेतुः तस्माच्चधर्मकेतुर्जज्ञे ततश्चसत्यकेतुस्त-
स्माद्विभुस्तत्तनयःसुविभुः ततश्चसुकुमारस्तस्यापिधृष्टकेतुस्ततश्चवीतिहोत्रस्तस्मा-
द्भार्गः भार्गस्यभार्गभूमिः ततश्चातुर्वर्ण्यप्रवृत्तिरित्येतेकाशयोभूभृतःकथिताःरजेः

वृत्ताकृतम्मतिरौद्रं नैवपुरस्पने नूनं नया स्मांवव रूरूपयुक्तो नपुत्र मेनन्मयाहितश्च
रोसकलैश्वर्यवीर्यबलसंपदाधारोपिनान्तयो यच्चास्यापि शान्तिज्ञानतितिक्षादि
कोब्राह्मणगुणसंपदेतञ्च विपरीतं कृतं नाम्लवादितौद्रास्त्रशस्त्रधारणनिष्ठः क्षत्रियाचारः
पुत्रोभविष्यत्यस्याश्चोपशमरुचिर्ब्राह्मणाचारऽत्याकर्ण्यैवसातस्यपादौजग्राह प्रणि
पत्यैवनमाहभगवन्मयैतदज्ञानादनुष्ठितं प्रसादं कुरु मैवंविधः पुत्रोभवत्वकाममेवं
विधःपौत्रोभवत्वित्युक्ते मुनिरप्याहैवमस्त्वित्यनंतरं च सा जमदग्निमजीजनत्तन्मा·
ता च विश्वामित्रं जनयामास सत्यवती च कौशिकीनाम नद्यभवत् जमदग्निरिक्ष्वाकु
वंशोद्भवस्य रेणोस्तनयां रेणुकामुपयेमे तस्यां चाशेषक्षत्रवंशहंतारं परशुरामसंज्ञं·
भगवतस्सकललोकगुरोर्नारायणस्यांशं जमदग्निरजीजनत् विश्वामित्रपुत्रस्तु भा
र्गव एव शुनःशेपो देवैर्दत्तः ततश्च देवरातनामाभवत् ततश्चान्ये मधुच्छन्दधनंजयकृत
देवअष्टककच्छपहारीताख्या विश्वामित्रपुत्रा बभूवुः तेषां च बहूनि कौशिकगोत्रा
णि ऋष्यंतरेषु विवाह्यान्यभवन्निति ॥ इति श्रीविष्णुपुराणे ब्रह्मांडे पाराशरीयायां सं
हितायां चतुर्थेंशे सप्तमोध्यायः ७ श्रीपराशर उवाच पुरूरवसो ज्येष्ठः पुत्रो यस्त्वायुः
र्नाम स राहोर्दुहितरमुपयेमे तस्यां च पंच पुत्रानुत्पादयामास नहुषक्षत्रवृद्धरंभरजि

मंगासमनंतरपण्यन जह्नोः सुमंतुर्नाम पुत्रोभवत् तस्याजनैकः ततो बलाकाश्वः त
स्मात्कुशः तस्यापि कुशाम्बकुशनाभामूर्तयवसुसंज्ञाश्चत्वारः पुत्रा बभूवुः तेषां कुशाम्बश्श
क्रतुल्यो मे पुत्रो भवेदिति तपश्चचार तं चोग्रतपसमवलोक्य मा भवत्वन्योस्मत्तुल्यवीर्यः इ
त्यात्मनैवास्येंद्रः पुत्रत्वमगच्छत् गाधिर्नामासौ कौशिकोभवत् गाधिश्च सत्यवतीं नाम कन्या
मजनयत् तां च भार्गव ऋचीको वव्रे गाधिरप्यतिरोषणायातिवृद्धाय ब्राह्मणाय दातुम
निच्छन्नेकतः श्यामकर्णानामिंदुवर्चसामनिलरंहसामश्वानां सहस्रं कन्याशुल्कमया
चत तेनाप्यृषिणा वरुणसकाशादुपलभ्याश्वतीर्थोत्पन्नं तादृशमश्वसहस्रं दत्तं ततः
तामृषिः सत्यवतीं कन्यामवाप ऋचीकश्च तस्याश्चरुमपत्यार्थं चकार तेन प्रसादितश्च
तन्मात्रा क्षत्रवरपुत्रोत्पत्तये चरुमपरं तेनैव साधयामास एष चरुर्भवत्या अयमपरश्च
रुस्त्वन्मात्रा सम्यगुपयोज्य इत्युक्त्वा वनं जगाम उपयोगकाले तं माता सत्यवतीमाह पु
त्रि सर्व एवात्मपुत्रमतिगुणमभिलषते नात्मजायाभ्रातृगुणेष्वतीवादृतो भवति
तो भवति अतोर्हसि ममात्मीयं चरुं दातुं मदीयं चरुमात्मनोपयोक्तुं मत्पुत्रेण हि सक
लभूमंडलपरिपालनं कार्यं कियद्वा ब्राह्मणस्य बलवीर्यसंपदेत्युक्ता सा स्वचरुं मात्रे दत्तव
ती अथ वनादागम्य सत्यवतीमृषिरपश्यत् आह चैनामतिपापे किमिदमकार्यं भ

स्वपुरं जगाम अतीतेऽर्धरात्रे विनिद्रश्चाचिंतयत् ममोर्वशीसालोक्यप्राप्त्यर्थं मग्निस्थालीगंध
र्वैर्दत्ता सा च मयाटव्यां परित्यक्ता तदहं तत्र तदाहरणाय यास्यामीत्युत्थाय तत्राप्युपगतो
नाग्निस्थालीमपश्यत् शमीगर्भं चाश्वत्थमग्निस्थाने दृष्ट्वाचिंतयत् मयात्र स्थाली निक्षि
प्ता सा चाश्वत्थः शमीगर्भोऽभूत् तदेनमेवाहमग्निरूपमादाय स्वपुरमभिगम्यारणीं कृत्वा
तदुत्पन्नाग्नेरुपास्तिं करिष्यामीत्येव स्वपुरमभिगम्यारणीं चकार तत्प्रमाणं चांगुलैः कु
र्वन् गायत्रीमपठत् पठतश्चाक्षरसंख्यान्येवांगुलान्यरण्यभवत् तत्राग्निं निर्मथ्या
ग्नित्रयमाम्नायानुसारी भूत्वा जुहावोर्वशीसालोक्यं च फलमभिसंधितवान् तेनैव चा
ग्निविधिना बहुविधान्क्रतूनिष्ट्वा गांधर्वलोकानवाप्योर्वश्या सहावियोगमवाप [illegible] एको
ग्निरादावभवत् ऐलेनत्वत्र मन्वंतरे त्रेताप्रवर्तितेति ॥ इति श्रीविष्णुपुराणे ब्रह्मांडे पा
राशरीयायां संहितायां चतुर्थेंऽशे षष्ठोऽध्यायः ६ श्रीपराशर उवाच तस्याप्यायुर्धीमा
नमावसुर्विश्वावसुः शतायुः श्रुतायुसंज्ञा [illegible] भवन् अमावसोर्भीमनामा पुत्रोऽभवत्
भीमस्य कांचनः कांचनात्सुहोत्रः तस्यापि जह्नुः योऽसौ यज्ञवाटमखिलं गंगांभसा
प्लावितमालोक्य क्रोधसंरक्तलोचनो भगवंतं यज्ञपुरुषमात्मनि परमेण समाधिना
समारोप्याखिलामेव गंगामपिबत् अथैनं देवर्षयः प्रसादयामासुः दुहितृत्वेऽस्या

रणवोन्मन्नृपोवभ्राम कुरुते त्रैवांभोजनस्य स्यन्दाम्याभिक्षुनाभिरपायेभिसमवेनाश्रुवे॰
शीटद्दर्शननश्चान्मन्नृपो राजायेहेति ह्यमनसिच्चोरेहेति ह्यवचसीन्ननेकप्रकारमप्युक्त
होवैशीमहाभाजग्रत्नमनेना विवेकचे हिनेनोनवैर्तिन्महमह्यन्नैभवनागोनव्यंक्रमार॰
नैभविष्यन्मेकोच निर्यायमहेनयावन्ममासीन्मुक्तः प्रभु ह्यः सपुरंजगाम्मनासौवायसम्पु
वैशीकथयामास श्रुयंसपुरुषोन्कस्मौयेनाहमनावैनकालमनुरागात् हेमानसासहो॰
पितेनैवमुक्ताश्चयसरस्क्रुचः साधुसाधुसत्पुरुषमनेन महात्माकमपि सर्वकालमस्याभा
वैदित्नहेव भूयोऽसगमानराजगामकुमारचाप्युक्तेनदोवैशीददावेकौ चनिशानेनार॰
ज्ञासहोपिनापवपुत्रोत्पन्नयेगर्भमवाप उवाच चैनं राजानमसमर्थोऽस्मि महाराजसर्व
पवगपर्वावरदासंमहनाः त्रियनोवर उक्तः प्राह राजा चाविलिनसकलानि रवैह॰
नैद्रियसामर्थ्यो वैपुमान मितवलकोशोनामस्माकमपुर्वैशीमालोकाटप्राप्यमस्ति
नटहमनयामहोवैषपाकालेनैतमखिलपामासीन्मुक्तेगंधर्वराज्ञे ग्निस्थालीदत्तः कृतज्ञे
नमग्निमास्नायान्समीभुवाविधाकृनोवैशीसलोकनामनोरथमुद्दिश्यसम्पयजेय्याः
ननोवैषपमभितषिनमवाप्यासीन्मुक्तः नामग्निस्थालीमाटायजगामानरदयामचिन
यरहोमेनिमृछनावक्रिस्थालीमयेषानीनानोवैषीन्मये वाटयामेवाग्निस्थालीनिधा

वाक्येनानेनमतेमुर्वशीप्राह भवत्वेवंयदिमेसमयपरिपालनंभवान्करोतीत्याख्यातेनियमस
मयमितितेनएवमुक्तेपुनरप्यब्रवीत्शयनसमीपेममोरणकद्वयंपुत्रभूतंनापनेयंभवांश्चमया
ननग्नोद्रष्टव्यःघृतमात्रंचममाहारःइत्येवमेवेतिभूपतिराह तयाचसहावनिपतिरलका
यांचैत्ररथादिवनेष्वमलपद्मषंडेषुमानसादिसरस्वतिरमणीयेषुरममाणएकषष्टिवर्षाण्यनुदि
नप्रवर्धमानानुरागाअमरलोकवासेपिनस्पृहांचकार विनाचोर्वश्यासुरलोकोप्सरसां
सिद्धगंधर्वाणांचनातिरमणीयोभवत्ततश्चोर्वशीपुरूरवसोःसमयविद्विश्वावसुःगंधर्व
समवेतोनिशिशयनाभ्याशादेकमुरणकंजहार तस्याकाशेनीयमानस्योर्वशीशब्द
मशृणोत्एवंचममानाथायाःपुत्रःकेनापह्रियतेकंशरणमुपयामीत्याकर्ण्यराजामांना
नेदेवीद्रक्ष्यतीतिनययावथान्यमुरणमादायगंधर्वाययुःतस्याप्यपह्रियमाणस्याकर्ण्य
शब्दमाकाशेपुनरप्यनाथास्म्यहमभर्तृकाकापुरुषाश्रयेत्यार्तराविणीबभूवराजाप्य
मर्षादंधकारमेतदितिखड्गमादायदुष्टदुष्टहतोसीतिव्याहरन्नभ्यधावत् तावच्चगंध
र्वैरप्यतीवोज्ज्वलाविद्युज्जनितातत्प्रभयाचोर्वशीराजानमपगताम्बरंदृष्ट्वापवृत्तसमया
तत्क्षणादेवापक्रान्तापरित्यज्यचतावप्युरणकौगंधर्वाःसुरलोकमुपगताःराजापिचतौ
उरणकावादायातिहृष्टमनाःस्वशयनमायातोनोर्वशींददर्शतांचापश्यन्व्यपगताम्ब

मिंडमेनस्कंदकुमारस्यानिवारुनयामासाभिलाषोहृद्योदेवाःस नसंदेहास्नातोपप्रच्छुःस
ल्पकयथास्माकमनिलभगोसोमस्यायहृहस्पतेःपुत्रउन्मकापिमानाद्रियांकिंचित्रो॰
वाच बहुशोप्यभिहितापदासोदेवेभ्योनाचवोननस्कंदकुमारःनोपमस्यन्नःप्राहवइथ
स्वकस्मान्ममतातेनाख्यास्यसनोघर्वनलीकेलज्ञावत्याःनथाथास्तिमयंकोमियथा
नैवमन्याप्यनिमकुरवचनाभविछनीनथभगावान्मिनामहस्लंकुमारंसन्निवार्यस्वयम
इक्रूनाभोकमथयवत्सेकस्यायमात्मजःसोमस्यायहृहस्पतेःउन्मकाल्लज्ञामानाह सोम
स्यतिननःस्फुरदच्छसिनामलकपोलकांतिर्भगवानुद्युपनिरालिगधकुमारंसाधुसाधुव॰
त्सप्रत्तोसीतिबुधउनिनामचकेसमाख्यानमेवनयथाइलायामात्मजपुरूरवसमुत्पाद
यामास पुत्रम्बा स्वनिदानशीलोनियन्नानेजसीयंसम्पवादिनमतिद्रुपिणंमित्रावरु॰
णशापान्मानुषेलोकेमयावस्तव्यमितिकृतमतिरुर्वशीददर्शाहस्माचवनस्मित्रपदा
यमानमथोषमपाप्यसर्गोरस्तुताभिलाषेननमनस्काभूत्तानमेवोपनम्योसोपिचनाममतिशा
यिनसकललोकस्त्रीकांतिमाक्रमायेतावप्यगानिविलासहासादिगुणामवलोकानद
यत्रविनष्टनिर्वभूव उभयमपिननमनस्कमनन्यहृहीष्णुपानिरूपक्रममस्लानपप्रयोजनमभू॰
नराजानप्रागल्भ्याज्ञामाहसभक्त्याचहमनिकामोस्मिप्रसीदावरागमहहेमन्मकालमा॰

लमहं कथयामि श्रूयतामखिलजगत्स्रष्टुर्भगवतो नारायणस्य नाभिसरोजसमुद्भवाब्जयोने
र्ब्रह्मणः पुत्रोऽत्रिः अत्रेः सोमः तं च भगवानब्जयोनिरशेषौषधिद्विजनक्षत्राणामाधिपत्येऽभ्य
षेचयत् स च राजसूयमकरोत् तत्प्रभावादत्युत्कृष्टाधिपत्याधिष्ठातारं चैनं मद आवि॰
वेश मदावलेपाच्च सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार बहुशश्च बृहस्पति॰
चोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच तस्य
च बृहस्पतेर्द्वेषादुशना अपि पार्ष्णिग्राहोऽभवत् अंगिरसश्च सकाशादुपलब्धविद्यो भगवान्रु
द्रो बृहस्पतेः साहाय्यमकरोत् यतश्चोशना ततो जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनि॰
काया महान्तमुद्यमं चक्रुः बृहस्पतेरपि सकलदेवसैन्ययुतः सहायः शक्रोऽभवत् एवं च तयो
रतीवोग्रसंग्रामस्तारानिमित्तस्तारकामयो नामाभवत् ततश्च समस्तशस्त्राण्यसुरेषु रुद्र
पुरोगमा देवाः देवेषु चाशेषदानवा मुमुचुः एवं च देवासुराहवसंक्षोभक्षुब्धहृदयमशे
षमेव जगद्ब्रह्माणं शरणं जगाम ततश्च भगवानप्युशनसं शंकरमसुरान्देवांश्च निवार्य बृह॰
स्पतये तारामदात् तां चान्तःप्रसवामवलोक्य बृहस्पतिरप्याह नैष मम क्षेत्रे भवतान्यस्य सुतो॰
धार्यः समुत्सृजैनमलमलमतिधार्ष्ट्येनेति सा च तेनैवमुक्तातिपतिव्रता भर्तृवचनानन्तरमि॰
षीकास्तम्बे गर्भमुत्ससर्ज स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप बृहस्पति

छन सीरेण सीता दुहिता समुत्पन्ना सीरध्वजानुजस्य काश्याधिपतिः कुशध्वजनामा
सीरध्वजस्यापत्यं भानुमान् भानुमतः शतद्युम्नः तस्य तु शुचिः तस्माच्चोर्जनामा पुत्रो
जज्ञे तस्यापि शतध्वजः कृतिः कृतेरंजनस्तत्पुत्रः कुरुजित्ततोऽरिष्टनेमिः तस्माच्छ्रु-
तायुः श्रुतायुषः सुपार्श्वः तस्मात्संजयः ततः क्षेमारिस्ततोऽनेनास्तस्मान्मीनर-
थः तस्य सत्यरथः तस्मादुपगुः उपगोः श्रुतस्तस्याभूत्पुत्रः स्वागतस्तस्य च सुवर्चास्तस्मा-
त्सुश्रुतः तस्यापि सुभाषस्तस्य श्रुतः तस्माच्छ्रुताज्जयः जयपुत्रो विजयः विजय-
स्यर्तस्तस्मात्सुनयः सुनयाद्वीतहव्यः तस्माद्धृतिः धृतेर्बहुलाश्वः तस्य पुत्रो कृतिः
कृतौ सन्तिष्ठतेऽयं जनकः वंशः इत्येते मैथिलाः प्रायेणैतेषामात्मविद्याश्रयि-
णो भवंतीति ॥ इति श्रीविष्णुपुराणे ब्राह्मोड पाराशर्यां संहितायां चतुर्थे-
ऽंशे पंचमोऽध्यायः ५ मैत्रेय उवाच सूर्यस्य भवता वंश्याः कथिता भगवन्मम सो-
मस्य वंशानखिलान् श्रोतुमिच्छामि पार्थिवान् कीर्त्यते स्थिरकीर्तीनां येषामद्यापि सं-
ततिः प्रसादसुमुखस्तान्मे ब्रह्मन्नाख्यातुमर्हसि पराशर उवाच श्रूयतां मुनिशार्दूल वंशः
प्रथिततेजसः सोमस्यानुक्रमात्ख्याता यत्रोर्वीपतयोऽभवन् अयं हि वंशोऽतिबलपराक्रम-
द्युतिशीलचेष्टावद्भिरतिगुणान्वितैर्नहुषययातिकार्तवीर्यार्जुनादिभिर्भूपालैरलंकृत-

श्री
वि·पु·
१८५

गुरुरकारणमस्मात्तस्यापि देहः पतिष्यतीति शापं दत्वा देहमत्यजत् तच्छापाच्च मैत्रावरु
णयोस्तेजसि वसिष्ठदेहतेजः प्रविष्टं उर्वशीदर्शनादुद्भूतवीजप्रपातयोस्तयोस्सकाशाद्व
सिष्ठो देहमपरं लेभे निमेरपि तच्छरीरमतिमनोहरगन्धतैलादिभिरुपसंस्क्रियमाणं नैवक्ले
दादिकं दोषमवाप सद्योमृतमिव तस्थौ यज्ञसमाप्तौ च भागग्रहणाय देवानागतानृत्विज
ऊचुः यजमानाय वरो दीयतामिति देवैश्छन्दितोसौ निमिराह भगवन्तोऽखिलसंसारदुःख
संहानवेत्तारो नह्येतादृगन्यदुःखमस्ति यच्छरीरात्मनोर्वियोगे भवति तदहमिच्छामि सक
ललोकलोचनेषु वस्तुं न पुनः शरीरग्रहणं कर्तुमित्येवमुक्ते देवैरसावशेषभूतानां ने
त्रेष्ववतारितस्ततो भूतान्युन्मेषनिमेषं चक्रुः अपुत्रस्य च तस्य भूभुजः शरीरमराजकभीरवस्ते मु
नयोरण्यामममंथुः तस्य च कुमारो जज्ञे जननाज्जनकसंज्ञामवाप अभूद्विदेहोस्य पितेति वैदे
हः मथनान्मिथिरिति तस्योदावसुः पुत्रोभवत् ततोदावसोर्नन्दिवर्धनः ततस्सुकेतुस्तस्मा
द्देवरातः ततश्च बृहदुक्थस्तस्य च महावीर्यस्तस्यापि सुधृतिस्ततश्च धृतिकेतुस्ततोपि धृ
ष्टकेतुरजायत धृष्टकेतोर्हर्यश्वः तस्य च मरुः मरोः प्रतिबन्धकः तस्मात्कृतिरथः तस्य दे
वमीढस्तस्य विभवस्तस्माद्विबुधो विबुधस्यापि महाधृतिः ततश्च कृतिरातः ततो महारोमा
तस्य स्वर्णरोमा तस्यापि ह्रस्वरोमा ह्रस्वरोम्णः सीरध्वजोभवत् तस्य पुत्रार्थं यजनभुवं कृ

जैमिनेः शिष्यो योगाचार्यस्तस्माद्यो योगमवाप हिरण्यनाभस्य पुत्रः पुष्यस्तस्माद्ध्रुवसंधिः तत
स्सुदर्शनस्तस्मादग्निवर्णः ततश्शीघ्रस्तस्यापि मरुः पुत्रोऽभूत् योऽसौ योगमास्थायाद्यापि क
लापग्राममाश्रितस्तिष्ठति आगामियुगे सूर्यवंशक्षत्रप्रवर्तयिता भविष्यति प्रसुश्रुतस्तस्या
त्मजः तस्यापि सुसंधिः ततश्चामर्षस्तस्य च सहस्वांस्ततश्च विश्वभवः ततश्च बृहद्बलो यो
र्जुनतनयेनाभिमन्युना भारतयुद्धे क्षयमनीयत एते ह्यिक्ष्वाकुभूपालाः प्राधान्येन मयोदि
ताः एतेषां चरितं शृण्वन् सर्वपापैः प्रमुच्यते ॥ इति श्रीविष्णुपुराणे ब्राह्मोदे पाराशरीये चतु
र्थांऽशे चतुर्थोऽध्यायः ॥ ४ ॥ श्रीपराशर उवाच ॥ इक्ष्वाकुतनयो योऽसौ निमिर्नामा स
स सहस्रसंवत्सरं सत्रमारेभे वशिष्ठं च होतारं वरयामास तमाह वशिष्ठोऽहमिन्द्रेण पं
चवर्षशतयागार्थं प्रथमं वृतः तावदेनं प्रतिपाल्यतामागतः तवापि ऋत्वि
ग्भविष्यामीत्युक्ते स पृथिवीपतिः न किंचिदुक्तवान् वशिष्ठोऽप्यनेन समन्वीप्सितमि
त्यमरपतेर्यागमकरोत् समाप्ते चामरपतेर्यागे त्वरावान्वशिष्ठो निमियज्ञं करिष्यामीत्या
जगाम तत्कर्मकर्तृत्वं च गौतमस्य दृष्ट्वाथाश्रयाय तस्मै राज्ञे मामप्रत्याख्यायैतदनेन
गौतमाय कर्म समर्पितं यस्मात्तस्मादयं विदेहो भविष्यतीति शापं ददौ प्रबुद्धश्चासा
ववनिपतिरपि प्राह यस्मान्मामसंभाष्याज्ञानत एव शयानस्य शापोत्सर्गमसौ दुष्टगु

क्षेप सुबाहुप्रमुखांश्च क्षयमनयत् दर्शनमात्रेणाहल्यामपापां चकार जनकगृहे च माहेश्व
रं चापमनायासेन बभंज सीतामयोनिजां जनकराजतनयां वीर्यशुल्कां लेभे सकलक्षत्रक्षयकारि
णमशेषहैहयकुलकेतुभूतं च परशुराममपास्तवीर्यबलावलेपं चकार पितृवचनाच्चाविगणित
राज्याभिलाषो भ्रातृभार्यासमेतो वनं प्रविवेश विराधखरदूषणादीन् कबंधवालिनौ च निज॰
घान बद्ध्वा चांभोनिधिमशेषराक्षसकुलक्षयं कृत्वा दशाननापहृतां तद्वधापहृतकलंकाम
प्यनलप्रवेशशुद्धामशेषदेवसंघैः स्तूयमानशीलां जनकराजतनयामयोध्यामानिन्ये भरतोऽपि गं॰
धर्वविषयसाधनाय गंधर्वकोटीस्तिस्रो जघान शत्रुघ्नेनाप्यमितबलपराक्रमो मधुपुत्रो लव
णो नाम राक्षसेश्वरो निहतो मथुरा च निवेशिता इत्येवमाद्यतिबलपराक्रमैरतिदुष्टनिबर्हणा॰
दशेषस्य जगतो निष्पादितस्थितयो रामलक्ष्मणभरतशत्रुघ्नाः पुनरपि दिवमारूढाः येऽपि ते
षु भगवदंशेष्वनुरागिणः कोसलनगरजनपदाः तेऽपि तन्मनसः तत्सालोक्यतामवापुः रामस्य॰
हि कुशलवौ पुत्रौ लक्ष्मणस्यांगदचंद्रकेतू तक्षपुष्कलौ भरतस्य सुबाहुशूरसेनौ शत्रुघ्नस्य कु॰
शस्यातिथिरतिथेरपि निषधः पुत्रोऽभवत् निषधस्यापि नलस्तस्मादपि नभाः नभसः पुंडरीकस्तत्तन
यः क्षेमधन्वा तस्य तस्यापि पारियात्रः पारियात्राद्दलो दलाद्बलस्तस्मादुक्थः उक्थाद्वज्रनाभः त
स्मा`` च्छंखनाभस्तस्माद्युषिता`` ततश्च विश्वसहो जज्ञे हिरण्यनाभः ततो महायोगीश्वरो

कोनामपुत्रोभवत् योसौनिःक्षत्रेक्ष्मातलेस्मिन्क्रियमाणेस्त्रीभिर्विवस्त्राभिःपरिवार्यरक्षितः
ततस्तंनारीकवचमुदाहरंति मूलकाह्वश्चरथः तस्मादिलविलः ततश्चविश्वसहस्तस्माच्च
खट्वांगोयोसौदेवासुरसंग्रामेदेवैरभ्यर्थितोसुरांजघानस्वर्गेचकृतप्रियैर्देवैर्वरग्रहणाय
चोदितःप्राहयद्यवश्यंवरोग्राह्यस्तन्ममायुःकथ्यतामित्यनंतरंचतैःकथितेमुहूर्तमात्रमा
युरित्युक्त्वाथास्खलितगतिनाविमानेनलघिमगुणोमर्त्यलोकमागम्येदमाह य
थानब्राह्मणेभ्यस्सकाशादात्मापिमेनप्रियतरोनचस्वधर्मोल्लंघनंमयाकदाचिदप्यनुष्ठितं
नचसकलदेवमानुषपशुवृक्षादिकेष्वच्युतव्यतिरेकवतीदृष्टिर्ममाभूत् तथातमेवदे
वंमुनिजनानुस्मृतंभगवंतमस्खलितगतिःप्राप्येयमित्यशेषदेवगुरौभगवत्यनिर्देश्य
वपुषिसत्तामात्रात्मन्यात्मानंपरमात्मनिवासुदेवाख्येयुयोजतत्रैवचलयमवाप अत्रापि
श्रूयतेश्लोकोगीतस्सप्तर्षिभिःपुरा खट्वांगेनसमोनान्यःकश्चिदुर्व्यांभविष्यति येनस्वर्गादि
हागम्यमुहूर्तंप्राप्यजीवितं त्रयोभिसंधितालोकाबुद्ध्यासत्येनचैवहि खट्वांगाद्दीर्घबाहुः
पुत्रोभवत् ततोरघुरभवत्तस्मादप्यजः अजाद्दशरथः तस्यापिभगवानब्जनाभोजग
तःस्थित्यर्थमात्मांशेनरामलक्ष्मणभरतशत्रुघ्नरूपेणचतुर्धापुत्रत्वमायासीत् रामोपिबा
लएवविश्वामित्रयज्ञरक्षणायगच्छंस्ताटकांजघानयज्ञेचमारीचमिषुवाताहतंवि

श्री
वि·पु·
१४३

कश्चनाम्नं लिक मनुजा [illegible] ब्रूतनस्ते तेनेभ [illegible] महमाव [illegible] दोदकांजलिमजेथा।
यद्दानायोद्यतोभवः [illegible] कुरुतां हि तेनैतं कुलदेवता [illegible] चार्यमाणा [illegible] मदयं
त्मस्वपत्न्याप्रसादितः [illegible] दत्ताय तज्जलमात्मानो वर्धान चकार चिरेपि तेनैव स्वपादौ
मिषेच तेन चास्य कोपाग्निप्रदग्ध [illegible] दयं कल्माषतामवापौ कल्माषतामुपगतौ ततः कल्मा
षपादसंज्ञामवाप। ना [illegible] अपास्य महोस्कालेनैव नात्मस्वभावं प्रत्यस्य पर्यटन्न
नेकशो मानुषानभक्षयत् [illegible] एकदा तु मुनिमृतुकाले भार्यासंगतं ददर्श तयोश्च तम
तिभीषणं राक्षसरूप [illegible] कमानृपाद्रुषम् [illegible] प्रत्युवाच तयोर्ब्राह्मणं जग्राह ततः सा ब्राह्मणी
बहुशस्तमभियाचितवतीं प्रसीद रघुकुलतिलक भूतस्त्वं महाराजमित्रसहो न राक्षसः
नार्हसि स्त्रीधर्मसुखाभिज्ञो ज्ञात्वा कृतार्थाया मामिमं मम भर्तारं हन्तुमित्येवं बहु [illegible] नेकशो
विलपन्त्यास्तं व्याघ्रः पशुमिवाभिमतमरण्येऽभक्षयत् ततश्चातिकोपसमन्विता [illegible]
तौ नेराजानं यस्मादेकमद्यतृप्ताया त्वयायं मत्पतिर्भक्षितः तस्मात्त्वमप्यन्त [illegible] कामो [illegible]
ततः प्राप्स्यसीति शशाप अग्निं प्रविवेश च ततस्तस्य द्वादशाब्दपर्याये विमुक्तशापस्य
विषयाभिलाषिणो मदयन्ती स्मारयामास ततः परमसौ स्त्रीभोगं तत्याज वसिष्ठश्चापुत्रेण
राज्ञा पुत्रार्थमभ्यर्थितो मदयन्त्यां गर्भाधानं चकार यदा च सप्तवर्षाण्यसौ गर्भो न जज्ञे ततस्तं
गर्भमश्मना सा जघान पुत्रश्चाजायत तस्य चाश्मक एव नामाभवत् अश्मकस्य च मूल

दिलीपः पुत्रोऽभवत् दिलीपस्यापि भगीरथो योऽसौ गंगां स्वर्गादिहानीय भागीरथीसंज्ञां च
कार भगीरथात् श्रुतः तस्यापि नाभागः ततोऽम्बरीषः तत्पुत्रश्च सिंधुद्वीपः सिंधुद्वीपादयु-
तायुः तत्पुत्रश्च ऋतुपर्णो नलसहायोऽक्षहृदयज्ञोऽभूत् ऋतुपर्णपुत्रः सर्वकामस्तस्य पुत्र-
सुदासः सुदासात्सौदासः मित्रसहनामा स चाटव्यां मृगयामटन् व्याघ्रद्वयमपश्यत् ता-
भ्यां च तद्वनमपमृगं कृतं मत्वैकं तयोर्बाणेन जघान म्रियमाणश्चासावतिभीषणाकृति-
करालवदनो राक्षसोऽभवत् द्वितीयोऽपि प्रतिक्रियां ते करिष्यामीत्युक्त्वान्तर्धानं जगाम काले-
न गच्छता सौदासो यज्ञमयजत् परिनिष्ठितयज्ञे च वसिष्ठे निष्क्रान्ते तद्रक्षो वसिष्ठरूपमास्थाय
यज्ञावसाने मम मांसभोजनं देयमिति तत्संस्क्रियतां क्षणादागमिष्यामीत्युक्त्वा निष्क्रा-
न्तः भूयः सूदवेषं कृत्वा राजाज्ञया मानुषमांसं संस्कृत्य राज्ञे न्यवेदयत् असावपि हिरण्य-
पात्रे मांसमादाय वसिष्ठागमनप्रतीक्षोऽभवत् आगताय वसिष्ठाय निवेदितवान् स
चाप्यचिन्तयदहो अस्य राज्ञो दौःशील्यं येनैतन्मांसमस्माकं प्रयच्छति किमेतद्द्रव्यजातमि-
ति ध्यानपरोऽभूत् अपश्यच्च तन्मानुषमांसं अतः क्रोधकलुषीकृतचेता राजनि शापमुत्सस-
र्ज यस्मादभोज्यमेतदस्मद्विधानां तपस्विनामवगच्छन्नपि भवान्मह्यं ददाति तस्मात्तवै-
वात्र लोलुपता भविष्यतीति अनन्तरं च तेनापि भगवन् भवतैवाभिहितोऽस्मीत्युक्ते किं
किं मयैवाभिहितमिति पुनरपि समाधौ तस्थौ समाधिविज्ञानावगतार्थश्चानुग्रहं तस्मै च

श्री·
वि·पु·
२४२

निर्बंधेनावनीमेकैकोयोजनंचख्नुःपातालेचाश्वंपरिवर्तमपघनेशरत्का
लेर्कमिवतेजोभिरनवरतमूर्ध्वमधश्चाशेषदिशश्चोद्भासयमानंकपिलर्षिमपश्यन्ततश्चोद्यता
युधादुरात्मानोयमस्मदपकारीयज्ञविघ्नकारीहन्यतांहन्यतामित्यभ्यधावन् ततस्तेना
पिभगवताकिंचिदीषत्परिवर्तितलोचनेनावलोकिताःस्वशरीरसमुत्थेनाग्निनादह्यमा
नाविनेशुःसगरोप्यवगम्याश्वानुसारितत्पुत्रबलमशेषंपरमर्षिकपिलेनतेजसादग्धंततोंशुमं
तमसमंजसःपुत्रमश्वानयनाययुयोजसतुसगरतनयखातमार्गेणकपिलमुपगम्यभक्ति
नम्रस्तथानुष्टाव अथैनंभगवानाह गच्छैनंपितामहायाश्वंप्रापयवरंवृणीष्वचपुत्रपौत्रश्च
तेस्वर्गाद्गंगामानयिष्यतीतिअंशुमानपिब्रह्मदंडहतानामस्माकंपितॄणामस्वर्गिणांस्व·
र्गयोग्यानांस्वर्गप्राप्तिकरंवरमस्माकंभगवान्प्रयच्छत्वित्याह तंचाहभगवानुक्तमेवैतन्म
यापौत्रस्तेत्रिदिवाद्गंगामानयिष्यतीतितदंभसाचसंस्पृष्टेष्वस्थिभस्मस्वेतेस्वर्गमारोक्ष्यंतिभग
वद्विष्णुपादांगुष्ठविनिर्गतस्यजलस्यैतन्माहात्म्यंयन्नकेवलमभिसंधिपूर्वकंस्नानाद्युपभो·
गेषूपकारकमनभिसंधितमप्यपेतप्राणस्यास्थिचर्मस्नायुकेशाद्युपस्पृष्टंशरीरजंयदत्रनिते
मघस्थाशरीरिणांस्वर्गंनयतीत्युक्तःप्रणम्यभगवतेऽश्वमादायपितामहयज्ञमाजगामसगरो
प्यश्वमासाद्यतंयज्ञंसमापयामाससागरंचात्मजप्रीत्यापुत्रत्वेकल्पितवान्तस्यांशुमतो·

मुर्वीप्रकाशमेति ॥ इतिश्रीविष्णुपुराणेब्राह्मेपाराशरीयायांसंहितायांचतुर्थेंशेतृती-
योऽध्यायः ३ पराशरउवाच काश्यपदुहितासुमतिर्विदर्भराजतनयाकेशिनीद्वेभार्येस-
गरस्यास्तां ताभ्यांचापत्यार्थमौर्वःपरमेणसमाधिनाराधितोवरमदात्एकावंशधरमे-
कंपुत्रमपराषष्टिंपुत्रसहस्राणिजनयिष्यतियस्यायदभिमतंतदिच्छयागृह्यतामित्यु-
क्तेऽल्पैरेवाहोभिरेकाकेशिनीपुत्रमेकंसमंजसनामानंवंशधरमसूत सुमतिःविनतायाः तनया-
स्तुसुमत्याःषष्टिःपुत्रसहस्राण्यभवन् तस्मादसमंजसादंशुमान्नामकुमारोजज्ञे-
सत्वसमंजसःबाल्यादेवदुर्वृत्तःपितास्याचिंतयदयमतीतबाल्यःसुबुद्धिर्भविष्यतीत्यथतत्रापिवय-
स्यतीतेसच्चरितमेवैनंपितातत्याजतान्यपिषष्टिःपुत्रसहस्राण्यसमंजसचरित-
मनुचक्रुः ततश्चासमंजसचरितानुकारिभिःसागरैरपध्वस्तयज्ञादिसन्मार्गेजगतिदे-
वाःसकलविद्यामयमसंस्पृष्टमशेषदोषैर्भगवतःपुरुषोत्तमस्यांशभूतंकपिलंप्रण-
म्यतदर्थमूचुः भगवन्नेभिःसगरतनयैरसमंजसचरितमनुगम्यते कथमेवमेभि-
रनुसरद्भिःजगद्भविष्यतीत्यात्तजगत्परित्राणायभगवतोत्रशरीरग्रहणमित्याक-
र्ण्यभगवान् अल्पैरेवदिनैर्विनंक्ष्यंतीत्युक्तवान् अत्रांतरेचसगरोहयमेधमारभे-
तस्यचपुत्रैरधिष्ठितमस्याश्वंकोप्यपहृत्यभुवोबिलंप्रविवेशततस्तत्तनयाश्चाश्वखुर-

श्री
वि·पु·
१४२

नानुगमनं मातरि वेदी भगवानौर्वः स्वाश्रमाभिगम्याब्रवीत् अलमनेनासद्ग्रहेणाखिलभूमं·
डलपतिरतिवीर्यपराक्रमोनेकयज्ञकृदरातिपक्षक्षयकर्त्ता तवोदरे चक्रवर्त्ती तिष्ठति नैवम
तिसाहसाध्यवसायिनी भव इत्युक्ता च सा तस्मादनुमरणनिर्बन्धाद्विरराम तेनैव च भगवता स्वाश्र
ममानीयतात्र कतिपयदिनाभ्यन्तरे च सहैव तेन गरेणातितेजस्वी बालको जज्ञे तस्यौर्वो जातक
र्मादिक्रिया निष्पाद्य सगर इति नाम चकार कृतोपनयनं चैनमौर्वो वेदशास्त्राण्यस्त्रं चाग्नेयं भार्
गवाख्यमध्यापयामास उत्पन्नबुद्धिश्च मातरमप्रक्षत् अम्ब कथय कथमत्र वयं क्व तातः क्व तातो
स्माकमित्येवमादि पृच्छन्तं मातासर्वमेवावोचत् ततश्च पितृराज्यहरणामर्षितो हैहयता
लजंघादिवधाय प्रतिज्ञामकरोत् प्रायशश्च हैहयांजघान शकयवनकांबोज
पारदपह्लवाः हन्यमानास्तत्कुलगुरुं वसिष्ठं शरणं ययुः अथैनान् वसिष्ठो जीवन्मृतकान्कृ
त्वा सगरमाह वत्सालमेभिर्जीवन्मृतकैरनुसृतैरेते च मयैव त्वत्प्रतिज्ञापालनाय·
निजधर्मद्विजसंगपरित्यागं कारिता तथेति तद्गुरुवचनमभिनंद्य तेषां वेषान्यत्वमकारय
त् यवनान्मुंडितशिरसोर्द्धमुंडान् शकान्प्रलम्बकेशान् पारदान् पह्लवांश्च श्मश्रुधरान् निः
स्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार ते चात्मधर्मपरित्यागाद्ब्राह्मणैः परि
त्यक्ता म्लेच्छतां ययुः सगरोपि स्वमधिष्ठानमागम्य अस्खलितचक्रः सप्तद्वीपामिमां·

लगोधवां जघान पुनश्च स्वपुरमाजगाम सकलपन्नगपतयश्च नर्मदायै वरं ददुः पन्नगेन सम
रणसमये तेनामग्रहणेन विषाणि न समर्थविषभयं भविष्यति तत्रायं श्लोकाः नर्मदायै
नमः प्रातः नर्मदायै नमो निशि नमोस्तु नर्मदे तुभ्यं त्राहि मां सर्पजातिभ्यः इत्युच्चार्यमहर्नि
शं अंधकारप्रवेशो वा सर्पैर्नदश्यते न चापि कृतानुस्मरणभुजो विषमपि भुक्तमुपघाताय भव
ति पुरुकुत्साय च संततिविच्छेदो न भवतो भविष्यतीत्युरगपतयो वरं ददुः पुरुकुत्सो नर्मदा
यां त्रसद्दस्युमजीजनत् त्रसद्दस्युतः संभूतो नरण्यः तस्माद्वृहदश्वः तस्माद्विजयः निजत्रानश्च नरण्य
स्य हर्यश्वः पुत्रोभवत् ततश्च वसुमनास्तस्मात्त्रिधन्वा त्रिधन्वनः त्रय्यारुणिः
त्रय्यारुणात्सत्यव्रतः द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रकलत्रापत्यपोषणार्थं चण्डाल
प्रतिग्रहपरिहरणाय च जाह्नवीतीरन्यग्रोधे मृगमांसमनुदिनं बबंध परितुष्टेन च वि
श्वामित्रेण सशरीरः स्वर्गमारोपितः त्रिशंकोर्हरिश्चन्द्रस्तस्माद्रोहिताश्वः ततश्च हरितो
हरितस्य चञ्चुः चञ्चोर्विजयः तस्माद्रुरुकः रुरुकाद्वृकः वृकाद्बाहुः सोपि
हैहयतालजंघादिभिः पराजितोन्तर्वत्न्या महिष्या सह वनं प्रविवेश तस्याश्च सपत्न्या गर्भस्तं
भनाय गरो दत्तः तेनास्या गर्भः सप्तवर्षाणि जठर एव तस्थौ स च बाहुः वृद्धभावादौर्वाश्रम
समीपे ममार सा तस्य भार्या चितिं कृत्वा तामारोप्यानुमरणकृतनिश्चयाभूदथैनामतमती

श्री
वि·पु·
९४

त्सकलपापः परिपक्वमनोवृत्तिरात्मन्यग्नीन्समारोप्य भिक्षुरभवत् भगवत्यासज्याखिलं
कर्मकलापं हित्वानन्तमजमनादिनिधनमविकारमरणादिधर्ममवाप परमनन्तं परमं पदमित्येतन्मा
धातुर्दुहितृसंबन्धात्सौभरिचरितं व्याख्यातं य इदं सौभरिचरितमनुस्मरति पठति शृणोति धारयति
लिखति लेखयति तस्याष्टौ जन्मान्यसत्संततिरसद्धर्मो वाङ्मनसोर्वा सन्मार्गानुसरणमशेषहे
तोषु वा ममत्वं न भवति ॥ अतः परं मान्धातुः पुत्रसंततिरभिधीयते ॥ अम्बरीषस्य मान्धातुस्त
नयस्य युवनाश्वः पुत्रोऽभूत् तस्माद्धारीतो यतोऽङ्गिरसो हारीतान्वयाः ॥ रसातले च मौनेया नाम गन्धर्वा
बभूवुः षट्कोटिसंख्यास्तैरशेषाणि नागकुलान्यपहृतप्रधानरत्नाधिपत्यान्यक्रि
यन्त तैश्च गंधर्ववीर्यावधूतैरुरगेश्वरैः स्तूयमानो भगवानशेषदेवेशस्तत्स्तवश्रवणोन्मीलितोन्निद्र
पुण्डरीकनयनो जलशयनो निद्रावसानात्प्रबुद्धः प्रणिपत्याभिहितः भगवन्नस्माकमेते
भ्यो गंधर्वेभ्यो भयमुत्पन्नं कथमुपशममेष्यतीत्याह भगवाननादिपुरुषः पुरुषोत्तमः योऽसौ यौव
नाश्वस्य मान्धातुः पुरुकुत्सनामा पुत्रस्तमहमनुप्रविश्य तानशेषान्दुष्टगंधर्वानुपशमं
नयिष्यामीत्याकर्ण्य भगवते कृतप्रणामाः पुनर्नागलोकमागताः पन्नगाधिपतयः न
र्मदां पुरुकुत्सानयनाय चोदयामासुः सा चैनं यौवनाश्वस्य मान्धातुः पुरुकुत्सनामानं पुत्रम
पहृत्य रसातलं नीतवती रसातलगतश्चासौ भगवत्तेजसाप्यायितात्मवीर्यः सकल

ंपरिग्रहोन्याश्चमहान्भवितान्मा ॥ दुःखंयदैवैकशरीरजन्मशतार्द्धसंख्यंतदिदंप्रसूतं परि
ग्रहेणक्षितिपात्मजानांसुतैरनेकैर्बहुलीकृतंतत् ॥ सुतात्मजैस्तत्तनयैश्चभूयोभूयश्चतेषां
स्वपरिग्रहेण ॥ विस्तारमेष्यत्यतिदुःखहेतुःपरिग्रहोवैममताभिधानः ॥ चीर्णंतपोयत्तुज-
लाश्रयेणतस्यर्द्धिरेषातपसोन्तरायः ॥ मत्स्यप्रसंगादभवच्चयोमेसुतादिरागोमुषितोस्मि
तेन ॥ निःसंगतामुक्तिपदंयतीनांसंगादशेषाःप्रभवंतिदोषाः ॥ आरूढयोगोपिनिपात्य-
तेधःसंगेनयोगीकिमुताल्पसिद्धिः ॥ अहंचरिष्यामितदात्मनोर्थंपरिग्रहग्राहगृहीतबु-
द्धिः ॥ यथाहिभूयःपरिहीनदोषोजनस्यदुःखैर्भवितानदुःखी ॥ सर्वस्यधातारमचिंत्यरूपम
णोरणीयांसमतिप्रमाणं ॥ सितासितंचेश्वरमीश्वराणामाराधयिष्येतपसैवविष्णुं ॥ त
स्मिन्नशेषौजसिसर्वरूपिण्यव्यक्तविस्पष्टतनावनंते ॥ ममाचलंचित्तमपेतदोषंसदास्तुवि
ष्णावभवायभूयः ॥ समस्तभूतादमलादनंतात्सर्वेश्वरादन्यदनादिमध्यात् ॥ यस्मान्नकिं
चित्तमहंगुरूणांपरंगुरुंसंश्रयमेमिविष्णुं ॥ इतिश्रीविष्णुपुराणेब्राह्मांडेपाराशरीयायां
संहितायांचतुर्थेंशेद्वितीयोध्यायः २ श्रीपराशरउवाच ॥ इत्यात्मानमात्मनैवाभिधायासौ
सौभरिरपहायपुत्रगृहासनशयनपरिच्छदादिकमशेषमर्थजातंसकलभार्यासम
वेतोवनंप्रविवेश ॥ तत्राप्यनुदिनंवैखानसनिष्पाद्यमशेषक्रियाकलापंनिष्पाद्यक्षपि-

श्री
वि॰ पु॰
२३५

न्सर्वाभिस्ताभिरभिहितः परितोषविस्मयनिर्भरविकसद्धृदयो भगवन्तंसौभरिमेकान्ता
वस्थितमपेत्य कृतपूजोब्रवीत् दृष्टस्ते भगवन्सुमहानेषसिद्धिप्रभावो नैवंविधमन्यस्य
कस्यचिदस्माभिर्विभूतिविलसितमुपलक्षितं किंयदेतद्भवत्तपसः फलं इत्यभिपूज्यतमृ
षिंतत्रैवतेनऋषिवर्येणसहकिंचित्कालमभिमतोपभोगाननुभुजेनृपस्स्वपुरंजगाम काले
नचगच्छतातस्याराजतनयासुपुत्रशतंसार्धमभवत् अनुदिनानुरूढस्नेहप्रभवश्चसतत्राती
वममताकृष्टहृदयोभवत् अप्येतेस्मत्पुत्राबालभाषिणः पद्भ्यांगच्छेयुः अप्येतेयौवनिनोभ
र्यायुपिकृतदारानपश्येयम् अप्येषांपुत्राभवेयुरप्येतान्पुत्रपौत्रसमन्वितान्पश्येयुरिम
तिमनोरथाननुदिनकालसम्पत्तिप्रवृद्धानवेक्ष्यैतत्संचिन्तयामास अहोमेमोहस्यातिविस्त
रः॥ मनोरथानांनसमाप्तिरस्तिवर्षायुतेनाप्यथवाप्यतोवै पूर्णेषुपूर्णेषुपुनर्नवानामु
त्पत्तयस्संतिमनोरथानां पद्भ्यांगतायौवनिनश्चजातादारैश्चसंयोगमिताः प्रसूताः दृ
ष्टास्सुतास्तत्तनयप्रसूतिंद्रष्टुंपुनर्वांछतिमेन्तरात्मा द्रक्ष्यामितेषामपिचेत्प्रसूतिंमनो
रथोमेभवितान्ततोन्यः पूर्णेपितत्राप्यपरस्यजन्मनिवार्यतेकेनमनोरथस्य आमृत्युतोनै
वमनोरथानामन्तोस्तिविज्ञातमिदंमयाद्य मनोरथासक्तिपरस्यचित्तंनजायतेवैपरमार्थ
संगि समेसमाधिर्जलवासमित्रमत्स्यप्रसंगात्सहसैवनष्टः परिग्रहःसंगकृतोममायं

रन्नभक्ष्यभोज्यलेह्याद्युपभोगैरागतानागतानभ्यादीन् बहूनि यामशोषपुरहेधुनाः स्विनीसद्रुहिन
रोभजयामास: एकदा द्रुहिन स्नेहाकृष्टहृदयः समहीपतिर्विनिद्रः स्विनास्वस्या स्विना॰
वार तिनस्य महर्षेराश्रममुपेत्य सुन्दरसुमाला स्फटिकमया प्रासादमाला मणिरत्नोप
वनजलाशयान् दृष्ट्वा प्रविश्य चैकं प्रासादं स्मात्तत्रापरिग्रहस्यकनासनपरिग्रहः प्रहृष्टस्ते
हृनयनो द्रुहिणोऽब्रवीत् भगवन्नेवमेव मास्य त्वमनेन किंचिदस्य त्वमपि नेम महर्षिः स्नेहवा
न्नेनेस्मयेने स्मद्रुहिवा समित्युक्तानन्तनयापि नरमाह नानानिरम्परमणीयः प्रासादो॰
द्यानि मनोरममुपवनमतिकल्पवायां विहंगाभिरता प्रफुल्लपद्माकरजलाशयाः मनोज्ञ
कुलोभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगोऽस्त्हि शयनासनानि सर्वं संपन्नमवेन
मेनद्राहेऽस्यनयापि केनवाजन्मभूमेने स्मयेनेतन्प्रसादादिदमशेषमिति शोभने किं त्वे
केममैनद्रुः एवकारणायदस्मद्रुहान्महर्षिरयं मद्गतो न निष्क्रामति ममैव केवलमति॰
प्रीत्यास्मत्समीपपरिवर्तीनान्यामाम स्मद्रागिणीनामेव च मम महोदराद्रुः विनाऽन्येवमतो
वद्रुः एवकारणामित्युक्तस्तयाद्रुहिनीयं प्रसादमुपेत्य तनयोपरिष्टेपविष्टस्तथैवाह
ष्ट्वानन्नयापि च सर्वमेवतत्प्रसादादुपभोगसारत्वमाख्यानं ममैव केवले पार्श्वपरिवर्ति
नामस्मद्रागिणीनामित्येवमादिष्कन्नासमस्तप्रसादेषु राजा प्रविश्यानन्तयानथैवाहृष्ट

रं प्रवेश्य च तमृषिमंतःपुरवर्षवरः सकन्याः प्राह भवतीनां जनयिता महाराजः समाज्ञापय
त्ययमस्मान्ब्रह्मर्षिः कन्यार्थी समभ्यागतो मया चास्य प्रतिज्ञातं यद्यस्मत्कन्या काचिद्भगवंतं वरि
यति तत्कन्यायाश्छंदे नाहं परिपंथानं करिष्यामीत्याकर्ण्य सर्वा एव ताः कन्याः सानुरागाः समन्मथाः
करेणव इवेभयूथपतिं तमृषिमहमहमिकया वरयांबभूवुरूचुश्च अलं भगिन्योहमिमं
वृणोमि वृणोम्यहं नैष तवानुरूपः ममैव भर्त्ता विधिनैष सृष्टः सृष्टाहमस्योपशमं प्रयाहि
वृतो मयायं प्रथमं मयायं गृहं विशन्नेव विहन्यसे किं मया मयेति क्षितिपात्मजानां तदर्थ-
मत्यर्थकलिर्बभूव यदा स सर्वाभिरतीव हार्दाद्वृतः स कन्याभिरनिंद्यकीर्त्तिः तदा स क
न्याधिकृतो नृपाय यथावदाचष्ट विनम्रमूर्त्तिः तदवगम्य किं किमेतत्किं करोमि किं म-
याभिहितमित्याकुलमतिरनिच्छन्नपि कथमपि राजानुमेने कृतानुरूपविवाहश्च महर्षिः
सकला एव ताः कन्याः स्वमाश्रममेवानयत् तत्र चाशेषशिल्पिकल्पप्रणेतारं धातारमि
वान्यं विश्वकर्माणमाहूय सकलकन्यानामेकैकस्याः प्रोत्फुल्लपंकजाः कूजत्कलहंसकारं-
डवादिविहंगमाभिरामजलाशयाः सोपवनाः सावकाशाः साधुशय्यापरिच्छदाः प्रासादाः
क्रियंतामित्यादिदेश तेन च तथैवानुष्ठितमशेषशिल्पविशेषाचार्यस्त्वष्टा दर्शितवान् ततश्च
परमर्षिणा सौभरिणानुज्ञातास्तेषु गृहेष्वनपायी नंदो महापद्मनिधिरासांचक्रे ततोनव

नेत्राभ्यामिंदुकलेनेशानानंसंख्यास्तवसंतिकन्या तस्यामपेकांतरपनेश्चयच्छ्रयत्यार्थनाभं
गभयाद्विभेमि तस्मादहंराजवानिद्र:खान परामाव: इत्येवमृषिवचनमाकर्ण्य राजा
नगाजजेतिनदेहं नमाषिमालोक्य प्रत्याख्यानकातरः तस्मात्तवशाश्वतो विभ्यात्किंचिदयोमु॰
त्वचिरंदयो ऋषिरुवाच नरेंद्रकस्मात्समुपेपिचिंतामशोकामुक्तं नमयात्रकिंचित याव
श्यदेयानतयालयेवकुलार्थनानोयदिकिंतलं अथतस्य भगाव नः शापाभीतस्य प्रश्नय
स्तमुवाचसो राजा राजोवाच भगवन्न समस्तकुले कन्यानिति यत्र वक्तव्या याश्रमिहविना
भिजनवान्यरः तस्मैकन्यादीयते भगवदाशावास्मन्मनोरथानामप्यगोचरं तत्रिनीक
यमप्येषासंज्ञानातदेवमवस्थितेन विप्र: किंकत्रयइत्येतन्मयाचिंत्यनइत्यभिहितेचने॰
नभूभुजामुनिरचिंतयदयमन्योसमस्तत्वाख्यानोपायोहृद्गोयमनभिमतः स्त्रीणां किम्
तकन्यानामिप्यमनासंविन्यनदभिहितमेवसत्तनयाकारिष्यामीतिसंचिंत्यमाथानार
मुवाच: यद्येवमुदादिश्यतामस्माकं कन्यानः पुरववंशवीर्यदिकन्यैवकाचिन्मामभि॰
लषितिनदहेदारसे `` हकरिष्यामीत्यन्यथावेत्तदलमस्माकमेतेनानीनकालांतभेणार
मुक्तावियरामनल्लश्रमान्याश्रमुनिसापर्शाकितेन कन्यावर्षवरस्समाजन्नः सोभरिरपि
कन्यान:पुरंप्रविशनेवमगवन्नाविलसिद्धगंधर्वेमनुष्योअतिशयेनकमनीयरूपमक॰

श्री
वि॰पु॰
१३२

तिष्ठति सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते मांधाता च शशबिंदुदुहितरं बिंदुमतीमुपयं
मे पुरुकुत्समंबरीषमुचुकुंदं च तस्यां पुत्रत्रयमुत्पादयामास पंचाशद्दुहितरस्तस्यामेव तस्य
नृपतेर्बभूवुः बह्वृचश्च सौभरिर्नाम महर्षिरंतर्जले द्वादशाब्दकालमुवास तत्र चांतर्जले संम
दो नामातिबहुप्रजोतिप्रमाणो मीनाधिपतिरासीत् तस्य पुत्रपौत्रदौहित्राः पृष्ठतोग्रतः पा
र्श्वयोः पक्षपुच्छशिरसां चोपरि भ्रमंतस्तेनैव सदाहर्निशमतिनिर्वृता रेमिरे स चापि तत्स्पर्शोप
चीयमानहर्षप्रकर्षो बहुप्रकारं तस्य ऋषेः पश्यतस्तैरात्मजपुत्रपौत्रदौहित्रादिभिः सहानुदिनं रेमे
अथांतर्जलावस्थितः सौभरिरेकाग्रतः समाधानमपहायानुदिनं तस्य मत्स्यस्यात्मजपुत्रपौत्रदौ
हित्रादिभिः सहातिरमणीयतामवेक्ष्याचिंतयत् अहो धन्योयमीदृशमनभिमतं योन्यंत
रमवाप्यैभिरात्मजपुत्रपौत्रदौहित्रादिभिः सह रममाणोतीवास्माकं स्पृहामुत्पादयति वय
मेवं पुत्रादिभिः सह रमिष्याम इत्येवाभिसमीक्ष्य स तस्मादंतर्जलान्निष्क्रम्य निवेष्टुकामः क
न्यार्थं मांधातारं राजानमगच्छत् आगमनश्रवणसमनंतरं चोत्थाय तेन राज्ञा सम्यगर्घ्यादि
ना पूजितः कृतासनपरिग्रहः सौभरिरुवाच राजानं सौभरिः निवेष्टुकामोस्मि नरेंद्र कन्यां
प्रयच्छ मे मा प्रणयं विभांक्षीः न ह्यर्थिनः कार्यवशाभ्युपेताः काकुत्स्थवंशे विमुखाः प्रयांति
अन्येपि संत्येव नृपाः पृथिव्यां मांधातरेषां तनयाः प्रसूताः किं त्वर्थिनामर्थितदानदीक्षा कृतव्र

पितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान धुंधुमारसंज्ञामवाप तस्य च समस्ता
एव पुत्राः धुंधुमुखनिःश्वासाग्निविप्लुष्टा विनेशुः दृढाश्वः चंद्राश्वः कपिलाश्वश्च त्रयः के
वलमवशेषिताः दृढाश्वाद्धर्यश्वस्तस्माच्च निकुंभो निकुंभस्य संहताश्वः ततश्च कृशाश्वः
तस्माच्च प्रसेनजित्तस्माद्युवनाश्वोभवत् तस्य चापुत्रस्यातिनिर्वेदान्मुनीनामाश्रममंड
ले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता तस्यां च मध्यरात्रौ निवृत्तायां
मंत्रपूतजलपूर्णं कलशं वेदीमध्ये निवेश्य ते मुनयः सुषुपुः सुप्तेषु तेषु अतीव तृट्परीतः स
भूपालस्तमाश्रमं विवेश सुप्तांश्च तानृषीन्नैवोत्थापयामास तच्च कलशजलमपरिमेय
माहात्म्यं मंत्रपूतं पपौ प्रबुद्धाश्च ऋषयः पप्रछुः केनैतन्मंत्रपूतं वारि पीतं अत्र हि पीते राज्ञोस्य
युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यतीत्याकर्ण्य स राजा अजानता मया पीतमि
त्याह गर्भश्च युवनाश्वस्योदरेभवत्क्रमेण च ववृधे प्राप्तसमयश्च दक्षिणं कुक्षिमवनिपते
र्निर्भिद्य निश्चक्राम न चासौ राजा ममार जातो नामैष कं धास्यतीति ते मुनयः
प्रोचुः अथागम्य देवराडब्रवीत् मामयं धास्यति मामयं धास्यतीति ततो मांधाता नामा सोभ
वत् वक्त्रे चास्य प्रदेशिनी देवेंद्रेण न्यस्ता तां चामृतस्राविणीमास्वाद्याह्नैव व्यवर्धत ततश्च मां
धाता चक्रवर्ती सप्तद्वीपां महीं बुभुजे भवति चात्र श्लोकः यावत्सूर्य उदेति स्म यावच्च प्रति

जिताः भगवंतंविष्णुमाराधयामासुः प्रसन्नश्चदेवानामनादिनिधनस्सकलजगत्परायणो॰
नारायणः प्राह ज्ञातमेवंमयायुष्माभिर्यदभिलषितंतेनतदर्थमिदंश्रूयतांपुरंजयोहिनामश
शादस्यराजर्षेस्तनयः क्षत्रियवर्यस्तच्छरीरोहंमंशेनस्वयमेवावतीर्यतानशेषानसुरा॰
न्निहनिष्यामितद्भवद्भिः पुरंजयोसुरवधार्थंसहायः कार्योद्योगकार्येनामित्येतच्छ्रुत्वाप्र
णम्यभगवंतंविष्णुममराः पुरंजयसकाशमाजग्मुः ऊचुश्चैनंभोःभोः क्षत्रियवर्यास्माभिर
भ्यर्थितेनभवताचास्माकमरातिवधोद्यतानांसाहाय्यंकर्तव्यमिच्छामः तद्भवतास्माकम
भ्यागतानांप्रणयभंगोनकार्यइत्युक्तः पुरंजयः प्राह सकलत्रैलोक्यनाथोयोयंयुष्माक
मिंद्रःशतक्रतुरस्ययद्यहंस्कंधाधिरूढोयुष्मदरातिभिस्सहयोत्स्येतदहंभवतांसहायस्स्यां॰
कर्ण्यसमस्तदेवैरिंद्रेणचबाढमित्येवमेवसमन्विच्छितं ततश्चशतक्रतोर्वृषभरूपधारिण
स्ककुत्स्थोहर्षसमन्वितोभगवतश्चराचरगुरोरच्युतस्यतेजसाप्यायितोदेवासुरसंग्रामे
समस्तानेवासुरान्निजघानयतश्चवृषभककुत्स्थेनतेनराज्ञासुरान्निषूदितमतश्चासौककुत्स्थ
संज्ञामवाप ककुत्स्थस्याप्यनेनाः पुत्रोभूत्पृथुरनेनसः पृथोर्विष्टराश्वः तस्यापिचान्द्रो युवा॰
नाश्वश्चान्द्रस्य तस्यचशावस्तोयः पुरींश्रावस्तींनिवेशयामासशावस्तस्यबृहदश्वः तस्मा॰
त्कुवलयाश्वोयोसावुदकस्यमहर्षेरपकारिणंधुन्धुनामानमसुरंवैष्णवेनतेजसाप्या

पाताषारउवाच पुरावत्तुब्रह्मलोकार्के कृतौरोवनोनाम्बेतिनाबन्धुण्यजनन संज्ञाराजत्सा स्त्वा॰
मस्यपुरीकुशस्थलीजनुः उत्थास्यश्रान्तशानपुण्यजननाम्साहिशोभजे नटन्वयाश्चत्रियाः
सर्वेदिलभवनपृष्टस्यपार्श्वे यन्त्रभवननभगस्यात्मजोनाभागसंज्ञोभवत् नस्यस्वरीश:
ग्रंबरीशम्याधिविरूपोभूतविरूपात्पृषदश्वोजज्ञे ननश्चरथीनरः श्रत्रायंश्लोकः एतेत्त्र
क्षत्रनावोपुनश्चांगिरसःस्मृताः रथीतराणांप्रवरा त्तत्रोपेनाद्दिजातयः त्तवनस्यमनोरि
त्वाकुः प्राणानात्पुत्रोजज्ञे नस्यपुत्रशतप्रवरा: विकुक्षिनिमिदंडाख्यः पुत्राःशाकुनिप्रमु॰
खाःपंचाशत्पुत्राः उत्तरापथवाक्षिनोवभूवुः चत्वारिंशत्पञ्चवद क्षिणापथभूपालाःसवे
त्वाकुरष्टकायाम्नपाद्यश्राद्धार्थंमांसमानयेति विकुक्षिमाज्ञापयामास सनथीतिगृही
नात्मावनमध्येप्यानेकान्मृगान्हत्वाश्रान्तोक्षुधान्वितोनाविकुक्षिरेकंशशमभक्षयत्
शेषंचमांसमानीयपित्रेनिवेदयामास इत्त्वाकुनाप्याचार्यंवसिष्ठश्चो॰
दितःप्राहस्थलमनेनामध्येनामिषेणदुरात्मनानेनपुत्रेणनन्मांसमुपहतंयतोनेनश
शोभक्षितः ततश्चासौविकुक्षिर्गुरुणाविसृष्टः शशादसंज्ञामवापपित्रापिचपरित्यक्तःपि
तर्युपरतेचाखिलमेतां पृथ्वीधर्मेणशशासशशादस्यपुत्रःपुरंजयोनामपुत्रोभवत्इदंचान्य
त्पुराहित्रेतायांदेवासुरमतीवातिभीषणयुद्धमासीत् तत्रातिबलिभिरसुरैरमराःपरा

नपरंप्रभावं नचैवसारं परमेश्वरस्य कलामुहूर्तादिमयश्चकालो नयद्विभूतेःपरिणामहेतुः
अजन्मनाशस्यसमस्तमूर्तेरनामरूपस्यसनातनस्य यस्यप्रसादादहमच्युतस्य भूतःप्रजासृष्टि
करोंतकारी क्रोधाच्चरुद्रःस्थितिहेतुभूतो यस्माच्चमध्येपुरुषःपरस्तात् मद्रूपमास्थायसृ
जत्यजोयःस्थितौचयोसौपुरुषस्वरूपी रुद्रस्वरूपीचकरोतिविश्वं धत्तेतथानंतवपुःसमस्तं
शक्रादिरूपीपरिपातिविश्वमर्केंदुरूपश्चतमोहिनस्ति पाकायभोग्निस्वरूपतिलोकानिभ
र्तिपृथ्वीवपुरव्ययात्मा चेष्टांकरोतिश्वसनस्वरूपी लोकस्यतृप्तिंचजलान्नरूपी ददातिवि
श्वस्थितिसंस्थितस्सनावकाशंचनभःस्वरूपी यःसृज्यतेसर्वकृदात्मनैवयःपाल्यतेपाल
यिताचदेवः विश्वात्मकःसंहृयतेंतकारी पृथक्त्रयस्यास्यचयोव्ययात्मा यस्मिंजगद्योजग
देतदाद्योयश्चाश्रितोस्मिंजगतिस्वयंभूः ससर्वभूतप्रभवोधरित्र्याःस्वांशेनविष्णुर्नृपतेवतीर्णः
कुशस्थलीयातवभूपपूर्वा पुरीपुरासीदमरावतीव साद्वारकासंप्रतितत्रचांशःसबलदेवो
नामबलदेवनामा तस्मैत्वमेतांतनयांनरेंद्र प्रयच्छमायामनुजायजाया श्लाघ्योवरो
सौतनयातवेयंस्त्रीरत्नभूतासदृशोहियोगः पराशरः इतीरितोसौकमलोद्भवेनभु
वंसमासाद्यपतिःप्रजानां ददर्शह्रस्वान्पुरुषानशेषानल्पौजसःस्वल्पविवेकवीर्यान्
कुशस्थलींतांचपुरीमुपेत्य दृष्ट्वान्यरूपांप्रददौसकन्यां सीरध्वजायस्फटिकाचलाभ
वक्षस्थलायातलतुंगरम्या नत्रप्रमाणामितितामवेक्ष्य स्वलांगलाग्रेणसतालकेतुः वि
नामयामासततश्चसापि बभूवसद्योवनितायथान्या तांरेवतींरैवतभूपकन्यां सीरायुधो
सौविधिनोपयेमे दत्त्वाचकन्यांसनृपोजगाम हिमालयंवैतपसेधृतात्मा ॥ इतिश्रीवि
ष्णुपुराणेचतुर्थांशेपाराशरीयायांसंहितायांचतुर्थेप्रथमोध्यायः १ ॥ ॥

पंचनौ निष्पामिका। शाखोनेकन्यासु कन्याभवत्। यामुपयेमेश्रवणत्रातानेत्रनामपरमधा
र्मिकः शाखोविप्रजोभूत्तानजस्याधिनेवननामापुत्रोजनतेयेसावाननेविषयंतुभुंजे पुरीयकः
शाल्मलीमधुवासंवेनस्यापिनेवनः पुत्रककुमोनामथमानाभुानस्यानस्येहोभवत् न
स्येवर्णीनामकन्यानामाह्यकस्यैदेयानि भगवतेनमद्रयोनि श्रुत्वजगामनावब्राह्मः
लौकिकेहाहाहहसंहाभ्योगंधर्वोभ्यामनितानेनामदिव्यंगांधर्वेसगीयत ननस्त्रि
मानपरिवर्तनेरनेकपुरापरिवृत्तिमपिरेवेननामासृगवन्मदृष्टमेभिवसेनगीतावमानव
भगवतेनमद्रयोनिप्रलम्बेरवनः कन्यायोग्यवरमपश्चन नेवाहभगवान्कथयकोभि
मतस्तेवरः इतिश्रुत्वाप्रणम्यभगवतेनतस्यैयथाभिमतानाम्नः वरान्कथयामासक
थंभगवतोभिमतः इतिसंकन्याभिमोश्रयखलमीलितनः किंचिरवननशिरसाभि
तेभगवाननद्रयोनिराह यदानेभवतोभिमतानेनवांसाम्प्रतमपत्यार्थसेनतिरवनि
तलेस्मि बहूनिदिव्यानेनरत्नाधवेसूणनश्चनपुंसान्यतानानि सांप्रतेहिभूतलेसुखा
विशालनामसप्तमनोर्ज्ञनपुरमवनीन्याथमामसगोहिनत्रकालिरंसस्यैकन्यारत्नामिदंभ
वतेकाकिनाद्येयं भवतोपिपित्रसंनिभृतकलत्रवंधुवलकोशाधममस्ताःकालेनैतस्म
न्सनमतीनाम्नः पुनरप्युत्पन्नसाध्वसः सगजाभगवतेप्रणम्य पप्रच्छभगवन्नेवमवस्य
समयेकस्मैदेयानि ननस्तभगवान्किंचित्प्रत्युक्तंथरः कृतांजलीर्भूत्वेसर्वलोकगुरुरभाज
णभकः यमदुवाच नवालतिनिजवर्णधर्मतोयस्समनिरामेसहृद्विपदपदे
नहरतिनवहेनिकिंचित्तस्मिन्मनसैतमवेहि विष्णुभक्तं कलिकलुषहरे
णयस्यकर्मो विमलमतेविमलीकृतःशमेनमनसि कृतजनार्दनेमनुष्यसतत
मवेहि हरेरतीवभक्तं कनकमपिरहस्यवीक्ष्यबुद्ध्यातृणमिवयस्समवैतिवप
रस्वं भवतिचभगवतिअनन्यचेताः पुरुषवरातमवेहि विष्णुभक्तं स्फुटिकर
गिरिशिलामलकविष्णुर्मनसितृणांकचमर्मरास्थितोघः नहितहितमग्रावर
स्पिमृजेगेलतिह्नतायानदीप्तिजःप्रभावः विमलमतिरसमंस्मरःप्रशान्तसुविव
तिनाविलसद्वमिवभूतः प्रियहितवचनोत्तमानमायोवसतिसदाहदितस्या॰

वासुदेवः वसति हृदि सनातने च तस्मिन्भवति पुमाञ्जगतोस्य सौम्यरूपः क्षिति
रसंनिरम्यमात्मनोन्तकथयति चारुतयाव सालपोतः यमनियमविधूतकल्मषा
णामनुदिनमच्युतसक्तमानसानां अपगतमदमानमत्सराणां व्रजभट दूरतरे
णमानवानां हृदियदिभगवाननादिरास्ते हरिरसिशंखगदाधरोऽव्ययात्मा
नस्तदघमघविघातकर्तृभिन्नं भवति कथं सति वान्धकारमर्के हरति परधनानि हं
ति जन्तून्वदति तथानृतनिष्ठुराणि यश्च अशुभजनितदुर्मदस्य पुंसः कलुषम
तेर्हृदि तस्य नास्त्यनन्तः न सहति परसंपदं विनिंदां कलुषमतिः कुरुते सतामसाधुः
साधुः न यजति न ददाति यश्च सन्तं मनसि न तस्य जनार्दनोऽधमस्य परमसुहृ
दि बांधवे कलत्रे सुतपितृमातृवर्गे शठमतिरुपयाति योऽर्थतृष्णां तमधमचेष्ट
मवेहि नास्य भक्तं अशुभमतिरसत्प्रवृत्तिसक्तः सततमनार्यविशीलसंग
मत्तः अनुदिनमघविधायकर्मयातः पुरुषपशुर्नहि वासुदेवभक्तः सकलमि
दमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः इति मतिरमला भवति अनन्ते
हृदयगते व्रज तान्विहाय दूरात् कमलनयन वासुदेव विष्णो धरणिधराच्यु
त शंखचक्रपाणे भवशरणमितीरयन्ति ये वै त्यजभट दूरतरेण तानपापान्

वि॰
पु॰
१२२

वसतिमनसियस्यसोव्ययात्मापुरुषवरस्यननतस्यदृष्टिपाते तवगतिरथवास्य
मात्तिचक्रप्रतिहतबाशबलस्यसोन्यलोकः कलिंगउवाच इतिनिजभटशास
नायदेवो रवितनयस्मकिलाहधर्मराजः ममकथितमिदंचतेनतभ्यंकुरुवरस
म्यगिदंमयापिचोक्तं भीष्मः नकुलेतन्ममाख्यातंपूर्वंतेनद्विजन्मना कलिंगा
देशादभ्येत्यप्रीयतस्वमहात्मना मयाप्येतद्यथान्यायंसम्यग्वत्सतवोदितं यथा
विष्णुमनन्यस्यासंसारसागरे किंकराःपाशहस्ताश्चनयमोनचयातनाः स
मर्थास्तस्ययस्यात्मा केशवालंबनस्सदा पाराशरः एतन्मुनेसमाख्यातंगीतं
वैवस्वतेनयत् त्वत्प्रश्नानुगतेसम्यक् किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इतिश्री
विष्णुपुराणेतृतीयांशेपाराशरीयायांसंहितायांत्रतीयेंशेसप्तमोध्यायः ७ ॥ मै
त्रेयः ॥ भगवन्भगवान्देवःसंसारविजिगीषुभिः समाख्याहिजगन्नाथोविष्णुरा
राध्यतेयथा आराधितान्नगोविंदादाराधनपरैर्नरैः यत्प्राप्यतेफलंश्रोतुंतच्चे
च्छामिमहामुने ॥ पराशरउवाच ॥ यत्पृच्छतिभवानेतत्सगरेणमहात्मना औ
र्वमाहयथापृष्टस्तन्मेकथयतःशृणु सगरःप्रणिपात्यैनमौर्वंपप्रच्छभार्गवं
विष्णोराराधनोपायसंबंधंमुनिसत्तम फलंचाराधितेविष्णौयत्पुंसामभिजायते

जनः नचदारुणि सर्वस्त्वां ब्रवीति शिविकागतिम् शिविकादारुसंघातो रचनास्थि
तिसंस्थितः अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिविका त्वया एवं छत्रशलाकानां पृथग्भा
वे विमृश्यते क्व यातिछत्रमित्येष न्यायस्त्वयि तथा मयि पुमान्स्त्री गौरजो वाजी कुंज
रो विहगस्तरुः देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु पुमान्न देवो न नरो न पशुर्न च पा
दपः शरीराकृतिभेदास्तु भूपैते कर्मयोनयः वस्तु राजेति यल्लोके यच्च राजभटात्म
कम् तथान्यच्च नृपेत्थं तन्न सत्संकल्पनामयम् यत्तु कालान्तरेणापि नान्यां संज्ञा
मुपैति वै परिणामादिसंभूतं तद्वस्तु नृपते च किम् त्वं राजा सर्वलोकस्य पितुः पुत्रो
रिपोरिपुः पत्न्याः पतिः पिता सूनोः कं त्वां भूप वदाम्यहम् त्वं किमेवं स्थितः किंनु
शिरस्तव तथोदरम् किमु पादादिकं त्वं वै तवैतत्किं महीपते समस्तावयवेभ्य
स्त्वं पृथग्भूप व्यवस्थितः कोहमित्येव निपुणो भूत्वा चिंतय पार्थिव स्थिते तत्त्वे एवं
व्यव मयाहमिति भाषितम् पृथक्करणनिष्पाद्यं नृपते — इति श्रीवि
ष्णुपुराणे पाराशरीयसंहितायां द्वितीयांशे त्रयोदशोध्यायः श्रीपरा
शर उवाच निशम्य तस्येति वचः परमार्थसमन्वितम् प्रश्रयावनतो भूत्वा तमाह नृप
तिर्द्विजं राजोवाच भगवन्यत्त्वया प्रोक्तं परमार्थमयं वचः श्रुते तस्मिन्भ्रमंतीव मन

त्वङ्ः लोकपालो मीलनेऽदीशान्युपपादकौ धर्माधर्मावुद्भवभोक्तृं तेनदेशादिकृत इति
सर्वेषां च हिम्र पालजेतोः सर्वत्र कारणम् धर्माधर्मौ यतस्तस्मात्कारणं एष्यते क
नः राजोवाच धर्माधर्मौ न संदेहः सर्वकार्येषु कारणम् उपभोगनिमित्तं च देहेऽदेशा
न्तरागमः यच्चैतद्भवताप्रोक्तं कोऽहमित्येतदात्मनः वक्तुं न शक्यते विज्ञन्तुमेतदु
प्रवर्तते योऽस्मि सोऽहमिति प्रत्येकं यच्चवक्तुं न शक्यते आत्मन्यपि तु दोषाय शब्दोऽह
मिति यद्द्विज आत्मन्येव च शब्दोऽहमिति दोषाय नात्मन्यपि तथैव तत् अनात्म
न्यम विज्ञानं शब्दोऽनर्थकोऽनिलद्वाराः जिह्वा ब्रवीत्यहमिति दंतोष्ठं तालुकं नृप य
तेनाहं यतः सर्वे वाङ्निष्पादनहेतवः किं हेतुभिर्वदत्येषा वागेवाहमिति स्वयम् ।
तथापि वाङ्नाहमेतदुक्तमित्थं न युज्यते पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिल ।
क्षणः ततोऽहमिति कुत्रैतां संज्ञां राजन्करोम्यहम् यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थि
वसत्तम तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते यदा समस्तदेहेषु पुमानेको व्यव ।
स्थितः तदा हि को भवान्कोऽहमित्येतद्विफलं वचः त्वं राजा शिबिका चेयं वयं वाहाः
पुरःसराः अयं च भवतो लोको न सदेतन्नृपोच्यते वृक्षाद्दारु ततश्चेयं शिबिका त्वदधि
ष्ठिता क्व वृक्षसंज्ञा जातास्या दारुसंज्ञाथवा नृप वृक्षारूढो महाराजो नायं वदति ते

वक्षःस्थलं तथा बाहू स्कंधौ वक्षसि संस्थितौ स्कंधाश्रितेयं शिविका मम भारोत्र किं कृतः
शिविकायां स्थितं चेदं देहं त्वदुपलक्षितम् ततस्त्वमहमप्यत्र प्रोच्यते चेदमन्यथा अहं
त्वं च तथान्ये च भूतैरुह्याम पार्थिव गुणप्रवाहपतितो भूतवर्गोपि यात्ययम् कर्मव
श्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते अविद्यासंचितं कर्म तच्चाशेषेषु जंतुषु आत्मा शु
द्धोक्षरः शांतो निर्गुणः प्रकृतेः परः प्रवृद्ध्यपचयौ नास्य एकस्याखिलजंतुषु यदा नोप
चयस्तस्य न चैवापचयो नृप तदा पीवानसीत्येतत्कया युक्त्या त्वयेरितम् भूपादजंघाक
ट्यूरुजठरादिषु संस्थिता शिविकेयं यदा स्कंधे तदा भारः समस्त्वया तथान्यैर्जंतुभिर्भूप
शिविकोत्थेन केवलम् शैलद्रुमगृहोत्थोपि पृथिवीसंभवोपि वा यदा पुंसः पृथग्भा
वः प्राकृतैः कारणैर्नृप सोढव्यस्तु तदा भारः कतमो नृपते मया यद्द्रव्या शिविका चे
यं तद्द्रव्यो भूतसंग्रहः भवतो मेखिलस्यास्य ममत्वेनोपबृंहितः पराशर उवाच ए
वमुक्त्वाभवन्मौनी स वहं शिविकां द्विजः सोपि राजावतीर्योर्व्यां तत्पादौ जगृहे त्वरन् भो
भो विसृज्य शिविकां प्रसादं कुरु मे द्विज कथ्यतां भवता कोत्र जडरूपधरः स्थितः यो भवा
न्यन्निमित्तं वा यदागमनकारणम् तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे त्वया ब्राह्मण उ
वाच श्रूयतां कोहमित्येतद्वक्तुं भूप न शक्यते उपभोगनिमित्तं च सर्वत्रागमनक्रिया स

लेर्थंवास्थसम श्रेयः किमत्र संसारे दुःखप्रायेन्नणामिति पप्रछसोदथर्मंतंकपि
लाख्यमहामनिम उवाह शिविकानस्यक्षतवेष्टनचोदितः नृणांविष्टिगृहीतानाम्।
न्येषांसोपिमध्यगः गृहीतोविष्टिनाविप्रः सर्वज्ञानैकभाजनम् जातिस्मरोसौपापस्य
कार्याकामउवाहताम् ययौजडमतिःसोथयुगमात्रावलोकनम् कुर्वन्मतिमतांश्रेष्ठ
स्तदन्येनत्वितंययुः विलोक्यनृपतिःसोपिविषमांशिबिकागतिम् किमेतदित्याह।
समंगम्यतांशिबिकावहाः पुनस्तथैवशिविकांविलोक्यविषमांनृपः किमेतदित्या
हभूयोभवद्भिर्गम्यतेन्यथा भूपतेर्वदतःश्रुत्वावचस्तेवहुशोवचः शिविकोद्वा
हकाप्रोचुरयंयातीत्यसत्वरम् राजोवाच किंश्रांतोस्यल्पमध्वानंत्वयोढाशिवि
काममकिमायाससहोनत्वमपीवाननिरीक्ष्यसे ब्राह्मणउवाच नाहंपीवाननैवोढा।
शिविकाभवितोमया नश्रांतोस्मिनचायासःसोढव्योस्तिमहामते राजोवाच प्रत्य।
क्षंदृश्यसेपीवान्वत्यापिशिविकात्वयि श्रमश्चभारोद्वहनेभवत्येवहिदेहिनां ब्राह्मण
उवाच प्रत्यक्षंभवताभूपयद्दृष्टंममतद्वद बलवानबलश्चेतिवाच्यंपश्चाद्विशेषणम् त्व
योढाशिविकाचेतित्वय्याद्यापिचसंस्थिता मिथ्यैतदत्रतुभवान्शृणोतुवचनंमम भू
ष्यैत, भूमौपादयुगस्यास्थाजंघेपादद्वयेस्थिते ऊर्वोर्जंघाद्वयावस्थौतदाधारंतथोदरम्

द्वि॰
वि॰
पु॰
५८

क्ष्मातले तेन भूतस्य कर्मणो निष्कृतिं ययौ। तच्चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः। सदा
चारवतां शुद्धे योगिनां प्रवरे कुले। सर्वविज्ञानसंपन्नः सर्वशास्त्रार्थतत्ववित्। अपश्यत्स च
मैत्रेय आत्मानं प्रकृतेः परम्। आत्मनोऽधिगतज्ञानो देवादीनि महात्मने। सर्वभूतान्य
भेदेन ददर्श स तदात्मनः। न पपाठ गुरुप्रोक्तं कृतोपनयनः श्रुतिम्। न ददर्श च कर्मा
णि शास्त्राणि जगृहे न च। उक्तोऽपि बहुशः किंचिज्जडवाक्यमभाषत। तदप्यसंस्कारगु
णं ग्राम्यवाक्योक्तिसंश्रितम्। अपध्वस्तवपुः सोऽपि मलिनाम्बरधृग्द्विजः। क्लिन्नदन्तान्तरः
सर्वैः परिभूतः स नागरैः। संमाननं परां हानिं योगर्द्धेः कुरुते यतः। जनेनावमतो यो
गी योगसिद्धिं च विन्दति। तस्माच्चरेत वै योगी सतां धर्ममदूषयन्। जना यथावमन्ये
रन् गच्छेयुर्नैव संगतिम्। हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः। आत्मानं दर्शयामास ज
डोन्मत्ताकृतिं जने। भुंक्ते कुल्माषवाट्यादि शाकं वन्यं फलं कणान्। यद्यदाप्नोति सुब
हु तदत्ति कालसंयमम्। पितर्युपरते सोऽथ भ्रातृभिर्भ्रातृबान्धवैः। कारितः क्षेत्रकर्माणि
कदन्नाहारपोषितः। स तूक्षपीनावयवो जडकारी च कर्मणि। सर्वलोकोपकरणं ब
भूवाहारवेतनः। तं तादृशमसंस्कारं विप्राकृतिविचेष्टितम्। क्षत्ता सौवीरराजस्य विष्टि
योग्यममन्यत। स राजा शिबिकारूढो गन्तुं कृतमतिर्द्विज। बभूवेक्षुमतीतीरे कपि

ग्राहेलग्रामादघायये पुनः प्रातोभ्यालिह्वं वसायमायातय्याश्रमम् पुनस्तस्मिन
स्याभ्रदाश्रमस्योरराजिवे तस्यतस्मिन्स्योहदसमीपपरिवर्तिनि ग्रामीश्वेतःसमा
सक्तनयथावन्यतोद्विज विग्रहकवाज्यतनयः श्रान्तिना शुभवेयवः मम्मतंसवका
वोश्चैलस्मिन्हरिणबालके किंवकैर्भदितोऽघ्याश्रैः किंसिंहेनानिपातितः विलाप
मानेनिष्क्रान्तेतस्यासीदनिमानसम यथावस्तुमतोतस्यास्त्रुवायदनकतेवा प्रीत
येममयानेसौकुममैएकबालकः विष्णाएवश्रणमहाकुकएदयनपवोहिसः दे
माणाभ्यागतोभएषरपिमांस्तुवापिष्यति यतेल्लनशिवोत्तस्यदशनैरचितोक्तैः
कृशाकाशाविराजतेवटवःसमभाइव इस्येविरातेतस्मिंमवक्रेमानसंमतिः प्रीति
प्रसन्नवदनःपार्श्वेस्याभवेस्य समाधिभंगात्तस्यासीत्सममनाद्दताम्नानः संत्यक्त।
राज्यभोगादिसज्जनस्यापिभूपतेः कालेनाभ्यस्तास्योवकालेवक्रेमहीपतिः पिता।
वसाहे9वेणभ्यापोनेनवीक्षितः स्यामेवतदाह्वाह्नीत्यजेप्राणानसावपि तन्मयत्वे
नमैवेयनात्यक्तिंविदचिंतयत ततश्चतत्कालकृतांभावनांप्राप्यताहशीम जन्मना
गीमहारण्येजज्ञेजातिस्मरोमृगः जातिस्मरत्वादुद्विग्नः संसारस्याद्विजोत्तमः वि।
हायमातरंभूयःसालिग्राममुपाययौ शुष्कैस्तृणैस्तथा पर्णैः सकुर्वन्नात्मपोषणं

द्वि. वि. पु. ८४

श्रीपराशरः । शालग्रामे महाभागो भगवंन्यस्तमानसः स उवास चिरंकालं मैत्रेय पृ
थिवीपतिः अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः अवाप परमां काष्ठां मनसश्चा
पि संयमे यज्ञेशाच्युत गोविंद माधवानंत केशव कृष्ण विष्णो हृषीकेशेत्याह राजा
स केवलम् नान्यज्जगाद मैत्रेय किंचित्स्वप्नांतरेष्वपि एतत्परं तदर्थं च विना नान्यद।
चिंतयत् समित्पुष्पकुशादानं चक्रे देवक्रियाकृते नान्यानि चक्रे कर्माणि निःसंगो
योगतापसः जगाम सोऽभिषेकार्थमेकदा तु महानदीम् स्नातेन तत्र तदा चक्रे स्ना
नस्यानंतरक्रियाः अथाजगाम तत्तीर्थं जलं पातुं पिपासिता आसन्नप्रसवा ब्रह्मन्ने
कैव हरिणी वनात् ततः समभवत्तत्र पीतप्राये जले तया सिंहस्य नादः सुमहान्सर्व
प्राणिभयंकरः ततः सा सहसा त्रासादाप्लुता निम्नगातटम् अत्युच्चारोहणेनास्या
नद्यां गर्भः पपात सः तमुह्यमानं वेगेन वीचीमालापरिप्लुतम् जग्राह स नृपो ग
र्भात्पतितं मृगपोतकम् गर्भप्रच्युतिदुःखेन प्रोत्तुंगाक्रमणेन च मैत्रेय सापि
हरिणी पपात च ममार च हरिणीं तां विलोक्याथ विपन्नां नृपतापसः मृगपो।
तं समादाय पुनराश्रममागतः चकारानुदिनं चासौ मृगपोतस्य वै नृपः पोषणं
पुष्यमाणश्च स तेन ववृधे मुने चचाराश्रमपर्यंते तृणानि गहनेषु सः दूरं गत्वा च।

ऋतेऽस्ति किंचित्क्वचित्कदाचिद्द्विजवस्तुजातम् विज्ञानमेकं निजकर्मभेदविभिन्नचि
त्तैर्बहुधाभ्युपेतम् ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसंगम् एकं स
दैकः परमः परेशः स वासुदेवो न यतोऽन्यदस्ति सद्भाव एषो भवतो मयोक्तो ज्ञानं यथा
सत्यमसत्यमन्यत् एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते यज्ञः पशु
र्वह्निरशेषऋत्विक्सोमः सुराः स्वर्गमयश्च कामः इत्यादिकर्माश्रितमार्गदृष्टं
भूरादिभोगाः फलानि तेषाम् यच्चैतद्भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि तत्र
कर्मवश्यः ज्ञात्वैवं ध्रुवमचलं सदैकरूपं तत्कुर्याद्विशति हि येन वासुदेवमिति इति
श्रीविष्णुपुराणे ब्रह्माण्डे पाराशरीयायां संहितायां द्वितीयांशे द्वादशोऽध्यायः भु
वनकोशः समाप्तः मैत्रेय उवाच भगवन्सम्यगाख्यातं यत्पृष्टोऽसि मयाखिलं
भूसमुद्रादिसरितां संस्थानं ग्रहसंस्थितिम् परमार्थस्तु ते प्रोक्तो यथा ज्ञानं प्रधान
तः यत्त्वेतद्भगवानाह भरतस्य महीपतेः श्रोतुमिच्छामि चरितं तन्ममाख्यातुम
र्हसि भरतः स महीपालः शालग्रामेऽवसत्किल योगयुक्तः समादाय वासुदेवे मनः
सदा पुण्यदेशप्रभावेन ध्यायतश्च सदा हरिम् कथं वै नाभवन्मुक्तिर्यदभूद्वा द्विजः
पुनः विप्रत्वे च कृतं तेन यद्भूयः सुमहात्मना एवं कर्मस्वभावेन तन्ममाख्यातुमर्हसि

द्वि॰
वि॰
पु॰
८३

स्थिलादि विना चेत्येवतत्त्वं कीर्तितं जीवतत्त्वं प्रथितं कालेन ॥ ज्ञानपादस्तथापि विज्ञेयोऽग्र॥
तवोदनः ॥ यत्र यस्य विज्ञेयो धर्मोऽस्य योनमाश्रितः ॥ हरिनारायणस्थाने श्रेष्ठिनोऽस्य
वैपादयोः ॥ वरुणस्थापेमा चैव पश्चिमे तस्य पूर्वाकिसी ॥ दिक्षु सर्वत्र तस्य मित्रोप
नेसमाश्रितः ॥ पृष्ठाभिस्थमहेन्द्रकपपायनतो ध्रुवः ॥ तारकाः शिशुमारस्तता॥
त्तमतिवत्त्वयम् ॥ इत्येवं सन्निवेशाख्यः पृथिव्या ज्योतिषां तथा ॥ द्वीपानामुदधीनां च
पर्वतानां च कीर्तितः ॥ वर्षाणां च नदीनां च ये च ये वसंति वै ॥ तेषां स्वरूपमाख्यातं संक्षे
पः श्रूयतां पुनः ॥ यदम्बु वैष्णवः कायस्ततो विप्र वसुंधरा ॥ पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता
ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ॥ नद्यः समुद्राश्च स एव सर्वं॥
यदस्ति यन्नास्ति च विप्रवर्य ॥ ज्ञानस्वरूपो भगवान्यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः ॥ त
तो हि शैलाब्धिधरादिभेदाञ्जानीहि विज्ञानविजृंभितानि ॥ यदा तु शुद्धं निजरूपि सर्वं
कर्मक्षये ज्ञानमपास्तदोषम् ॥ तदा हि संकल्पतरोः फलानि भवंति नो वस्तुषु वस्तुभेदाः ॥
वस्त्वस्ति किं कुत्रचिदादिमध्यपर्यंतहीनं सततैकरूपम् ॥ यच्चान्यथात्वं द्विज याति भूय
यो न तत्तथा तत्र कुतो हि तत्त्वम् ॥ मही घटत्वं घटतः कपालिकाः कपालिका चूर्णरजस्त
तोऽणुः ॥ जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥ तस्मान्न विज्ञान

नृत्वः स्थानकर्षीपुत्रोऽभूत्संभवे देवैः सोमपानं पताकलशकस्यापि यो महान्।
ग्रहाहः कीर्तनः श्रीसोमस्यापि यो महान् पद्मनाभ प्रशस्तः संयुक्तो वह्नि
भवैः ग्रहाभिः पात्रे पुत्रे वाजिभिः कीर्तनत्वं निर्दिष्टानिर्दिष्टतिर्यग्वेशाखा शोभ
स्यातिः शाकाशस्मभवे रश्मेः पुष्करे संस्पृष्टत्वं पुनः समाकृष्टा प्राने यानि सहस्रामीषुने
स्मुवः स्वभानोः स्वरगाहा हेमां गाभाभस्मरंवक्ष्य महापुत्रास्तिमे तेऽपवहन्त्यारतस्य
दा आदित्यानि स्कन्दो वाजुः सोमः सास्त्रातिपर्वेष आदित्यमतिसोमस्य पुनः सोरे वुप
वेस्य तथा केतवः स्यापद्मा ग्रहाणां हेवातर्वस्मः फलालयसमवर्णभालावाम सलिभा
कृतस्य चतेमहाग्रहाणामेव तन्नामानि यानि च सर्वेषु वेमहाभागाप्रवड्डावाभ्युत्थि
भिः ग्रहाणां नामानि स्यानि भुवे च वड्डान्यशोधनः स्वमं तु भवितव्यमेणमेतेया निलवः।
स्मृभिः यावन्त्येव नामानि तावन्तो वानस्यमयः सर्वेषु वानि वड्डालेसमतोभ्याम
यतेन तैलपीलाय यथा वक्रस्मसंतोभ्यासयंतिवै यथाम्लमतिज्योतींषि वानानि वड्डानि
सर्वेषाः स्फुलानवक्रवद्याति वानवक्रे वितानिव यस्माज्ज्योतींषि वहति प्रवहलेन सा।
स्मृतः शिशुमारस्तुयः प्राक्रः सम्भवो यत्र तिष्ठति सन्निवेशाच तस्याधिष्ठाय ऐश्वमन्ति
सततम् यदाज्ञाकृतेन यापेन दृष्णाति शिशुमारव्याते यावन्त्येव नामानि शिशुमारो।

वि॰
पु॰
८२

वेगिना ॥ ह्रासवृद्धिक्रमस्तस्य रश्मीनां सवितुर्यथा ॥ अर्कस्येव हि तस्याश्वाः सकृद्युक्ता व
हंति ते कल्पमेकं मुनिश्रेष्ठ वारिगर्भसमुद्भवाः ॥ क्षीणं पीतं सुरैः सोमम् आप्याययति दी
प्तिमान् । मैत्रेयैककलं संतं रश्मिनैकेन भास्करः ॥ संभृतं चार्धमासेन तन्मैत्रेय सुधामृ
तम् । पिबंति देवा मैत्रेय सुधाहारा यतोऽमराः ॥ त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि
च । त्रयस्त्रिंशत्तथा देवाः पिबंति क्षणदाकरम् ॥ कलाद्वयावशिष्टस्तु प्रविष्टः सूर्यमंडलम् ।
अमाख्यरश्मौ वसति अमावास्या ततः स्मृता ॥ अप्सु तस्मिन्नहोरात्रे पूर्वं विशति चंद्रमाः । त
तो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥ छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे । प
त्रं वा पातयत्येकं ब्रह्महत्यां स विंदति ॥ शेषे पंचदशे भागे किंचिच्छिष्टे कलात्मके । अपा
राह्ने पितृगणा जघन्यं पर्युपासते ॥ पिबंति द्विकलाकारं शिष्टा तस्य कला तु या । सुधा
मृतमयीं पुण्यां तामिंदोः पितरो मुने ॥ निःसृतं तदमावास्यां गभस्तिभ्यः सुधामृतम् । मा
सं तृप्तिमवाप्याग्र्यां पितरः संति निर्वृताः ॥ सौम्या बर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ॥
एवं देवान् सितेपक्षे कृष्णपक्षे तथा पितॄन् । वीरुधश्चामृतमयैः शीतैरप्परमाणुभिः ॥ वी
रुधौषधिनिष्पत्त्या मनुष्यपशुकीटकान् । आप्याययति शीतांशुः प्राकाश्याह्लादनेन वै ॥ वा
य्वग्निद्रव्यसंभूतो रथश्चंद्रसुतस्य च । पिशंगैस्तुरगैर्युक्तः सोऽष्टाभिर्वायुवेगिभिः ॥ सव

गतो नाशं न याति चाखिलम् । एवं तितं वेद न येयोगं धं वै गीयते पुनः । नृत्यंत्यप्सरसो यां
ति तस्यैवानु निशाचराः । वहंति पन्नगा यक्षैः क्रियतेऽभीषुसंग्रहः । बालखिल्यास्त
थैवेनं परिवार्य समासते । नोदेता नास्तमेता च कदा विष्णुशक्तिरूपधृक् । विष्णुर्विष्णोः पृ
थक् तस्य गणः सप्तमयोप्ययम् । स्तंभस्थदर्पणस्येव योयं सान्निध्यमागतः । छायाद
र्शनसंयोगं स समाप्नोत्यथात्मनः । एवं सा वैष्णवी शक्तिर्नैवापैति ततो द्विज । मासानु
मासं भास्वंतमध्यास्ते तत्र संस्थितम् । पितृदेवमनुष्यादीन्स सदाप्याययन्प्रभुः । प
रिवर्तत्यहोरात्रकारणं सविता द्विज । सूर्यरश्मिः सुषुम्णो यस्तर्पितस्तेन चंद्रमाः ।
कृष्णपक्षेऽमरैः शश्वत्पीयते वै सुधामयः । पीतं तं द्विकलं सोमं कृष्णपक्षक्षये द्विज । पि
बंति पितरस्तेषां भास्करात्तर्पणं तथा । आदत्ते रश्मिभिर्यत्तु क्षितिसंस्थं रसं रविः । तमु
त्सृजति भूतानां पुष्ट्यर्थं सस्यवृद्धये । तेन प्रीणात्यशेषाणि भूतानि भगवान्रविः । पितृ
देवमनुष्यादीनेवमाप्याययत्यसौ । पक्षतृप्तिं तु देवानां पितृणां चैकमासिकीं । शश्वत्तृ
प्तिं मनुष्याणां मैत्रेयार्कः प्रयच्छति ॥ इति श्रीविष्णुपुराणे [illegible] पाराशरीयायां संहि
तायां द्वितीयांशे एकादशोऽध्यायः ॥ श्रीपराशरः ॥ रथस्त्रिचक्रः सोमस्य कुंदाभास्तत्र
वाजिनः । वामदक्षिणतो युक्ता दश तेन चरत्यसौ । वीथ्याश्रयाणि ऋक्षाणि ध्रुवाधा

कथितागंधर्वोरगरक्षसाम् ऋषीणांबालखिल्यानांतथैवाप्सरसांगुरो यक्षाणांच
रथेभानोर्विष्णुशक्तिधृतात्मनाम् किंचादित्यस्ययत्कर्मतन्नात्रोक्तंत्वयामुने यदिस
प्तगणोवारिहिममुष्णंचवर्षति तत्किमत्ररवेर्येनवृष्टिःसूर्यस्यकीर्त्यते विवस्वानु
दितोमध्येयात्यस्तमितिकिंजनः ब्रवीत्येतन्ममाचक्ष्वयदिसप्तगणस्यतत् पराशरः
मैत्रेयश्रूयतामेतद्यद्भवान्परिपृच्छति यथासप्तगणेप्येकः प्राधान्येनाधिकोरविः
सर्वशक्तिःपराविष्णोर्ऋग्यजुःसामसंज्ञिता सैषात्रयीतपत्यंहोजगतश्चहिनस्ति
यत् सैषविष्णुःस्थितःस्थित्यांजगतःपालनोद्यतः ऋग्यजुःसामभूतोन्तःसवि
तुर्द्विजतिष्ठति मासिमासिरविर्योयस्तत्रतत्रहिसापरा त्रयीमयीविष्णुशक्तिरवस्था
नंकरोतिवै ऋचस्तपंतिपूर्वाह्णेमध्याह्नेथयजूंषिवै बृहद्रथन्तरादीनिसामान्यह्नः
क्षयेरवौ अंगमेषात्रयीविष्णोर्ऋग्यजुःसामसंज्ञिता विष्णुशक्तिरवस्थानंसदादि
त्येकरोतिसा नकेवलंरवेःशक्तिर्वैष्णवीसात्रयीमयी ब्रह्माथपुरुषोरुद्रस्त्रयमेतत्त्र
यीमयम् सर्गादावृङ्मयोब्रह्मास्थितौविष्णुर्यजुर्मयः रुद्रःसाममयोंतायतस्मात्त
स्याशुचिर्ध्वनिः एवंसासात्त्विकीशक्तिर्वैष्णवीयात्रयीमयी आत्मसप्तगणस्थंतंभा
स्वंतमधितिष्ठति तयाचाधिष्ठितःसोपिजाज्वलीतिस्वरश्मिभिः तमःसमस्तज।

घावसुरुचिर्वातोगौतमोथधनंजयः सुषेणोन्योघृताचीचवसंत्याश्वयुजेरवौ विश्वा
वसुर्भरद्वाजोपर्जन्यैरावतौतथा विश्वाचीसेनजिच्चापःकार्त्तिकेचाधिकारिणः अं
शुकाश्यपतार्क्ष्यास्तुमहापद्मस्तथोर्वशी चित्रसेनस्तथाविद्युन्मार्गशीर्षाधिकारिणः
क्रतुर्भगस्तथोर्णायुःस्फूर्जःकर्कोटकस्तथा अरिष्टनेमिश्चैवान्यापूर्वचित्तिर्वराप्स
राः पौषमासेवसंत्येतेसप्तभास्करमंडले लोकप्रकाशनार्थायविप्रवर्याधिकारिणः
त्वष्टाथजमदग्निश्चकंबलोथतिलोत्तमा ब्रह्मापेतोथऋतजिद्धृतराष्ट्रश्चसप्तमः मा
घमासेवसंत्येतेसप्तमैत्रेयभास्करे श्रूयतांचापरेसूर्येफाल्गुणेनिवसंतिये विष्णुरश्व
तरोरंभासूर्यवर्चाश्चसत्यजित् विश्वामित्रस्तथारक्षोयज्ञापेतोमहामुने मासेष्वेतेषुमै
त्रेयवसंत्येतेतुसप्तकाः सवितुर्मंडलेब्रह्मन्विष्णुशक्त्युपबृंहिताः स्तुवंतिमुनयःसू
र्यंगंधर्वैर्गीयतेपुरः नृत्यंत्यप्सरसोयांतिसूर्यस्यानुनिशाचराः वहंतिपन्नगायक्षैः
क्रियतेभीषुसंग्रहः वालखिल्यास्तथैवैनंपरिवार्यसमासते सोयंसप्तगणःसूर्य
मंडलेमुनिसत्तम हिमोष्णवारिवृष्टीनांहेतुःस्वसमयंगतः इतिश्रीविष्णुपुराणेब्रह्मा
ण्डपाराशरीयायांसंहितायांद्वितीयांशेदशमोध्यायः मैत्रेयउवाच यदेतद्भगवा
नाहगणःसप्तविधोरवेः मंडलेहेतुःपादेकारणंतन्मयाश्रुतम व्यापारश्चापि

द्वि॰
वि॰
पु॰
९०

र्वेकाः सर्वदेवनिकायाश्च पशुभूतगणाश्च ये वृष्ट्यायत्तमिदं सर्वमन्नं निष्पाद्यते यथा।
सापि निष्पाद्यते वृष्टिः सवित्रा मुनिसत्तम आधारभूतः सवितुर्ध्रुवो मुनिवरोत्तम ध्रु
वस्य शिशुमारोसौ सोपि नारायणाश्रयः हृदि नारायणस्तस्य शिशुमारस्य संस्थितः
विभर्ता सर्वभूतानामादिभूतः सनातनः इति श्रीविष्णुपुराणे ब्रह्माण्डे पाराशरी
यायां संहितायां द्वितीयेंशे नवमोध्यायः श्रीपराशरः अशीतिमंडलशतं काष्ठ।
योरंतरं द्वयोः आरोहणावरोहाभ्यां भानोरब्देन या गतिः स रथोधिष्ठितो देवैरादित्यै
र्ऋषिभिस्तथा गंधर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः धाता क्रतुस्थला चैव पुलस्त्यो
वासुकिस्तथा रथकृद्ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः एते वसन्ति वै चैत्रे मधुमासे सदै
व हि मैत्रेय स्यंदने भानोः सप्तमासाधिकारकाः अर्यमा पुलहश्चैव रथौजाः पुंजिकस्
स्थला प्रहेतिः कच्छनीरश्च नारदश्च रथस्वनः माधवेपि वसंत्येते शुचिसंज्ञे निबो।
ध मे मित्रोत्रिस्तक्षको रक्षः पौरुषेयोथ मेनका हाहा रथस्वनश्चैव मैत्रेय ते वसंति वै
वसिष्ठो वरुणो रम्भा सहजन्या हुहूर्बुधः रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञिते
इन्द्रो विश्वावसुः स्रोत एलापत्रस्तथांगिराः प्रम्लोचा च नभस्येते सर्पश्चार्के वसंति वै वि
वस्वानुग्रसेनश्च भृगुरापूरणस्तथा अनुम्लोचा शंखपालो व्याघ्रो भाद्रपदे तथा॥

तस्मादम्भसमस्मादप्याखिलं जगत् विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम् सोमं पु
ष्णात्यथेन्दुश्च वायुनाडीमयैर्दिवि नालैर्विक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु नभ्रश्यं
न्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः सं।
स्कारं कालजनितं मैत्रेयासाद्य निर्मलाः सरित्समुद्रभौमास्तु तथापः प्राणिसंभवाः।
चतुष्प्रकारा भगवानादत्ते सविता मुने आकाशगंगासलिलं तथादाय गभस्तिमा।
न् अनभ्रगतमेवोर्व्यां सद्यः क्षिपति रश्मिभिः तस्य संस्पर्शनिर्धूतपापपंको द्विजो।
त्तम नयाति नरकं मर्त्यो दिव्यं स्नानं हि तत्स्मृतम् दृष्टसूर्यं हि यद्वारि पतत्यभ्रैर्विना।
दिवः आकाशगंगासलिलं तद्गोभिः क्षिप्यते रविः कृत्तिकादिषु ऋक्षेषु विषमेष्वंबु।
यद्दिवः दृष्टार्कं पतितं ज्ञेयं तद्गांगं दिग्गजोज्झितम् युग्मर्क्षेषु च यत्तोयं पतत्यर्कोज्झितं
दिवः तत्सूर्यरश्मिभिः सद्यः समादाय निरस्यते उभयं पुण्यमत्यर्थं नृणां पापभयापहं।
द्विज आकाशगंगासलिलं दिव्यं स्नानं महामते यत्तु मेघैः समुत्सृष्टं वारि तत्प्राणिनां
द्विज पुष्णात्यौषधयः सर्वा जीवनायामृतं हि तत् तेन वृद्धिं परां नीतः सकलश्चौषधी।
गणः साधकः फलपाकान्तः प्रजानां द्विज जायते तेन यज्ञान्यथाप्रोक्तान्मानवाः शा
स्त्रचक्षुषः कुर्वन्त्यहरहस्तैश्च देवानाप्याययन्ति ते एवं यज्ञाश्च वेदाश्च वर्णाश्च द्विजपू

त्रयदुर्लभम् यस्यामिहागमस्याप्यजैयेनोपुंप्रकृषोत्तमम् द्विजभक्तापरान्नहिमवाप्नुदि
विशेष्ठव स्नानादिष्टतयायास्वयज्ञलेयतयलथा केशवासक्तमनसः प्रायानिर्वाण।
मनुसम् झूतानिलषितार्ह्णास्फ्णापीतावगाहिता यायावयतिभूतानिकीर्तिता
चदिनेदिने गंगेगंगेतियनामयोजनानां शतैरपि स्थितैरुच्चारितंहंतिपापांजन्म।
त्रयार्जितम् यत्साप्यावना पालेत्रयाणांजगतामपि समस्तापरं तत्स्थानं यं भ
गवत्पदम् इतिश्रीविष्णुपुराणे ब्रह्माण्डेपाराशारीयायांसंहितायां द्वितीयांशेऽष्ट
मोध्यायः पराशरः ॐतारामयंभगवतः शिशुमाराकृतिप्रभोः दिविरूपंहरेर्यत्त
स्यपुच्छस्थितोध्रुवः संधन्नमन्नामयतिध्रुवादित्यादिकान्ग्रहान् भ्रमन्तमनुतं यांति
नक्षत्राणिचचक्रवत् सूर्याचंद्रमसौतारानक्षत्राणिचवक्रवत् ग्रहैःसह वातानी
कमयैर्बंधैःध्रुवेबद्धानितानिवै शिशुमाराकृतिप्रोक्तं यद्रूपंज्योतिषांदिवि नारा।
यणःपरोधाम्नोतस्याधारःस्वयंहृदि उत्तानपादपुत्रस्तुतमाराध्यप्रजापतिः सतारा
शिशुमारस्यध्रुवःपुच्छेव्यवस्थितः आधारःशिशुमारस्यसर्वाध्यक्षोजनार्दनः ध्रुवस्य
शिशुमारस्तुध्रुवेभानुर्व्यवस्थितः तदाधारंजगच्चेदंसदेवासुरमानुषम् येनविप्र
विधानेनतन्मैकमनाःशृणु विवस्वानष्टभिर्मासैराददात्यरसात्मिकाः वर्षत्यंबुत

संपदस्य यस्मिं प्रतिष्ठितो भासाम्भेश्रप्रभृतः स्वयंभुवः अवेच सर्वज्योतींषि ज्योतिर्भि भोम
चोडिज मेरुसंततान्वाहिरहिस्फतेष्ठपोषणाम् आप्यायनेत्सर्वेषां देवादीनां महात्म
ने ततश्चाकृतिद्वारेणपोषिता लोहविभ्रेणः हहेः करणतोयातिभूतानां स्थितये पुनः
एवं वनस्पतिविशेषोत्पत्तीयममलात्मकम् बाधाव भूतं लोकानां त्रयाणां चाहिकारणम्
ततः प्रभवति त्रत्यन्सर्वेषां पहुवासरित् गंगादेवागतागनामनलेपनपिंजरा वासप्प
दाप्रजात्रस्तनवेणां नाविनिर्गता विलोविभक्तियाभक्त्यापिभसाहर्निशंभुवः ततः
समर्थया यस्याः प्राणयाम पराणैः तिष्ठंति वीचिमालाभिरुह्यमानजटालचे वा
यौचैः संततं यस्याः सवितशशिमंडलम् भूयोधिकतयां कांतिवहत्यमनुपलयम् मे
रुएहेपतन्त्येव निष्क्रांता शशिमंडलात् जगतः पावनार्थाय याप्रयाति चतुर्दशाम्
सीता वालकनंदा च चक्षुर्भद्रा च यास्थिता एकैकया चतुर्भेदादिभेरयातिलक्षण
भेदं वालकनंदाख्या यस्याः शर्वोपिदक्षिणम् दधार शिरसा भीत्या वर्षाणामधिकं शत
तम् प्रभोजे द्रा कला यास्तु विनिष्क्रान्ता स्थिशार्कराः स्नावयिनादिवं नित्ये या पापान्म
गराम्मजान् स्नातस्य सलिले यस्याः सद्यः पापं प्रणश्यति अपवेपुण्यप्राप्तिस्तु सद्यो
मैत्रेय जायते दत्तापितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः समात्रयं प्रयच्छंति तृप्तिं मैत्रे।

णमर्योस्थिताह्याचंद्रतारकम् नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणम् उत्तरः सवितुः
पंथा देवयानस्तु स स्मृतः तत्र देवर्षयः सिद्धा विमला ब्रह्मचारिणः संततिं ते जुगुप्स
ंति तस्मान्मृत्युश्च तैर्जितः अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् उदक्पंथानमर्य
म्णः स्थिताह्याभूतसंप्लवात् तेसंप्रयोगाल्लोभस्य मैथुनस्य विवर्जनात् इच्छाद्वेषा
प्रवृत्त्या च भूतारंभविवर्जनात् पुनश्चाकामसंयोगाच्छब्दादेर्दोषदर्शनात् इत्येभिः
कारणैः शुद्धास्तेमृतत्वं हि भेजिरे आभूतसंप्लवं स्थानममृतत्वं विभाव्यते त्रैलोक्यस्थि
तिकालोयमपुनर्मार उच्यते ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतो विधिः आभूतसं
प्लवांतस्तु फलमुक्तं तयोर्द्विज यावन्मात्रे प्रदेशे तु मैत्रेयावस्थितो ध्रुवः क्षयमायाति
तावत्तु भूमेराभूतसंप्लवे ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः एतद्विष्णुपदं
दिव्यं तृतीयं व्योम्नि भास्वरम् निर्धूतदोषपंकानां यतीनां संयतात्मनाम् स्थानं तत्प
रं विप्र पुण्यपापपरिक्षये अपुण्यपुण्योपरमे क्षीणाशेषार्त्तिहेतवः यत्र गत्वा न शो
चंति तद्विष्णोः परमं पदम् धर्मध्रुवाद्यास्तिष्ठंति यत्र ते लोकसाक्षिणः तत्सार्ष्ट्योत्पन्नयो
गेद्धास्तद्विष्णोः परमं पदम् यत्रोतमेतत्प्रोतं च यद्भूतं सचराचरम् भाव्यं च विश्वं मैत्रेय तद्वि
ष्णोः परमं पदम् दिवीव चक्षुराततं विततं तन्मयात्मनाम् विवेकज्ञानदृष्टं च तद्विष्णोः प

विषुवत्तो नायदा सूर्ये संपन्नं तं शंसतीयकम् तदा चेदं विजानीयात् कर्णिकाशिरसि स्थिते।
तं तदैव विषुवाख्यं वै कालं पुण्यमभिधीयते तदा दानानि देयानि देवेभ्यः प्रयतात्मना
ब्राह्मणेभ्यः पितृभ्यश्च मुखमेतत्तदाजरम् दत्तदानस्तु विषुवे कृतकृत्योऽभिजायते अ
होरात्रार्धमासास्तु कलाः काष्ठाः क्षणास्तथा पौर्णमासी तथा ज्ञेया अमावास्या तथैव
च सिनीवाली कुहूश्चैव राका चानुमतिस्तथा तपस्तपस्यौ मधुमाधवौ च शुक्रः शुचिश्चा
यनं स्मृतं रस्मात् नभो नभस्योऽथ इषः सहोर्जः सहः सहस्याविति दक्षिणं स्यात् लोका
लोकोऽथ यः शैलः प्राग्युक्तो भवता मया लोकपालास्तु चत्वारस्तत्र तिष्ठन्ति सुव्रताः सुधा
मा शंखपालश्च कर्दमस्यात्मजो द्विज हिरण्यरोमा चैवान्यश्चतुर्थः केतुमानपि निर्द्वन्द्वा
निरभिमाना निस्तन्द्रा निष्परिग्रहाः लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशम्।
उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् पितृयानः स वै पन्था वैश्वानरपथाद्बहिः त
त्रासते महात्मानो ऋषयो येऽग्निहोत्रिणः भूतारंभकृतं ब्रह्म शंसन्तो ऋत्विगुद्यताः प्रारं
भन्ते कामकामास्तेषां पन्थाः स दक्षिणः चलितं ते पुनर्ब्रह्म स्थापयन्ति युगे युगे संतत्या त
पसा चैव मर्यादाभिः श्रुतेन च जायमानास्तु पूर्वे तु पश्चिमानां गृहेषु वै पश्चिमाश्चै
व पूर्वेषां जायन्ते निधनेष्विह एवमावर्तमानास्ते तिष्ठन्त्याभूतसंप्लवात् सवितुर्दक्षि

श्रि
वि
पृ
८७

लात्संगवात् तस्मान्माध्यंदिकात्कालादपराह्ण इति स्मृतः त्रयः पूर्वमुहूर्तैस्तु कालभा।
गं स्मृतो बुधैः अपराह्णाद्व्यतीतेन कालः सायाह्न उच्यते दशपंचमुहूर्ताहो मुहूर्तेन
यमेवच दशपंचमुहूर्तैवेअहर्वैविषुवतंस्मृतम् वर्धतेह्रसतेचैवमयनेदक्षिणोत्तरे।
अहस्तुग्रसतेरात्रिंरात्रिर्ग्रसतिवासरम् शरद्वसन्तयोर्मध्ये विषुवं तद्विभाव्यते तुल्य
मेषगते भानौ समरात्रिदिनं तु तत् कर्कटकावस्थिते भानौ दक्षिणायनमुच्यते उत्तराय
णमप्युक्तं मकरस्थे दिवाकरे त्रिंशन्मुहूर्तं कथितमहोरात्रं तु तन्मया तानि पंचदशाहानि
पक्ष इत्यभिधीयते मासः पक्षद्वयेनोक्तो द्वौ मासौ चार्कजावृतुः ऋतुत्रयं चाप्ययनं द्वे
अयने वर्षसंज्ञिते संवत्सरादयः पंच चतुर्मासस्य विकल्पिताः निश्चयः सर्वकालस्य युग इ
त्यभिधीयते संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः इद्वत्सरस्तृतीयस्तु चतुर्थश्चानु
वत्सरः वत्सरः पंचमस्तत्र कालोऽयं युगसंज्ञितः यः श्रुतस्तेनतेशैलः शृंगवानिति।
विख्यातः त्रीणितस्य तु शृंगाणि येनासौ शृंगवान् स्मृतः दक्षिणे चोत्तरे चैव मध्यमं वि।
षुवं तथा शरद्वसन्तयोर्मध्ये तद्भानुः प्रतिपद्यते मेषादौ च तुलादौ च मैत्रेय विषुवत्स्थि
तः तदा तुल्यमहोरात्रं करोति तिमिरापहः दशपंचमुहूर्तं वै तदेतदुभयं स्मृतम् प्र
थमे कृत्तिकाभागे यदा भास्वांस्तदा शशी विशाखानां चतुर्थेंऽशे मुने तिष्ठत्यसंशयम्

मरकाले मंदेहानामराक्षसाघोराः सूर्यमिच्छंतिखादितुम् प्रजापतिकृतःशापस्तेषां
मैत्रेयरक्षसाम् अक्षयत्वंशरीराणांमरणंचादिनेदिने ततःसूर्यस्यतैर्युद्धंभवत्यत्यंत
दारुणम् ततोद्विजोत्तमास्तोयंयत्क्षिपंतिमहामुने ॐकारब्रह्मसंयुक्तंगायत्र्याचा
भिमंत्रितम् तेनदह्यंतितेपापावज्रीभूतेनवारिणा अग्निहोत्रेहूयतेयासमंत्राप्रथमा।
हुतिः सूर्योज्योतिःसहस्रांशुस्तयादीप्यतिभास्करः ॐकारोभगवान्विष्णुस्त्रिधामा
वचसांपतिः तदुच्चारणतस्तेतुविनाशंयांतिराक्षसाः वैष्णवोंशःपरःसूर्योयोंतर्ज्यो।
तिरसंप्लवम् अभिधायकॐकारस्तस्यतत्प्रेरकःपरम् तेनतत्प्रेरितंज्योतिरोंकारेण
थदीप्तिमत् दहत्यशेषरक्षांसिमंदेहाख्यान्यघानिच तस्मान्नोल्लंघनंकार्यंसंध्योपा
सनकर्मणः हंतिसूर्यंसंध्यायांनोपास्तिंकुरुतेहितः ततःप्रयातिभगवान्ब्राह्मणै
रभिरक्षितः वालखिल्यादिभिश्चैवजगतःपालनोद्यतः काष्ठानिमेषादशपंचचै
वत्रिंशच्चकाष्ठागणयेत्कलांताम् त्रिंशत्कलाश्चैवभवेन्मुहूर्तस्तैस्त्रिंशतारात्र्यहनीस
मेते ह्रासवृद्धीअहर्भागैर्दिवसानांयथाक्रमम् संध्यामुहूर्तमात्रावैह्रासवृद्धौसमा
स्मृता लेखाप्रभृत्यथादित्येत्रिमुहूर्तेगतेभवे प्रातस्तनःस्मृतःकालोभागश्चाह्नः
सपंचमः तस्मात्प्रातस्तनात्कालात्त्रिमुहूर्तस्तुसंगवः मध्याह्नस्त्रिमुहूर्तस्तुतस्मात्का

वि॰ वि॰ पु॰ ८९

सूर्यो द्वादशभिः शैघ्र्यान्मुहूर्त्तैर्द्दक्षिणायने त्रयोदशार्धमृक्षाणामह्ना तु चरते द्विज मु
हूर्त्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन् कुलालचक्रमध्यस्थो यथा मंदं प्रसर्पति तथो
दगयने सूर्यः सर्पते मंदविक्रमः तस्माद्दीर्घेण कालेन भूमिमल्पां तु गच्छति अष्टादश
मुहूर्त्तं यदुत्तरायणपश्चिमम् अहोरात्रं च भवति तच्चापि चरते शनैः त्रयोदशार्धमह्ना
तु ऋक्षाणां चरते रविः मुहूर्त्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् अतो मंदतरं ना।
भ्यां चक्रं भ्रमति वै यथा मृत्पिंड इव मध्यस्थो ध्रुवो भ्रमति वै तथा कुलालचक्रनाभि
स्तु यथा तत्रैव वर्तते ध्रुवस्तथा हि मैत्रेय तत्रैव परिवर्तते उभयोः काष्ठयोर्मध्ये भ्रमतो
मंडलानि तु दिवा नक्तं च सूर्यस्य मंदा शीघ्रा च वै गतिः मंदाह्नि यस्मिन्नयने शीघ्रा नक्तं
तदा गतिः शीघ्रा निशि यदा चास्य तदा मंदा दिवा गतिः एकप्रमाणमेवैष मार्गं याति
दिवाकरः अहोरात्रेण यो भुंक्ते समस्ता राशयो द्विज षडेव राशयो भुंक्ते रात्रावन्यां
श्च षड् दिवा राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने तथा निशायां राशीनां प्रमा।
णैर्लघुदीर्घता दिनादेर्दीर्घह्रस्वत्वं तद्भोगेनैव जायते उत्तरे प्रक्रमे शीघ्रं निशि मंदा ग
तिर्दिवा दक्षिणे त्वयने सैव विपरीता विवस्वतः उषा रात्रिः समाख्याता व्युष्टिश्चाप्युच्य
ते दिनं प्रोच्यते च तयोः संध्या उषाव्युष्ट्योर्यदंतरम् संध्याकाले तु संप्राप्ते रौद्रे परम।

सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे वि
शत्यग्निमहो रात्रौ वह्निर्दूरात्प्रकाशते वह्निपादस्तथा भानोर्दिनेष्वाविशति द्वि
ज सूर्यो वह्निसंयोगादतः सूर्यः प्रकाशते तेजसी भास्कराग्नेये प्रकाशोष्णस्वरू
पिणी परस्परानुप्रवेशादाप्यायेते दिवानिशम् दक्षिणोत्तरभूम्यर्धे समुत्तिष्ठति
भास्करे अहोरात्रं विशत्यंभस्तमः प्राकाश्यशीलवान् आताम्रा हि भवन्त्यापो दिवा
नक्तप्रवेशनात् दिनं विशति चैवांभो भास्करेस्तमुपागते तस्माच्छुक्ला भवन्त्यापो ।
नक्तमह्नः प्रवेशनात् एवं पुष्करमध्येन यदा याति दिवाकरः त्रिंशद्भागं तु मेदि
न्यास्तदा मौहूर्तिकी गतिः कुलालचक्रपर्यन्तो भ्रमन्नेष दिवाकरः करोत्यहस्तथा
रात्रिं विमुंचन्मेदिनीं द्विज अयनस्योत्तरस्यादौ मकरं याति भास्करः ततः कुंभं च मी
नं च राशेराश्यन्तरं द्विज त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् प्रयाति सविता
कुर्वन्नहोरात्रं ततः समम् ततो रात्रिः क्षयं याति वर्धतेनुदिनं दिनम् ततश्च मिथुन
स्यान्ते परां काष्ठामुपागतः राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् कुलाल
चक्रपर्यन्तो यथा शीघ्रं प्रवर्तते दक्षिणप्रक्रमे सूर्यस्तथा शीघ्रं प्रवर्तते अतिवेगित
या कालं वायुवेगबलाच्चलन् तस्मात्प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति ।

द्वि॰
वि॰
पु॰
८५

भूयेवच अन्तर्भूप्यं किंचिन्नक्राक्षं दोसिहवयोर्भवेः मानसोत्तरशैलेन पूर्वतो वासवी
पुरी दक्षिणेन यमस्यान्या प्रतीच्यां वारुणस्य च उत्तरेण च सोमस्य तासां नामानि मे शृ
णु वस्वौकसारा शक्रस्य याम्या संयमनी तथा पुरी सुखा जलेशस्य सोमस्य च विभा
वरी काष्ठां गतो दक्षिणतः क्षिप्तेषुरिव सर्पति मैत्रेय भगवान्भानुर्ज्योतिषां चक्रसं
युतः अहोरात्रव्यवस्थानकारणं भगवान्रविः देवयानः परः पन्था योगिनां क्लेशसं
क्षये दिवसस्य रविर्मध्ये सर्वकालं व्यवस्थितः सर्वद्वीपेषु मैत्रेय निशार्धस्य च सम्मु
खः उदयास्तमने चैव सर्वकालं तु सम्मुखे दिशास्वशेषासु तथा मैत्रेय विदिशासु च
यैर्यत्र दृश्यते भास्वान्स तेषामुदयः स्मृतः तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः नैवा
स्तमनमर्कस्य नोदयः सर्वदा सतः उदयास्तमनाख्यं च दर्शनादर्शनं रवेः शक्रादी
नां पुरे तिष्ठन्स्पृशत्येष पुरत्रयम् विकर्णौ द्वौ विकर्णस्थस्त्रीन्कोणान्द्वे पुरे तथा उदि
तो वर्धमानाभिरामध्याह्नात्तपन्रविः ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति उ
दयास्तमनाभ्यां च स्मृते पूर्वापरे दिशौ यावत्पुरस्तात्तपति तावत्पृष्ठे च पार्श्वयोः ऋ
ते मरुगिरेर्मेरोरुपरि ब्रह्मणः सभाम् ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम्
ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै तस्माद्दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि

कर्मभूमिनिकेषु देवाद्यास्तत्र च स्थिताः विष्णुशक्तिं समासाद्य प्ररोहमुपयान्ति वै स च
विष्णुः परं ब्रह्म यतः सर्वमिदं जगत् जगच्च यो यत्र चेदं यस्मिंश्च लयमेष्यति तद्ब्रह्म त।
त्परं धाम सदसत्परमं पदम् यस्य सर्वमभेदेन जगदेतच्चराचरम् स एव मूलप्रकृति
र्व्यक्तरूपी जगच्च सः तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति कर्ता क्रियाणां स च इज्य
ते क्रतुः स एव तत्कर्मफलं च तस्य स्रुगादि यत्साधनमप्यशेषं हरेर्न किंचिद्व्यतिरि।
क्तमस्ति इति श्रीविष्णुपुराणे ब्रह्माण्डपाराशरीयायां संहितायां द्वितीयेंशे सप्त
मोध्यायः श्रीपराशरः व्याख्यातमेतद्ब्रह्माण्डसंस्थानं तव सुव्रत ततः प्रमाण
संस्थानं सूर्यादीनां शृणुष्व मे योजनानां सहस्राणि भास्करस्य रथो नव ईषादण्ड।
स्तथैवास्य द्विगुणो मुनिसत्तम सार्धकोटिस्तथा सप्त नियुतान्यधिकानि वै योज।
नानां तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् त्रिनाभिमति पंचारे षण्णेमिन्यक्षयात्मके सं
वत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम् चत्वारिंशत्सहस्राणि द्वितीयाक्षो विवस्व।
तः पंचान्यानि तु सार्धानि स्यन्दनस्य महामते अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्ध
योः ह्रस्वोक्षस्तद्युगार्धेन ध्रुवाधारो रथस्य वै द्वितीयेक्षे तु तच्चक्रं संस्थितं मानसा
चले हयाश्च सप्त छंदांसि तेषां नामानि मे शृणु गायत्री च बृहत्युष्णिग्जगती त्रि

स्थितम् अनंतस्यनंतस्यांतःसंख्यानंनाधिविद्यते तदनंतमसंख्यातंमप्रमाणंचवैयतः
हेतुभूतमशेषस्यप्रकृतिःसापरामुने अंडानांतुसहस्राणांसहस्राण्ययुतानिच।
ईदृशानांतथायत्रकोटीकोटिशतानिच दारुण्यग्निर्यथातैलंतिलेतद्वत्पुमानपि प्र
धानेवस्थितोव्यापीचेतनात्मात्मवेदनः प्रधानंचपुमांश्चैवसर्वभूतात्मभूतया वि।
ष्णुशक्त्यामहाबुद्धेवृतौसंश्रयधर्मिणा तयोःसैवपृथग्भावकारणंसंश्रयस्यच क्षो
भकारणभूताचसर्गकालेमहामते यथासक्तंजलेवातोबिभर्तिकणिकाशतम् श
क्तिःसापितथाविष्णोःप्रधानपुरुषात्मकम् यथाचपादपोमूलस्कंदशाखादिसंयुतः
आदिबीजात्प्रभवतिबीजान्यन्यानिवैततः प्रभवंतिततस्तेभ्यःसंभवंत्यपरेद्रुमाः ते
पितल्लक्षणद्रव्यकारणानुगतामुने एवमव्याकृतात्पूर्वंजायंतेमहदादयः विशे
षांतास्ततस्तेभ्यःसंभवंतिसुरादयः तेभ्यश्चपुत्रास्तेषांचपुत्राणामपरेसुताः बीजा
द्वृक्षप्ररोहेणयथानापचयस्तरोः भूतानांभूतसर्गेणनैवास्त्यपचयस्तथा सन्निधा
नाद्यथाकाशकालाद्याःकारणंतरोः तथैवपरिणामेनविश्वस्यभगवान्हरिः व्रीहिबीजे
यथामूलनालंपत्रांकुरौतथा कांडकोशस्तथापुष्पंक्षीरंतद्वच्चतंडुलम् तुषाः।
कणाश्चसंतोवैयांत्याविर्भावमात्मनः प्ररोहहेतुसामग्रीमासाद्यमुनिसत्तम तथा

इत्याफलस्यभेदाहृत्याचात्रश्रुतिस्थिता ध्रुवाद्दूर्ध्वं महालोको यत्र ते कल्पवासिनः
एकयोजनकोटीतु यत्र ते कल्पवासिनः द्वेकोटीतु जनोलोको यत्र ते ब्रह्मणः सुताः स
नंदनाद्याः कथिता मैत्रेयामलचेतसः चतुर्गुणोत्तरे चोर्ध्वं जनलोकात्तपस्मृतः वैराजा
यत्र ते देवाः स्थिता दाहविवर्जिताः षड्गुणेन तपोलोकात्सत्यलोको विराजते अपुनर्मारा।
का यत्र ब्रह्मलोको हि स स्मृतः पादगम्यंतु यत्किंचिद्वस्त्वस्ति पृथिवीमयम् स भूर्लोकः
समाख्यातो विस्तरोस्य मयोदितः भूमिसूर्यांतरं यच्च सिद्धादिमुनिसेवितम् भुवर्लो।
कस्तु सोप्युक्तो द्वितीयो मुनिसत्तम ध्रुवसूर्यांतरं यच्च नियुतानि चतुर्दश स्वर्लोकः सोपि
गदितो लोकसंस्थानचिंतकैः त्रैलोक्यमेतत्कृतकं मैत्रेय परिपठ्यते जनस्तपस्तथास
त्यमिति चाकृतकं त्रयम् कृतकाकृतकौ मध्ये महलोक इति स्मृतः शून्यो भवति कल्पां
ते यो त्यंतं न विनश्यति एते सप्त महालोका मैत्रेय कथितास्तव पातालानि च सप्तैव ब्र
ह्माण्डस्यैव विस्तरः एतदण्डकटाहेन तिर्यक्चोर्ध्वमधस्तथा कपित्थस्य यथा बीजं सर्व
तो वै समावृतम् दशोत्तरेण पयसा मैत्रेयाण्डं च तद्वृतम् सर्वोम्बुपरिधानोसौ वह्निना वे।
ष्टितो बहिः वह्निश्च वायुना वायुः मैत्रेय नभसा वृतः भूतादिना नभः सोपि महता प।
रिवेष्टितः दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै महांतं च समावृत्य प्रधानं समव।

द्वि॰
वि॰
पु॰
८३

नद्यश्चनरकाद्विज समुद्राःपर्वताश्चैवद्वीपावर्षाणिनिम्नगाः संक्षेपात्सर्वमाख्या
तंकिंभूयःश्रोतुमिच्छसि इतिश्रीविष्णुपुराणेऽष्टादशसाहस्र्यांसंहिता
यांद्वितीयेंशेषष्ठोध्यायः मैत्रेयउवाच कथितंभगवन्ब्रह्मन्ममैतत्सकलं
त्वया भुवर्लोकादिकांल्लोकांश्रोतुमिच्छाम्यहंमुने तथैवग्रहसंस्थानंप्रमाणा
नियथातथम् समाचक्ष्वमहाभागतन्मह्यंपरिपृच्छते पराशरः रविचंद्रम।
सोर्यावन्मयूखैरवभास्यते ससमुद्रसरिच्छैलातावतीपृथिवीस्मृता यावत्प्रमा
णापृथिवीविस्तारपरिमण्डलात् नभस्तावत्प्रमाणंवैव्याससमंडलतोद्विज भूमेर्यो
जनलक्षेचमैत्रेयरविमण्डलम् लक्षेदिवाकरस्यापिमंडलंशशिनःस्थितम् पू
र्णेशतसहस्रेतुयोजनानांनिशाकरात् नक्षत्रमण्डलंकृत्स्नमुपरिष्टात्प्रकाश।
ते द्विलक्षेचोत्तरेब्रह्मन्बुधोनक्षत्रमण्डलम् तावत्प्रमाणभागेतुबुधस्याप्युश।
नाःस्थिताः अंगारकोपिशुक्रस्यतत्प्रमाणेव्यवस्थितः लक्षद्वयेनभौमस्यस्थि
तोदेवपुरोहितः सौरीबृहस्पतेश्चोर्ध्वंद्विलक्षेसमवस्थितः सप्तर्षिमण्डलंत
स्माल्लक्षमेकंद्विजोत्तम ऋषिभ्यस्तुसहस्राणांशतादूर्ध्वंव्यवस्थितः मेढीभूतः
समस्तस्यज्योतिश्चक्रमिदंद्विजः ध्रुवः त्रैलोक्यमेतत्कथितमुत्सेधेनमहामुने।

दः प्रायश्चित्तानि मैत्रेय जगदुः स्वायंभुवादयः प्रायश्चित्तानि मैत्रेय त्वशेषाणि तपःक
र्मात्मकानि वै यानि तेषामशेषाणां कृष्णानुस्मरणं परम् कृते पापेऽनुतापो वै यस्य पुं।
सः प्रजायते प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् प्रातर्निशि तथा संध्यामध्या।
ह्नादिषु संस्मरन् नारायणमवाप्नोति सद्यः पापक्षयं नरः विष्णुसंस्मरणात्क्षीण
समस्तक्लेशसंचयः मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोनमीयते वासुदेवे मनो यस्य
जपहोमार्चनादिषु तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् क्व नाकपृष्ठगमनं पुन
रावृत्तिलक्षणम् क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् तस्मादहर्निशं विष्णुं संस्म
रन्पुरुषो मुने न याति नरकं मर्त्यः संक्षीणाखिलपातकः मनःप्रीतिकरः स्वर्गो न
रकस्तद्विपर्ययः नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम वस्त्वेकमेव दुःखाय सुखाये
र्ष्योद्भवाय च कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः तदेव प्रीतये भूत्वा पुन
र्दुःखाय जायते तदेव कोपाय यतः प्रसादाय च जायते तस्माद्दुःखात्मकं नास्ति न।
च किंचित्सुखात्मकम् मनसः परिणामोयं सुखदुःखोपलक्षणः ज्ञानमेव परं ब्र।
ह्म ज्ञानं बन्धाय चेष्यते ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम् विद्याविद्ये हि मैत्रे
य ज्ञानमेवोपधारय एवमेतन्मयाख्यातं भवतो मंडलं भुवः पातालानि च सर्वाणि।

द्वि॰
वि॰
पु॰
८२

पतंत्येतेसोमंविक्रीणतेचयः मधुहाग्रामहंताचयातिवैतरणीन्नरः धनयौवनमत्तास्त
मर्यादाभेदिनोहिये तेकृछ्रेयांत्यशौचाश्चकुहकाजीविनश्चये असिपत्रवनंयातिवन।
च्छेदीवृथैवयः देवद्रव्योपजीवीचवैरंवयातिसंशयम् औरभ्रकोमृगव्याधोवह्निज्वा।
लेपततिवै यांत्येतेद्विजतत्रैवयश्चापाकेषुवह्निदः व्रतस्यलोपकोयश्चस्वाश्रमाद्वि
च्युतश्चयः संदंशयातनामध्येपततस्तावुभावपि दिवास्वप्नेतुस्कंदंतेयेनराब्रह्मचा।
रिणः पुत्रैरध्यापितायेचतेपतंतिश्वभोजने एतेचान्येचनरकाः शतशोथसहस्रशः
येषुदुष्कृतकर्माणःपच्यंतेयातनागताः तथैवपापान्येतानितथान्यानिसहस्रशः भु
ज्यंतेयानिपुरुषैःनरकांतरगोचरैः वर्णाश्रमविरुद्धंचकर्मकुर्वंतियेनराः कर्मणा।
मनसावाचानिरयेषुपतंतिते अधःशिरोभिर्दृश्यंतेनारकादिविदेवतैः देवाश्चाधो
मुखान्सर्वानधःपश्यंतिनारकान् स्थावराःक्रिमयोब्जाश्चपक्षिणःपशवोनराः धा।
र्मिकास्त्रिदशास्तद्वमोक्षिणश्चयथाक्रमम् सहस्रभागप्रथमाद्वितीयानुक्रमास्त
था सर्वेह्येतेमहाभागयावन्मुक्तिसमाश्रयाः यावंतोजंतवःस्वर्गेतावंतोनरकौक।
सः पापकृ तिनरकंप्रायश्चित्तपराङ्मुखः पापानामनुरूपाणिप्रायश्चित्तानियद्य
था तथातथैवसंस्मृत्यप्रोक्तानिपरमर्षिभिः पापेगुरूणिगुरूणिस्वल्पान्यल्पेचतद्वि।

ग्नं वक्ति स नरो याति रौरवम् । भ्रूणहा पशुहन्ता च यो गोघ्नः स्वर्णनिस्तेनम् याति ते नरकं घोरं पंचरुद्धो ।
कुसतिरोधकः । सुरापो ब्रह्महन्ता च सुवर्णस्य च हारकः । प्रयाति नरके यस्तु तैः संसर्गी ।
मुपैति वै । राजन्यवैश्यहन्ता यो न्यस्ते वा गुरुतल्पगः । तप्तकुम्भे स संयाति गामी हन्ता राजभटाश्च ।
यः साध्वीविक्रयकृद्वन्धपालको हयविक्रयी । तप्तलोहे नरः पश्यते यः स्वभक्तं परित्यजेत् ।
स्नुषां सुतां चापि गत्वा महाज्वाले निपात्यते । अवमंता गुरूणां यो यस्त्वाक्रोष्टा नराधमः । वे
दस्य दूषिता यस्तु वेदविक्रयकृच्च यः । अगम्यागामी यस्तु स्यात् याति शवलं द्विज । चौरो वि
मोहे पतति मर्यादाभेदकस्तथा । देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः । स याति कृमिभक्षे ।
वै कृमिशे च दुरिष्टकृत् । पितृदेवमनुष्यान्स्वदत्त्वा भाति नराधमः । लालाभक्षे स यात्युग्रे शा
रकर्ता च वेधकः । करोति कर्णिनो यस्तु यस्तु खड्गादिकृन्नरः । प्रयान्त्येते विशसने नरकेऽसु पा
दाकृणे । असत्प्रतिगृहीता च नरके यात्यधोमुखे । अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः
कृमिपूयवहे चैको याति मिष्टान्नभुङ्नरः । लाक्षामांसरसानां च तिलानां लवणस्य च । वि
क्रेता ब्राह्मणो याति तमेव नरकं द्विज । मार्जारकुक्कुटच्छागान् श्ववराहविहंगमान् । लाल
यन्नरकं याति तमेव द्विजसत्तम । रंगोपजीवी कैवर्तो कुण्डाशी गरदस्तथा । सूची माहि
षकश्चैव पर्वकारी च यो द्विजः । आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः । रुधिरांधे

द्वि॰
विष्णु॰
८१

वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि यस्यैषा सकला पृथ्वी फणामणिशिखारुणा आस्ते कु-
सुममालेव कस्तद्वीर्यं वदिष्यति यदा विजृंभतेनंतो मदाघूर्णितलोचनः तदा चलति भू-
रेषा साद्रितोयाद्रिकानना गंधर्वाप्सरसः सिद्धाः किंनरोरगचारणाः नांतं गुणानां
गच्छंति तेनानंतो यमव्ययः यस्य भोगिवनिताहस्तैः लापितं हरिचंदनम् मुहुः श्वासानि-
लायस्तं याति दिक्षु दवासताम् यमाराध्य पुराणर्षिः गर्गो ज्योतींषि तत्वतः ज्ञातवान्सक-
लं चैव निमित्तेपठितं फलम् तेनेयं नागवर्येण शिरसा विधृता मही बिभर्ति मालां लो-
कानां सदेवासुरमानुषीम् इति श्रीविष्णुपुराणे ब्रह्माण्डपाराशरीयायां संहितायां द्वि-
तीयांशे पंचमोध्यायः श्रीपराशर उवाच ततो निबोध नरकान्विप्र ततोधः सलिलस्य च
पापिनो येषु पत्यंते तांश्रुणुष्व महामुने रौरवः सूकरो रोधस्तालो विशसनस्तथा म-
हाज्वालस्तप्तकुम्भो लवणोथ विलोहितः रुधिरांधो वैतरणी कृमिशः कृमिभोजनः अ-
सिपत्रवनं घोरं लालाभक्षश्च दारुणः तथा पूयवहः पापो वह्निज्वालो ह्यधःशिराः सं-
दंशः कालसूत्रश्च तमश्चावीचिरेव च श्वभोजनोथाप्रतिष्ठः अवीचिश्च तथा परः इत्येव-
मादयश्चान्ये नरका दारुणाः यमस्य विषये घोराः शस्त्राग्निविषदायिनः पतंति ये-
षु पुरुषाः पापकर्मरतास्तु ये कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् यश्चान्यद-

ताले कस्य न प्रीतिर्विमुक्तस्यापि जायते दिवाकररश्मयो यत्र प्रभां तन्वंति नातपम् शशिनः
श्च न शीताय निशि द्योताय केवलम् भक्ष्यभोज्यमहापानमुदितैरपि भोगिभिः यत्र न ज्ञा
यते कालो गतोपि दनुजादिभिः वनानि नद्यो रम्याणि सरांसि कमलाकराः पुंस्कोकिला
भिलापमनोज्ञान्यम्बराणि च भूषणान्यतिशुभ्राणि गंधाढ्यं चानुलेपनम् वेणुवीणा
मृदंगानां स्वनास्तूर्याणि च द्विज एतान्यन्यानि चोदारभाग्यभोग्यानि दानवैः दैत्योरगै
श्च भुज्यंते पातालांतरगोचरैः पातालानामधश्चास्ते विष्णोर्या तामसी तनुः शेषाख्याय
द्गुणान्वक्तुं न शक्ता दैत्यदानवाः योनंतः पठ्यते सिद्धैः देवो देवर्षिपूजितः स सहस्रशि
रा व्यक्तः स्वस्तिकामलभूषणः फणामणिसहस्रेण यः स विद्योतयन्दिशः सर्वान्करोति
निर्वीर्यान्हिताय जगतोसुरान् मदाघूर्णितनेत्रोसौ यः सदैवैककुंडलः किरीटी स्रग्ध
रो भाति साग्निः श्वेत इवाचलः नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः साभ्रगंगा
प्रवाहोसौ कैलासाद्रिरिवापरः लांगलासक्तहस्ताग्रो बिभ्रन्मुसलमुत्तमम् उपास्यते
स्वयं कान्त्या यो वारुण्या च मूर्तया कल्पांते यस्य वक्त्रेभ्यो विषानलशिखोज्वलः संकर्ष
णात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम् स बिभ्रच्छेखरीभूतनिशेषं क्षितिमंडलम्
आस्ते पातालमूलस्थः शेषोशेषसुरार्चितः तस्य वीर्यं प्रभावश्च स्वरूपं रूपमेव च नहि

प्रस्थितम् यत्र संभुञ्जते विप्र प्रजाः सर्वाः सदैव हि स्वादूदकस्य परतो दृश्यते लोकसंस्थि
तिः द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता लोकालोकस्ततः शैलो योजनायुतवि
स्तृतः उच्छ्रायेणापि तावन्ति सहस्राण्यचलो हि सः ततस्तमः समावृत्य तं शैलं सर्व।
तःस्थितम् तमश्चाण्डकटाहेन समन्तात्परिवेष्टितम् पंचाशत्कोटिविस्तारा सेयमु।
र्वी महामुने सहैवाण्डकटाहेन सद्वीपाब्धिमहीधरा सेयं धात्री विधात्री च सर्वभूतगु
णाधिका आधारभूता सर्वेषां मैत्रेय जगतामिति इति श्रीविष्णुपुराणे द्वितीयांशे।
पाराशरीयायां संहितायां प्रथमेंशे चतुर्थोऽध्यायः श्रीपराशर उवाच विस्ता
र एष कथितः पृथिव्या भवतो मया सप्ततिस्तु सहस्राणि द्विजोच्छ्रायोपि कथ्यते
दशसाहस्रमेकैकं पातालं मुनिसत्तम अतलं वितलं चैव नितलं च गभस्तिमत् न
महाख्यं सुतलं चाग्र्यं पातालं चापि सप्तमम् शुक्लकृष्णारुणाः पीताः शर्कराः शैलकाञ्चनाः भू
मयो यत्र मैत्रेय वरप्रासादशोभिताः तेषु दानवदैतेया काद्रेयशतसंघशः निवसं
ति महानागजातयश्च महामुने स्वर्लोकादपि रम्याणि पातालानीति नारदः प्राह स्वर्ग
सदां मध्ये पातालाभ्यागतो दिवि आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः नागैरा
भ्रियमाणास्तु पातालं केन तत्समम् दैत्यदानवकन्याभिरितश्चेतश्च शोभितम् पा

तयोर्वर्षेतथागिरिः दशवर्षसहस्राणितत्रजीवंतिमानवाः निरामयाविशोकाश्चरा
गद्वेषविवर्जिताः अधमोत्तमौतेषास्तांनवध्यवधकौद्विज नेर्ष्यासूयाभयंरोषोदोषो
लोभादिकंनच महावीरंबहिर्वर्षधातकीखंडमंततः मानसोत्तरशैलस्यदेवदैत्यादिसेविते।
सत्यानृतेनतत्रास्तांद्वीपेपुष्करसंज्ञिते नतत्रनद्यःशैलावा द्वीपेवर्षद्वयान्विते तुल्य
वेशास्तुमनुजादेवैस्तत्रैकरूपिणः वर्णाश्रमाचारहीनंधर्माहरणवर्जितम् त्रयीवार्ता
दंडनीतिशुश्रूषारहितंचयत् वर्षद्वयंतुमैत्रेयभौमःस्वर्गोयमुत्तमः सर्वस्यसुखदःको
कालोजरारोगादिवर्जितः पुष्करेधातकीखंडेमहावीरेचवैमुने न्यग्रोधःपुष्करद्वीपेब्र
ह्मणःस्थानमुत्तमम् तस्मिन्निवसतेब्रह्मापूज्यमानःसुरासुरैः स्वादूदकेनोदधिनापु
ष्करःपरिवेष्टितः समेनपुष्करस्यैवविस्तारान्मंडलात्तथा एवंद्वीपाःसमुद्रैस्तुसप्त
सप्तभिरावृताः द्वीपश्चैवसमुद्रश्चसमानौद्विगुणौपरौ पयांसिसर्वदासर्वसमुद्रेषुस
मानिवै न्यूनातिरिक्ततातेषांकदाचिन्नैवजायते स्थालीस्थमग्निसंयोगादुद्रेकिसलि।
लंयथा तथेंदुवृद्धौसलिलमंभोधौमुनिसत्तम अन्यूनानतिरिक्ताश्चवर्धंत्यापोह्रस
तिच उदयास्तमनेष्विंदोःपक्षयोःशुक्लकृष्णयोः दशोत्तराणिपंचैवअंगुलानांश।
तानिवै अपांवृद्धिक्षयौदृष्टौसामुद्रीणांमहामुने भोजनंपुष्करद्वीपेतत्रस्वयम्।

द्वि॰ वि॰ पु॰ ७८

त्रपुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः नद्यश्चात्र महापुण्याः सर्वपापभयापहाः सु
कुमारी कुमारी च नलिनी वेणुका च या इक्षुश्च धेनुका चैव गभस्ती सप्तमी तथा अन्या
स्तु शतशस्तत्र क्षुद्रनद्यो महामुने महीधरास्तथा संति शतशोथ सहस्रशः ताः पिबं
ति मुदा युक्ता जलदादिषु ये स्थिताः वर्षेष्वेतेषु जनपदाः स्वर्गादभ्येत्य मेदिनीम् धर्म
हानिर्न तेष्वस्ति न संघर्षः परस्परम् मर्यादाव्युत्क्रमो वापि तेषु देशेषु सप्तसु मगाश्च मा
गधाश्चैव मानसा मंदगास्तथा मगाश्च ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तु ते वैश्या
स्तु मानसास्तेषां शूद्रास्तेषां तु मंदगाः शाकद्वीपे तु तैर्विष्णुः सूर्यरूपधरो मुने यथो
क्तैरिज्यते सम्यक् कर्मभिर्नियतात्मभिः शाकद्वीपस्तु मैत्रेय क्षीरोदेन समंततः शाकद्वी
पप्रमाणेन वलयेनेव वेष्टितः क्षीराब्धिः सर्वतो ब्रह्मन् पुष्कराख्येन वेष्टितः द्वीपेन शाक
द्वीपात्तु द्विगुणेन समंततः पुष्करे सवनस्यापि महावीरोभवत्सुतः धातकिश्च तयो
स्तत्र द्वे वर्षे नामचिह्निते महावीरं तथैवान्यद्धातकीखंडसंज्ञितम् एकश्चात्र महा
भागः प्रख्यातो वर्षपर्वतः मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः योजनानां सह
स्राणि ऊर्ध्वं पंचाशदुच्छ्रितः तावदेव च विस्तीर्णः सर्वतः परिमंडले पुष्करद्वीपवल
यं मध्येन विभजन्निव स्थितोसौ तेन विच्छिन्नं जातं तद्वर्षकद्वयम् वलयाकारमेकैकं

क्रौंचश्चवामनश्चैवतृतीयश्चांधकारकः दिवावृत्पंचमश्चात्रतथान्यःपुंडरीकवान् दुं
दुभिश्चमहाशैलोद्विगुणास्तेपरस्परम् द्वीपाद्वीपेषुयेशैलायथाद्वीपानितेतथा वर्षे
ष्वेतेषुरम्येषुवर्षशैलवरेषुच निवसंतिनिरातंकाःसहदेवगणैःप्रजाः पुष्कराःपुष्कल
न्याःख्यातास्तुमहामुने ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चानुक्रमोदिताः तत्रनद्योमै
त्रेययाःपिबंतिसुमहाबलाः सप्तप्रधानाःशतशस्तथान्याःक्षुद्रनिम्नगाः गौरीकुमुद्वती
चैवसंध्यारात्रिर्मनोजवा ख्यातिश्चपुंडरीकाचसप्तैतावर्षनिम्नगाः तत्रापिविष्णुर्भगवा
न्पुष्कराद्यैर्जनार्दनः यागैरुद्रस्वरूपस्तुइज्यतेयज्ञसन्निधौ क्रौंचद्वीपःसमुद्रेणदधिमंडो
दकेनतु आवृतःसर्वतःक्रौंचद्वीपतुल्येनमानतः दधिमंडोदकश्चापिशाकद्वीपेन
संवृतः क्रौंचद्वीपस्यविस्ताराद्द्विगुणेनमहामते शाकद्वीपेश्वरस्यापिहव्यस्यचम
हात्मनः सप्तैवतनयास्तेषांददौवर्षाणिसप्तसः जलदश्चकुमारश्चसुकुमारोमरीच
कः कुसुमोदश्चमौदाकिःसप्तमश्चमहाद्रुमः तत्संज्ञान्येवतत्रापिसप्तवर्षाण्यनुक्र
मात् तत्रापिपर्वताःसप्तवर्षविच्छेदकारिणः पूर्वस्तत्रोदयगिरिर्जलधारस्तथापरः त
थारैवतकःश्यामःतथैवास्तगिरिर्द्विज आंबिकेयस्तथारम्यःकेसरीपर्वतोत्तमः
शाकस्तत्रमहावृक्षःसिद्धगंधर्वसेवितः यत्पत्रवातसंस्पर्शादाह्लादोजायतेपरः त

वि॰ पु॰

मतनः ज्योतिष्मतः कुशद्वीपे सप्तपुत्रांश्शृणुष्व तान् उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृ
तिः प्रभाकरोथ कपिलस्तन्नाम्ना वर्षपद्धतिः तस्यां वसन्ति मनुजाः सह दैतेयदानवैः ॥३८
तथैव देवगंधर्वयक्षकिंपुरुषादयः वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः दमिनः
शुष्मिणः स्नेहा मंदेहाश्च महामुने ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः
यथोक्तकर्मकर्तृत्वात्स्वाधिकारक्षयाय ते तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्दनम् यजंतः क्ष
पयंत्युग्रमधिकारफलप्रदम् मणिद्रुमो हेमशैलश्च द्युतिमान्पुष्पवांस्तथा कुशेशयो हरि
श्चैव सप्तमो मंदराचलः वर्षाचलास्तु सप्तैते तत्र द्वीपे महामुने नद्यश्च सप्त तासां तु नाम
नीम्यानुक्रमात् धूतपापा शिवा चैव पवित्रा संमतिस्तथा विद्युदंभा मही चान्या सर्व
पापहरास्त्विमाः अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः कुशद्वीपे कुशस्तंभः संज्ञा
या तस्य तत्स्मृतम् तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः घृतोदश्च समुद्रो वै क्रौंचद्वी
पेन संवृतः क्रौंचद्वीपो महाभाग श्रूयतां चापरो महान् कुशद्वीपस्य विस्ताराद्द्विगुणो य
स्य विस्तरः क्रौंचद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः तन्नामानि च वर्षाणि तेषां चक्रे मही
पतिः कुशलो मलगश्चोष्णः पीवरोथांधकारकः मुनिश्च दुंदुभिश्चैव सप्तैते तत्सुता मु
ने तत्रापि देवगंधर्वसेविताः सुमनोरमाः वर्षाचला महाबुद्धे तेषां नामानि मे शृणु १

संवेष्टितस्तथाप्लक्षः शाल्मलेनेति शाभय शाल्मलस्येश्वरोवीरोवपुष्मांस्तत्सुतांछृणु
तेषांतुनामसंज्ञानिसप्तवर्षाणितानिवै श्वेतोथहरितश्चैवजीमूतोरोहितस्तथा वैद्यु
तोमानसश्चैवसुप्रभश्चमहामते शाल्मलेनसमुद्रोसौद्वीपेनेक्षुरसोदकः विस्तार
द्विगुणेनाथसर्वतःसंवेष्टितःस्थितः तत्रापिपर्वताःसप्तविज्ञेयारत्नयोनयः वर्षाभिव्यं
जकायेतुतथासप्तैवनिम्नगाः कुमुदश्चोन्नतश्चैवतृतीयश्चबलाहकः द्रोणोयत्रम
होषध्यःसचतुर्थोमहीधरः कंकस्तुपंचमःषष्ठोमहिषःसप्तमस्तथा ककुद्मान्पर्वतव
रःसरिन्नामानिमेशृणु योनीतोयावितृष्णाचचंद्रामुक्ताविमोचनी निवृत्तिःसप्तमीता
सांस्मृताःपापोपशांतिदाः श्वेतंचलोहितंचैवजीमूतंहरितंतथा वैद्युतंमानसंचैवसुप्र
भंचातिशोभनम् सप्तैतानितुवर्षाणिचातुर्वर्ण्ययुतानिवै शाल्मलेयेतुवर्णाश्चवसंत्येते
महामते कपिलाश्चारुणाःपीताःकृष्णाश्चैवपृथक्पृथक् ब्राह्मणाःक्षत्रियावैश्याःशू
द्राश्चैवयजंतितम् भगवंतंसमस्तस्यविष्णुमात्मानमव्ययम् वायुभूतंमखश्रेष्ठैर्यज्वनो
यज्ञसंस्थितम् देवानामत्रसान्निध्यमतीवसुमनोहरम् शाल्मलिश्चमहावृक्षोनामनि
र्वृतिकारकः एषद्वीपःसमुद्रेणसुरोदेनसमावृतः विस्ताराच्छाल्मलस्यैवसमेनतु
समावृतः सुरोदकःपरिवृतःकुशद्वीपेनसर्वतः शाल्मलस्यतुविस्ताराद्द्विगुणेनस

कारकास्तेषां तथान्ये वर्षपर्वताः सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम गोमेदश्चैव चंद्रश्च ना
रदो दुंदुभिस्तथा सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः वर्षाचलेषु रम्येषु वर्षेष्वेतेषु
चानघः वसंति देवगंधर्वसहिताः सततं प्रजाः तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः ना
धयो व्याधयो वापि सर्वकालसुखं हि तत् तेषां नद्यश्च सप्तैव वर्षाणां तु समुद्रगाः नामतस्ताः
प्रवक्ष्यामि श्रुताः पापं हरंति याः अनुतप्ता शिखी चैव विपाशा त्रिदिवा क्रमुः अमृता सुकृता
चैव सप्तैतास्तत्र निम्नगाः एते शैलास्तथा नद्यः प्रधानाः कथितास्तव क्षुद्रनद्यस्तथा शै
लास्तत्र संति सहस्रशः ताः पिबंति सदा हृष्टा नदीर्जनपदास्तु ते अवसर्पिणी न तेषां वै न चै
वोत्सर्पिणी द्विज न त्वेवास्ति युगावस्था तेषु स्थानेषु सप्तसु त्रेतायुगसमः कालः सर्वदैव म
हामते प्लक्षद्वीपादिषु ब्रह्मन् शाकद्वीपांतकेषु वै पंचवर्षसहस्राणि जना जीवंत्यनामयाः ध
र्मः पंचस्वथैतेषु वर्णाश्रमविभागजः वर्णाश्च तत्र चत्वारस्तान्निबोध वदामि ते आर्यकाः
कुरवाश्चैव विविशा भाविनश्च ते विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम जंबूवृक्षप्रमा
णस्तु तन्मध्ये सुमहातरुः प्लक्षस्तन्नामसंज्ञोयं प्लक्षद्वीपो द्विजोत्तम इज्यते तत्र भगवांस्तैर्व
र्णैरार्यकादिभिः सोमरूपी जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः प्लक्षद्वीपप्रमाणेन प्लक्षद्वी
पः समावृतः तथैवेक्षुरसोदेन परिवेषानुकारिणा इत्येतत्तव मैत्रेय प्लक्षद्वीपमुदाहृतं

हिकर्मभूरेषाअतोन्याभोगभूमयः अत्रजन्मसहस्राणांसहस्रैरपिसत्तम कदा।
चिल्लभतेजन्तुर्मानुष्यंपुण्यसंचयात् गायंतिदेवाःकिलगीतकानिधन्यास्तुयेभा
रतभूमिभागे स्वर्गापवर्गास्पदमार्गभूतेभवंतिभूयःपुरुषाःसुरत्वात् कर्माण्यसं
कल्पिततत्फलानि संन्यस्यविष्णौपरमात्मरूपे अवाप्यतांकर्ममहीमनंतेतस्मिं
ल्लयंयेविमलाःप्रयांति जानीमनैतत्क्ववयंविलीनेस्वर्गप्रदेकर्मणिदेहबंधम् प्रा
प्स्यामधन्याःखलुतेमनुष्याःयेभारतेनेंद्रियविप्रहीनाः नववर्षंतुमैत्रेयजम्बुद्वीप
मिदंमया लक्षयोजनविस्तारंसंक्षेपात्कथितंतव जंबुद्वीपंसमावृत्यलक्षयोजन
विस्तरः मैत्रेयवलयाकारःस्थितःक्षारोदधिर्बहिः इतिश्रीविष्णुपुराणेब्रह्माणे
पाराशरीयायांसंहितायांद्वितीयेंशेतृतीयोध्यायः श्रीपराशरः क्षारोदेन।
यथाद्वीपोजम्बुसंज्ञोविवेष्टितः संवेष्ट्यक्षारमुदधिंप्लक्षद्वीपस्तथास्थितः जंबु
द्वीपस्यविस्तारःशतसाहस्रसंमितः सएवद्विगुणोब्रह्मन्प्लक्षद्वीपउदाहृतः।
सप्तमेधातिथेःपुत्राःप्लक्षद्वीपेश्वरस्यवै ज्येष्ठःशांतभयोनामशिशिरस्तदनंतरम्
सुखोदयस्तथानंदःशिवःक्षेमकएवच ध्रुवश्चसप्तमस्तेषांप्लक्षद्वीपेश्वराहिते पूर्वं
शांतभयंवर्षंशिशिरंसुखदंतथा आनंदंचशिवंचैवक्षेमकंध्रुवमेवच मर्या

श्री
वि
वि
२९

ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः इज्यायुधवणिज्याद्यैर्वर्तयंतो व्यवस्थि
ताः शतद्रुचंद्रभागाद्या हिमवत्पादनिःसृताः वेदस्मृतिमुखाद्याश्च पारियात्रोद्भवा
मुने नर्मदासुरसाद्याश्च नद्यो विंध्यविनिर्गताः तापीपयोष्णीनिर्विंध्याप्रमुखा ऋक्ष।
संभवाः गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा सह्यपादोद्भवा नद्यः स्मृताः
पापभयापहाः कृतमाला ताम्रपर्णीप्रमुखा मलयोद्भवाः त्रिसामा चर्षिकुल्याद्या
महेंद्रप्रभवाः स्मृताः ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसंभवाः आसां नद्युपन
द्यश्च संत्यन्याश्च सहस्रशः तास्विमे कुरुपंचालमध्यदेशादयो जनाः पूर्वदेशा
दिकाश्चैव कामरूपनिवासिनः पौंड्राः कलिंगा मगधा दाक्षिणात्याश्च कृत्स्नशः
तथापरांताः सौराष्ट्राः शूद्राभीरास्तथार्बुदाः कारूषा मालवाश्चैव पारियात्रनिवा
सिनः सौवीराः सैंधवा हूणाः साल्वाः शाकलवासिनः मद्रारामास्तथांबष्ठाः पारसी
कादयस्तथा आसां पिबंति सलिलं वसंति सहिताः सदा चत्वारि भारते वर्षे युगान्यत्र
महामुने कृतं त्रेता द्वापरं च कलिश्चान्यत्र न क्वचित् तपस्तप्यंति यतयो जुह्वते चात्र य
ज्वनः दानानि चात्र दीयंते परलोकार्थमादरात् पुरुषैर्यज्ञपुरुषो जंबूद्वीपे सदेज्यते
यज्ञो यज्ञपतिर्विष्णुरन्यद्वीपेषु चान्यथा अत्रापि भारतं श्रेष्ठं जंबूद्वीपे महामुने यतो।

रूपेण सर्वत्र सर्वः सर्वत्रगो हरिः सर्वस्याधारभूतोसौ मैत्रेयाखिलात्मकः यानि
किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने नतेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम् स्वस्थाः
प्रजा निरातंकाः सर्वदुःखविवर्जिताः दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः नतेषु
वर्षते देवो भौमान्यंभांसि तेषु वै कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना सर्वेष्वतेषु व
र्षेषु सप्त सप्त कुलाचलाः नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम इति श्रीविष्णुपुरा
णे ब्रह्माण्डे पाराशरीयायां संहितायां द्वितीयो द्वितीयोध्यायः श्रीपराशर उवाच उ
त्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् वर्षं तद्भारतं नाम भारती यत्र संततिः न
वयोजनसाहस्रो विस्तारोस्य महामुने कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् महे
न्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः विंध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः अ
तः संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयांति च तिर्यक्त्वं नरकं चापि यांत्यतः पुरुषा मुने इ
तः स्वर्गश्च मोक्षश्च मध्यं चांतश्च गम्यते न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते भा
रतस्यास्य वर्षस्य नव भेदान्निशामय इंद्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् नाग
द्वीपस्तथा सौम्यो गांधर्वस्त्वथ वारुणः अयं तु नवमस्तेषां द्वीपः सागरसंवृतः यो
जनानां सहस्रं तु द्वीपोयं दक्षिणोत्तरः पूर्वे किराता यस्यांते पश्चिमे यवनाः स्थिताः।

मणिशीलतनीलसकलोक्तः पश्चिमं केतुमालाख्यं वर्षमेतेतिचार्णवम् भद्रास्तथोत्तरगि
नीलनत्रांस्तथा कुरून् अनीलोत्तरमेवाथि समस्थितिमहामहामने सानीलनिषधाया
मोमाल्यवद्गंधमादनौ तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितिः भारताः केतुमाला
श्चभद्राश्वाः कुरवस्तथा पत्राणि लोकपद्मस्य मर्यादाशैलबाह्यतः जठरो देवकूटश्च म
र्यादापर्वतावुभौ तौ दक्षिणोत्तरायामावानीलनिषधायतौ गंधमादनकैलासौ पूर्व
पश्चायतावुभौ अशीतियोजनायामावर्णवांतर्व्यवस्थितौ निषधः पारियात्रश्च मर्या
दापर्वताविमौ मेरुपश्चिमदिग्भागे यथापूर्वौ तथा स्थितौ इत्येते मुनिवर्योक्ता मर्या
दापर्वतास्तव जठराद्यास्तथा मेरोर्येषां द्वौ द्वौ चतुर्दिशम् मेरोश्चतुर्दिशं ये तु प्रोक्ताः के
सरपर्वताः शीताद्याश्च मुने तेषामतीव हि मनोरमाः शैलानामंतरद्रोण्यः सिद्धचार
णसेविताः सुरम्याणि तथा तासु काननानि पुराणि च लक्ष्मीविष्ण्वग्निसूर्यादिदेवा
नां मुनिसत्तम तास्वायतनवर्याणि जुष्टानि वरकिन्नरैः गंधर्वयक्षरक्षांसि तथा दैतेयदा
नवाः क्रीडंति तासु रम्यासु शैलद्रोणीष्वहर्निशम् भौमा ह्येते स्मृताः स्वर्गा धर्मिणामाल
या मुने नैतेषु पापकर्तारो यांति जन्मशतैरपि भद्राश्वे भगवान्विष्णुरास्ते हयशिरा द्विज।
वराहः केतुमाले तु भारते कूर्मरूपधृक् मत्स्यरूपश्च गोविंदः कुरुष्वास्ते जनार्दनः विश्व

नवजायते तीरमृत्तद्रसंप्राप्यसुखवायुविशोषिता जाम्बूनदाख्यंभवतिसुवर्णंसिद्धभूष
णम् भद्राश्वःपूर्वतोमेरोःकेतुमालेचपश्चिमे वर्षेद्वेतुमुनिश्रेष्ठतयोर्मध्येइलावृतम् वनं
चैत्ररथंपूर्वेदक्षिणेगंधमादनम् वैभ्राजंपश्चिमेतद्वदुत्तरेनंदनंस्मृतम् अरुणोदंमहाभ
द्रंससितोदंचमानसम् सरांस्येतानिचत्वारिदेवभोग्यानिसर्वदा शीतांभश्चकुमुंजश्चकु
ररीमाल्यवांस्तथा वैकंकप्रमुखामेरोःपूर्वतःकेसराचलाः त्रिकूटःशिशिरश्चैवपतंगो
रुचकस्तथा निषधादिर्दक्षिणतस्तस्यकेसरपर्वताः शिखिवासःसवैडूर्यःकपिलोगं
धमादनः जारुधिप्रमुखास्तद्वत्पश्चिमेकेसराचलाः मेरोरनंतरांगेषुजठरादिष्ववस्थि
ताः शंखकूटोथऋषभोहंसोनागस्तथापरः कालंजाद्याश्चतथोत्तरेकेसराचलाः
चतुर्दशसहस्राणियोजनानांमहापुरी मेरोरुपरिमैत्रेयब्रह्मणःप्रथितादिवि तस्याः
समंततश्चाष्टौदिक्षुविदिक्षुच इंद्रादिलोकपालानांप्रख्याताःप्रवराःपुरः वि
ष्णुपादविनिष्क्रांताप्लावयित्वेंदुमंडलम् समंतात्ब्रह्मणःपुर्यांगंगापततिवैदिवः सा
तत्रपतितादिक्षुचतुर्धाप्रतिपद्यते सीताचालकनंदाचचक्षुर्भद्राचवैक्रमात् पूर्वेणसी
ताशैलान्शैलंयात्यंतरिक्षगा ततश्चपूर्ववर्षेणभद्राश्वेनैतिसार्णवम् तथैवालक
नंदापिदक्षिणेनैत्यभारतम् प्रयातिसागरंभूत्वासप्तभेदामहामुने सुचक्षुःपश्चि

द्वि॰ वि॰ पु॰ २८

मेरुर्मैत्रेयमृध्येकनकपर्वतः चतुरशीतिसाहस्रैर्योजनैरस्यचोच्छ्रयः प्रविष्टःषोडशा।
धस्ताद्द्वात्रिंशन्मूर्द्धिविस्तृतः मूलेषोडशसाहस्रोविस्तरस्तस्यसर्वतः भूपद्मस्यास्य
शैलोसौकर्णिकाकारसंस्थितः हिमवांहेमकूटश्चनिषधश्चास्यदक्षिणे नीलःश्वे
तश्चशृंगीचउत्तरेवर्षपर्वताः लक्षप्रमाणौद्वौमध्यौदशहीनास्तथापरे सहस्र
द्वितयोच्छ्रायास्तावद्विस्तारिणश्चते भारतंप्रथमंवर्षंततःकिंपुरुषंस्मृतम् हरि
वर्षंतथैवान्यंमेरोर्दक्षिणतोद्विज रम्यकंचोत्तरंवर्षंतस्यैवानुहिरण्मयम् उत्तराः
कुरवश्चैवयथावैभारतंतथा नवसाहस्रमेकैकमेतेषांद्विजसत्तम इलावृतंचतन्म
ध्येतन्मध्येमेरुरुच्छ्रितः मेरोश्चतुर्दिशंतत्रनवसाहस्रविस्तृतम् इलावृतंमहाभाग
चत्वारश्चात्रपर्वताः विष्कंभारचितामेरोर्योजनायुतमुच्छ्रिताः पूर्वेणमंदरोनामदक्षिणे
दक्षिणेगंधमादनः विपुलःपश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्मृतः कदंबस्तेषुजंबूश्च
पिप्पलोवटएवच एकादशशतायामाःपादपागिरिकेतवः जंबूद्वीपस्यसाजंबू
र्नामहेतुर्महामुने महागजप्रमाणानिजंबास्तस्याःफलानिवै पतंतिभूभृतःपृष्ठे।
शीर्यमाणानिसर्वतः रसेनतेषांप्रख्यातातत्रजंबूनदीतिवै सरित्प्रवर्ततेसाचपीय
तेतन्निवासिभिः नस्वेदोनचदौर्गन्ध्यंनजरानेंद्रियक्षयः तत्पानस्वच्छमनसांजनानां

तोभवत् पृथुस्ततस्ततो नक्तो नक्तस्यापि गयः स्मृतः नरो गयस्य तनयस्तत्पुत्रोभूद्विरा
ट् तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत महांतस्तत्सुतश्चाभून्मनस्युस्तस्य चात्मजः
त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः शतजिद्रजसस्तस्य जज्ञे पुत्रशतं मुने विष्व
ग्ज्योतिःप्रधानास्ते यैरिमा वर्धिताः प्रजाः तैरिदं भारतं वर्षं नवभेदमलंकृतम् तेषां
वंशप्रसूतैश्च भुक्तेयं भारती पुरा कृतत्रेतादिसर्गेण युगाख्या ह्येकसप्ततिः एष स्वा
यंभुवः सर्गो येनेदं पूरितं जगत् वाराहे तु मुने कल्पे पूर्वमन्वन्तराधिपः इति श्री वि
ष्णुपुराणे ब्रह्माण्डे पाराशरीयायां संहितायां द्वितीयेंशे प्रथमोध्यायः मैत्रेय उवा
च कथितो भवता ब्रह्मन्सर्गः स्वायंभुवस्य मे श्रोतुमिच्छाम्यहं त्वत्तः सकलं मंड
लं भुवः यावंतः सागरा द्वीपास्तथा वर्षाणि पर्वताः वनानि सरितः पुर्यो देवादीनां
महामुने यत्प्रमाणमिदं सर्वं यदाधारं यदात्मकम् संस्थानमस्य च मुने यथावद्वक्तु
मर्हसि श्रीपराशरः मैत्रेय श्रूयतामेतत्संक्षेपाद्गदतो मम नास्य वर्षशतेनापि वक्तुं
शक्यश्च विस्तरः जंबूप्लक्षाह्वयौ द्वीपौ शाल्मलश्चापरो द्विज कुशः क्रौंचस्तथा शा
कः पुष्करश्चैव सप्तमः एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः लवणेक्षुसुरास
र्पिःदधिदुग्धजलैः समम् जम्बूद्वीपः समस्तानामेतेषां मध्यतः स्थितः तस्यापि

द्वि॰ वि॰ पु॰ २२

वर्षेषु तेषु तान्पुत्रानभिषिच्य महीपतिः शालिग्रामं महापुण्यं मैत्रेय तपसे ययौ यानि।
किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः।
विपर्ययो न तेष्वस्ति जरामृत्युभयं न च धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः न
तेष्वस्ति युगावस्था क्षेत्रेष्वष्टसु सर्वदा हिमाह्वयं तु वै वर्षं नाभेरासीन्महात्मनः तस्य
र्षभोऽभवत्पुत्रो मेरुदेव्यां महाद्युतिः ऋषभाद्भरतो जज्ञे ज्येष्ठः पुत्रशतस्य सः कृत्वा रा
ज्यं स्वधर्मेण तथेष्ट्वा विविधान्मखान् अभिषिच्य सुतं वीरं भरतं पृथिवीपतिम् तपसे।
स महाभागः पुलहस्याश्रमं ययौ वानप्रस्थविधानेन तत्रापि कृतनिश्चयः तपस्ते
पे यथान्यायं इयाज स महीपतिः तपसा कर्षितोऽत्यर्थं कृशो धमनिसंततः नग्नो वीटां मुखे
कृत्वा वीराध्वानं ततो गतः ततश्च भारतं वर्षमेतल्लोकेषु गीयते भरताय यतः पित्रा दत्तं
प्रातिष्ठता वने सुमतिर्भरतस्याभूत्पुत्रः परमधार्मिकः कृत्वा सम्यग्ददौ तस्मै राज्य।
मिष्टमखान्पिता पुत्रसंक्रामितश्रीस्तु भरतः स महीपतिः योगाभ्यासरतः प्राणान् शा
लग्रामेऽत्यजन्मुने अजायत च विप्रोऽसौ योगिनां प्रवरे कुले मैत्रेय तस्य चरितं कथयिष्या
मि ते पुनः सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो व्यजायत परमेष्ठी ततस्तस्मात्प्रतिहारस्तद
न्वयः प्रतिहर्तेति विख्यात उत्पन्नस्तस्य चात्मजः भवस्तस्मादथोद्गीथः प्रस्तावस्तत्सुतो

मेधाग्निबाहुपुत्रास्तु त्रयो योगपरायणाः जातिस्मरा महाभागा न राज्याय मनो दधुः
निर्मलाः सर्वकालं तु समस्तार्थेषु वै मुने चक्रुः क्रियां यथान्यायमफलाकांक्षिणो।
हि ते प्रियव्रतो ददौ तेषां सप्तानां मुनिसत्तम विभज्य सप्त द्वीपानि मैत्रेय सुमहात्म
नाम् जम्बूद्वीपं महाभागः सोऽग्नीध्राय ददौ पिता मेधातिथेस्तथा प्रादात् प्लक्षद्वीप
मथापरम् शाल्मले च वपुष्मन्तं नरेन्द्रमभिषिक्तवान् ज्योतिष्मन्तं कुशद्वीपे राजा।
नं कृतवान् प्रभुः द्युतिमन्तं च राजानं क्रौञ्चद्वीपे समादिशत् शाकद्वीपेश्वरं चापि ह।
व्यं चक्रे प्रियव्रतः पुष्कराधिपतिं चक्रे सवनं चापि स प्रभुः जम्बूद्वीपेश्वरो यस्तु।
आग्नीध्रो मुनिसत्तम तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव नाभिः किंपुरुषश्चैव हरिवर्ष
इलावृतः रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च केतुमालस्तथैवान्यः साधुचेष्टो नृपो
भवत् जम्बूद्वीपविभागांस्तेषां विप्र निशामय पित्रा दत्तं हिमाह्वं तु वर्षं नाभेस्तु दक्षिणं
हेमकूटं तथा वर्षं ददौ किंपुरुषाय सः तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् इलावृताय
प्रददौ मेरुर्यत्र तु मध्यमः नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता श्वेतं यदुत्तरं तस्मात् पि
त्रा दत्तं हिरण्वते यदुत्तरं शृंगवतो वर्षं तत्कुरवे ददौ मेरोः पूर्वेण यद्वर्षं भद्राश्वाय प्रद
त्तवान् गंधमादनवर्षं तु केतुमालाय दत्तवान् इत्येतानि ददौ तेभ्यः पुत्रेभ्यः स नराधिपः

अहंहरिःसर्वमिदंजनार्दनोनान्यत्ततःकारणकार्यजातम् ईदृङ्मनोयस्यनतस्यभूयोभ
वोद्भवाद्वंद्वगदाभवंति इत्येषतेंशःप्रथमःपुराणस्यास्यवैद्विज यथावत्कथितोयस्मिं
श्रुतेपापैर्विमुच्यते कार्तिक्यांपुष्करस्नानेद्वादशाब्देनयत्फलम् तदस्यश्रवणात्स
र्वंमैत्रेयाप्नोतिमानवः देवर्षिपितृगंधर्वयक्षादीनांचसंभवम् भवंतिशृण्वतःपुं
सोदेवावरदामुने इतिश्रीविष्णुपुराणेब्रह्माण्डेपाराशरीयायांसंहितायांप्र
थमेंशेद्वाविंशतिमोध्यायः प्रथमोंशःसमाप्तः श्रीमैत्रेयः भगवन्सर्वमाख्या
तंममैतदखिलंत्वया जगतःसर्वसंबंधियत्पृष्टोसिगुरोमया योयमंशोजगत्सृष्टि
संबंधोगदितस्त्वया तत्राहंश्रोतुमिच्छामिभूयोपिमुनिसत्तम प्रियव्रतोत्तानपादौ
सुतौस्वायंभुवस्ययौ तयोरुत्तानपादस्यध्रुवःपुत्रस्त्वयोदितः प्रियव्रतस्यनैवोक्ता
भवताद्विजसंततिः तामहंश्रोतुमिच्छामिप्रसन्नोवक्तुमर्हसि श्रीपराशरः क
र्दमस्यात्मजांकन्यामुपयेमेप्रियव्रतः सम्राट्कुक्षिःकन्येद्वेदशपुत्रास्तथापरे महा
प्रज्ञामहावीर्याविनीतादयिताःपितुः प्रियव्रतसुताःख्यातास्तेषांनामानिमेशृणु
आग्नीध्रश्चाग्निबाहुश्चवपुष्मान्द्युतिमांस्तथा मेधामेधातिथिर्भव्यःसवनःपुत्रएवच
ज्योतिष्मान्दशमस्तेषांसत्यनामासुतोभवत् प्रियव्रतस्यपुत्रास्तेप्रख्याताबलवीर्यतः

भक्तिर्यस्यास्ति तस्मिन्नुत्पन्ननिर्मलम् विद्यामयं तज्ज्ञानं सा विद्या को वा संस्थिते।
यद्यत्पुमान्प्रधानं च बुद्ध्यहंकारमेव च भूतानि च हृषीकेशो मनः सर्वेन्द्रियाणि च वि।
द्याविद्ये च मैत्रेय सर्वमेतत्समाश्रितम् सर्वभूतात्मकं स्थानस्वरूपपरिवर्जितम् विभ
र्त्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः सविकारप्रधानं च पुमांश्चैवाखिलं जगत्
बिभर्ति पुण्डरीकाक्षस्तदेव परमेश्वरः या विद्या या तथाविद्या यत्सद्यच्चासदव्यये
तत्सर्वं सर्वभूतेशे मैत्रेय मधुसूदने कलाकाष्ठानिमेषादिदिनर्त्वयनहायनैः का
लः स्वरूपो भगवानपापो हरिरव्ययः भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ मुनिसत्त
म महर्जनस्तपः सत्यो सप्तलोका इमे विभुः लोकात्ममूर्तिः सर्वेषां पूर्वेषामपि पूर्व
जः साधारः सर्वविद्यानां स्वयमेव हरिः स्थितः देवमानुषपश्वादिस्वरूपैर्बहुभिः।
विभुः स्थितः सर्वेश्वरोऽनन्तो भूतमूर्तिरमूर्तिमान् ऋचो यजूंषि सामानि तथैवा
थर्वणानि च इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः वेदाङ्गानि समस्तानि मन्वा
दिगदितानि च शास्त्राण्यशेषाण्याख्यानान्यनुवादाश्च ये क्वचित् काव्यालापा
श्च ये केचिद्गीतकान्यखिलानि च शब्दमूर्तिधरस्यैतद्वपुर्विष्णोर्महात्मनः यान्य
मूर्तानि मूर्तानि यान्यत्रान्यत्र वा क्वचित् सन्ति वै वस्तुजातानि तानि सर्वाणि तद्वपुः

प्र० वि० पु० ७१

जन्मनाशविकल्पवत् सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणोपरम् मूर्त्तं यद्योगिभिः
पूर्वं योगारंभेषु चिंत्यते सालंबनो महायोगः सबीजो यत्र संस्थितः मनस्यव्याहते स
म्यग्जायते सम्यग्युंजतां मुने स परः परशक्तीनां ब्रह्मणः समनंतरः मूर्त्तं ब्रह्म महाभा
ग सर्वब्रह्ममयो हरिः तत्र सर्वमिदं प्रोतमोतं चैवाखिलं जगत् ततो जगज्जगत्तस्मि।
न्स जगच्चाखिलं मुने क्षराक्षरमयो विष्णुर्बिभर्त्यखिलमीश्वरः पुरुषाव्याकृतम
यं भूषणास्त्रस्वरूपवत् मैत्रेय उवाच भूषणास्त्रस्वरूपेण यच्चैतदखिलं जगत्
बिभर्त्ति भगवान्विष्णुस्तन्ममाख्यातुमर्हसि श्रीपराशर उवाच नमस्कृत्याप्रमे।
याय विष्णवे प्रभविष्णवे कथयामि यथाख्यातं वसिष्ठेन ममाभवत् आत्मानम
स्य जगतो निर्लेपमगुणामलम् बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान्हरिः श्रीवत्स
लक्षणधरमनंतेन च समाश्रितम् प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे भूतादि।
मिंद्रियादिं च द्विधाहंकारमीश्वरः बिभर्त्ति शंखरूपेण शार्ङ्गरूपेण च स्थितम् च
लस्वरूपमत्यंतं जवेनांतरितानिलं चक्रस्वरूपं च मनो धत्ते विष्णुकरे स्थितम् पंचरू
पा तु या माला वैजयंती गदाभृतः सा भूतहेतुसंघाता भूतमाला च वै द्विज यानींद्रि
याण्यशेषाणि बुद्धिकर्मात्मकानि च शररूपाण्यशेषाणि तानि धत्ते जनार्दनः बि

नोमस्तिकामस्य प्राणायामादिसाधनम् साध्यं च परमं ब्रह्म पुनर्नावर्तते यतः साध
नालंबनं ज्ञानमसौ कर्मयोगिनं हि यत् स भेदः प्रथमस्तस्य ब्रह्मभूतस्य वै मुने तत्क्रिया
करणज्ञानदर्शितानामस्य रूपस्य निर्वाणे रमनाख्येयं व्याप्तिमात्रमनौपमम् आ
त्मसंबोधविषयं सत्तामात्रमलक्षणम् प्रशान्तमभयं शुद्धं दुर्विभाव्यमसंश्रितम्
विज्ञानमयमस्याक्तं तद्विष्णोः परमं पदम् तत्र ज्ञाननिरोधेन योगिनो यान्ति ये लयं
संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विज एवंप्रकारममलं नित्यं व्यापकमक्षयम्
समस्तहेयरहितं विष्णवाख्यं परमं पदम् समस्तहेयरहितं तद्ब्रह्म परमं योगी यतो
नावर्तते पुनः श्रयत्यपुण्योपरमे क्षीणक्लेशोतिनिर्मलः द्वे रूपे ब्रह्मणस्तस्य मूर्तं।
चामूर्तमेव च क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं
जगत् एकदेशस्थितस्याग्नेः ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणः शक्तिस्तदे
तदखिलं जगत् तत्राप्यासन्नदूरत्वाद्बहुत्वस्वल्पतामयः ज्योत्स्नाभेदोस्ति तच्छक्तेः
द्वन्मैत्रेय विद्यते ब्रह्मविष्णुशिवा ब्रह्मन्प्रधाना ब्रह्मशक्तयः ततश्च देवा मैत्रेय न्यूना।
यक्षादयस्ततः ततो मनुष्याः पशवो मृगपक्षिसरीसृपाः न्यूनान्यूनतराश्चैव वृक्ष।
गुल्मलतादयः तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् आविर्भावतिरोभाव।

न्कथ्यते सर्वकालिकी ब्रह्मादक्षादयः कालस्तथैवाखिलजंतवः विभूतयो हरेरेता
जगतः सृष्टिहेतवः विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज स्थितेर्निमित्तभूतस्य
विष्णोरेता विभूतयः रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जंतवः चतुर्धा प्रलयायैता
जनार्दनविभूतयः जगदादौ तथा मध्ये सृष्टिरा प्रलयाद्द्विज धात्रा मरीचिमिश्रेण क्रि
यते जंतुभिस्तथा ब्रह्मा सृजत्यादिकाले मरीचिप्रमुखास्ततः उत्पादयंत्यपत्यानि जं
तवश्च प्रतिक्षणम् कालेन न विना ब्रह्मा सृष्टिनिष्पादको द्विज न प्रजापतयः सर्वे न
चैवाखिलजंतवः एवमेव विभागोयं स्थितावप्युपदिश्यते चतुर्धा तस्य देवस्य मैत्रेय प्र
लये तथा यत्किंचित्सृज्यते येन सत्वजातेन वै द्विज तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्त
नुः हंति यावच्च किंचित्सत्वं स्थावरजंगमम् जनार्दनस्य तद्रौद्रं मैत्रेयांतकं वपुः
जगत्स्रष्टा जगत्पाता तथा जगत् जगद्भक्षयिता देवः समस्तस्य जनार्दनः सृष्टिस्थित्यं
तकालेषु त्रेधैवं संप्रवर्तते गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् तच्च ज्ञानमयं व्यापि
स्वसंवेद्यमनौपमम् चतुष्प्रकारं तदपि स्वरूपं परमात्मनः मैत्रेय उवाच चतुष्प्रकार
तां तस्य ब्रह्मभूतस्य हे मुने ममाचक्ष्व यथान्यायं यदुक्तं परमं पदम् पराशरः मैत्रे
य कारणं प्रोक्तं साधनं सर्ववस्तुषु साध्यं च वस्त्वभिमतं यत्साधयितुमात्मनः योगि

वैभूतस्य विष्णोरंशाद्द्विजोत्तम ये च देवाधिपतयो ये च दैत्याधिपास्तथा दानवानां च ये।
नाथा ये नाथाः पिशिताशिनाम् पशूनां ये च पतयो पतयो ये च पक्षिणाम् मनुष्याणां
सर्पाणां नागानां चाधिपास्तु ये वृक्षाणां पर्वतानां च ग्रहाणां चैव ये ऽधिपाः अतीता वर्तमा
नाश्च ये भविष्यंति चापरे ते सर्वे सर्वभूतस्य विष्णोरंशसमुद्भवाः न हि पालनसामर्थ्यमृ
ते सर्वेश्वरं हरिम् स्थितौ स्थितं महाप्राज्ञ भवत्यन्यस्य कस्यचित् सृजत्येष जगत्सृष्टौ स्थि
तौ पाति सनातनः हंति चैवांतकत्वे च रजःसत्वादिसंश्रयः चतुर्विभागः संसृष्टौ
चतुर्धा संस्थितः स्थितौ प्रलयं च करोत्यंते चतुर्भेदो जनार्दनः एकेनांशेन ब्रह्मासौ भ
वत्यव्यक्तमूर्तिमान् मरीचिमिश्राः पतयः प्रजानामन्यभागतः कालस्तृतीयस्त
स्यांशः सर्वभूतानि चापरः इत्थं चतुर्धा संसृष्टौ वर्तते सौ रजोगुणः एकांशेन स्थितो
विष्णुः करोति स्थितिपालनम् मन्वादिरूपी चान्येन कालरूपोऽपरेण च सर्वभूतेषु चा
न्येन कालरूपोऽपरेण च सर्वभूतेषु चान्येन संस्थितिं कुरुते ततः सत्वं गुणं समाश्रित्य
जगतः पुरुषोत्तमः आश्रित्य तमसो वृत्तिमंतकालेन वा पुनः रुद्रस्वरूपो भगवा
नेकांशेन भवत्यजः अग्न्यंतकादिरूपेण भागेनान्येन वर्तते कालस्वरूपो भागोऽन्यः
सर्वभूतानि चापरः विनाशं कुर्वतस्तस्य चतुर्धैवं महात्मनः विभागकल्पना ब्रह्म

अः वि: पु: ९५

क्तः सपृथुः पूर्वं राज्ये महर्षिभिः ततः क्रमेण राज्यानि ददौ लोकपितामहः नक्षत्र
ग्रहविप्राणां वीरुधां चाप्यशेषतः सोमं राज्ये दधद्ब्रह्मा यज्ञानां तपसामपि राज्ञां
वैश्रवणं राज्ये जलानां वरुणं तथा आदित्यानां पतिं विष्णुं वसूनामथ पावकं
प्रजापतीनां दक्षं तु वासवं मरुतामपि दैत्यानां दानवानां च प्रह्लादमधिपं ददौ
पितृणां धर्मराजानं यमं राज्येभिषेचनम् ऐरावतं गजेन्द्राणामशेषाणां पतिं
ददौ पतत्रिणां च गरुडं देवानामपि वासवम् उच्चैःश्रवसमश्वानां वृषभं तु
गवामपि नागानां वासुकिं चैव सिंहं मृगाणां शुभम् वनस्पतीनां राजानं प्लक्षमेवा
भ्यषेचयत् एवं विभज्य राज्यानि दिशां पालाननन्तरम् प्रजापतिपतिर्ब्रह्मा स्थापया
मास सर्वतः पूर्वस्यां दिशि राजानं वैराजस्य प्रजापतेः दिशः पालं सुधन्वानं राजा
नं सोभ्यषेचयत् पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतम् केतुमन्तं महात्मानं
राजानमभिषिक्तवान् तथा हिरण्यरोमाणं पर्जन्यस्य प्रजापतेः उदीच्यां दिशि दुर्ध
र्षं राजानं सोभ्यषेचयत् तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना यथाप्रदेशमद्या
पि धर्मतः परिपाल्यते एते सर्वे प्रवृत्तस्य स्थितौ विष्णोर्महात्मनः विभूतिभूता।
राजानो ये चान्ये मुनिसत्तमाः ये भविष्यन्ति ये तीताः सर्वे भूतेश्वरा द्विजः ते सर्वे स

दितिर्विनष्टपुत्रा वै तोषयामास कश्यपम् तया चाराधितः सम्यक्कश्यपस्तपतां
वरः वरेणच्छन्दयामास सा च वव्रे ततो वरम् पुत्रमिंद्रवधार्थाय समर्थममितौ
जसम् स च तस्मै वरं प्रादाद्भार्यायै मुनिसत्तम दत्वा च वरमग्र्यं स कश्यपस्तामु
वाच ह शक्रं पुत्रो निहंता ते यदि गर्भं शरच्छतम् समाहितातिप्रयता शुचिनी धा
रयिष्यसि इत्येवमुक्त्वा तां देवीं संगतः कश्यपो मुनिः दधार सा च तं गर्भं सम्यक्
शौचसमन्विता गर्भमात्मवधार्थाय ज्ञात्वा तं मघवानपि शुश्रूषुस्तामथागच्छ
द्विनयादमराधिपः तस्याश्चैवांतरप्रेप्सुरतिष्ठत्पाकशासनः ऊने वर्षशते चास्य
ददर्शांतरमात्मवान् अकृत्वा पादयोः शौचं दितिः शयनमाविशत् निद्रां चाहार
यामास तस्याः कुक्षिं प्रविश्य सः वज्रपाणिर्महागर्भं चिच्छेदाथ स सप्तधा सम्पी
ड्यमानो वज्रेण स रुरोदातिदारुणम् मा रोदीरिति तं शक्रः पुनः पुनरभाषत सो
ऽभवत्सप्तधा गर्भस्तमिंद्रः कुपितः पुनः एकैकं सप्तधा चक्रे वज्रेणारिविदारिणा
मरुतो नाम देवास्ते बभूवुरतिवेगिनः यदुक्तं वै भगवता तेनेमे मरुतोऽभवन् देवा
एकोनपंचाशत्सहाया वज्रपाणिनः इति श्रीविष्णुपुराणे ब्रह्माण्डे पाराशरी
यायां संहितायां प्रथमेंऽशे विंशतिमोऽध्यायः श्रीपराशर उवाच यदाभिषि

श्येनी श्येनांस्तथा भासी भासान्गृध्रांश्च गृध्र्यपि शुच्योदकान्पक्षिगणान्सुग्रीवीत्वजन
यत अश्वानुष्ट्रान्गर्दभांस्ताम्रावंशः प्रकीर्तितः विनतायास्तु पुत्रौ द्वौ विख्यातौ ग
रुडारुणौ सुपर्णः पततां श्रेष्ठो दारुणः पन्नगाशनः सुरसायां सहस्रं तु सर्पाणामम
मितौजसाम् अनेकशिरसां ब्रह्मन् खेचराणां महात्मनाम् काद्रवेयास्तु बलिनः
सहस्रममितौजसः सुपर्णवशगा ब्रह्मन् जज्ञिरे नैकमस्तकाः तेषां प्रधानभूता
स्ते शेषवासुकितक्षकाः शङ्खश्वेतो महापद्मः कम्बलाश्वतरौ तथा एलापत्र
स्तथा नागः कर्कोटकधनञ्जयौ एते चान्ये च बहवो दन्दशूका विषोल्बणाः गणं
क्रोधवशं विद्धि तस्याः सर्वे च दंष्ट्रिणः स्थलजाः पक्षिणोऽब्जाश्च दारुणाः पिशि
ताशिनः गास्तु वै जनयामास सुरभिर्महिषीस्तथा अरि. क्रोधा त्वजनयामास
पिशाचांश्च महाबलान् अरिष्टा तु महासत्त्वान्गन्धर्वान्समजीजनत् एते कश्य
पदायादाः कीर्तिताः स्थाणुजङ्गमाः तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः
एष मन्वन्तरे सर्गो ब्रह्मन्स्वारोचिषे स्मृतः वैवस्वते च महति वारुणे वितते क्रतौ जु
ह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते पूर्वं यत्र तु सप्तर्षीनुत्पन्नान्सप्तमानसा
न् पुत्रत्वे कल्पयामास स्वयमेव पितामहः गन्धर्वभोगिदेवानां दानवानां च सत्तम

सुताश्चापि सर्वएव महाबलाः कर्कविः शकुनिश्चैव भूतसंतापनस्तथा महाना
भो महाबाहुः कालनाभस्तथापरः अभवेदन्वपुत्राश्च द्विमूर्धशंकरस्तथा अयोमु
खः शङ्कुशिराः कपिलः शंबरस्तथ एकचक्रो महाबाहुस्तारकश्च महाबकः स्व
र्भानुर्वृषपर्वा च पुलोमा शौ महाबलः एते दनोः सुताख्याता विप्रचित्तिश्च वीर्य।
वान् स्वर्भानोस्तु प्रभा कन्या शर्मिष्ठा वृषपर्वणी तपावबी हयशिराप्राख्याता वरक
न्यकाः वैश्वानरसुते चोभे पुलोमा कालका तथा उभे ते तु महाभागे मारीचेस्तु प
रिग्रहः ताभ्यां पुत्रसहस्राणि षष्टिर्दानवसत्तमाः पौलोमाः कालकेजाश्च मारीचजन
नयाः स्मृताः ततोपरे महावीर्या दानवास्त्वतिनिर्घृणाः सिंहिकायामथोत्पन्ना।
विप्रचित्तेः सुतास्तथा व्यंशः शल्यश्च बलवान्नभश्चैव महाबलः वातापिर्नमुचिश्चै
व इल्वलः खसृमस्तथा अञ्जको नरकश्चैव कालनाभस्तथैव च स्वर्भानुश्च महावी
र्यो वक्त्रयोधी महासुरः एते वै दानवाः श्रेष्ठा दनुवंशविवर्धनाः एतेषां पुत्रपौत्रास्तु श
ताशोऽथ सहस्रशः प्रह्लादस्य तु दैत्यस्य निवातकवचाः कुले समुत्पन्नाः सुमहता त
पसा भावितात्मनः षट्सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्तिताः क्रौञ्ची श्ये
नी च भासी च सुग्रीवी शुचिगृध्रिका शुकी शुकानजनयदुलूकी प्रत्युलूककान्।

राशरः इत्युक्तोंतर्दधे विष्णुः तस्य मैत्रेय पश्यतः स चापि पुनरागम्य ववंदे चरणौ पितुः
तं पिता मूर्ध्न्युपाघ्राय परिष्वज्य च पीडितम् जीवसीत्याह वत्सेति बाष्पार्द्रनयनो द्विज प्री
तिमांश्चाभवत्तस्मिन्ननुतापी महासुरः गुरुपित्रोश्चकारैवं शुश्रूषां सोपि धर्मवित् पि
तर्युपरतिं नीते नरसिंहस्वरूपिणा विष्णुना सोपि दैत्यानां मैत्रेयाभूत्पतिस्ततः ततो रा
ज्यद्युतिं प्राप्य कर्मशुद्धिकरीं द्विज पुत्रपौत्रांश्च सुबहूनवाप्यैश्वर्यमेव च क्षीणाधिका
रः स यदा पुण्यपापविवर्जितः तदासौ भगवद्ध्यानात्परं निर्वाणमाप्तवान् एवं प्रभा।
वो दैत्योसौ मैत्रेयासीन्महामतिः प्रह्लादो भगवद्भक्तो यं त्वं मामनुपृच्छसि यस्त्वेत
च्चरितं तस्य प्रह्लादस्य महात्मनः शृणोति तस्य पापानि सद्यो गच्छंति संक्षयम् अ।
होरात्रकृतं पापं प्रह्लादचरितं नरः शृण्वन्पठंश्च मैत्रेय व्यपोहति न संशयः पौर्णमा।
स्याममावास्यामष्टम्यामथवा पठन् द्वादश्यां वा तदाप्नोति गोप्रदानफलं द्विज प्रह्ला
दं सकलापत्सु यथा रक्षितवान्हरिः तथा रक्षति यस्तस्य शृणोति चरितं सदा इति वि
ष्णुपुराणे ब्रह्माण्डे पाराशरीयायां संहितायां प्रथमेंशे विंशतितमोध्यायः समाप्तं प्रह्ला।
दचरितम् श्रीपराशर उवाच प्रह्लादपुत्र आयुष्मान् शिबिर्बाष्कल एव च विरोचनस्तु
प्राह्लादिर्बलिर्जज्ञे विरोचनात् बलेः पुत्रशतं त्वासीद्बाणज्येष्ठं तथापि च हिरण्यक।

दं कुरु केशव अवलोकनदानेन भूयो मां पावयाव्यय भगवानुवाच कृवेन ते प्रसन्नो।
हं भक्तिमव्यभिचारिणीम् यथाभिलषितो मत्तः प्रह्लाद व्रियतां वरः प्रह्लादः ना
थ योनिसहस्रेषु येषु येषु व्रजाम्यहम् तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि या प्री
तिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु श्रीभग
वानुवाच मयि भक्तिस्तवास्त्येव भूयोप्येवं भविष्यति वरस्तु मत्तः प्रह्लाद व्रियतां य
स्तवेप्सितः प्रह्लाद उवाच मयि द्वेषानुबंधोभूत् संस्तुतावुद्यते तव मत्पितुस्तत्कृतं
पापं देव तस्य प्रणश्यतु शस्त्राणि पातितान्यंगे क्षिप्तो यच्चाग्निसंहतौ दंशितश्चोरगैः
दत्तं यद्विषं मम भोजने बद्धा समुद्रे यत्क्षिप्तो यच्चितोस्मि शिलोच्चयैः अन्यानि चा
प्यसाधूनि यानि पित्रा कृतानि मे त्वयि भक्तिमतो द्वेषादघं तत्संभवं च यत् त्वत्प्रसा
दात्प्रभो सद्यस्तेन मुच्येत मे पिता श्रीभगवानुवाच प्रह्लाद सर्वमेतत्ते मत्प्रसादा
द्भविष्यति अन्यञ्च ते वरं ददि व्रियतामसुरात्मज प्रह्लादः कृतकृत्योस्मि भगवन्व।
रेणानेन यत्त्वयि भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणी धर्मार्थकामैः किं तस्य मु
क्तिस्तस्य करे स्थिता समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि श्रीभगवान् य
थाते निश्चलं चेतो मयि भक्तिसमन्वितम् तथा त्वं मत्प्रसादेन निर्वाणं परमाप्स्यसि प

पापस्यैकमात् प्रद्योतकरणोविमलज्योतिर्ज्ञानमयोद्भुतः योगप्रभावान्मञ्जुदेवा
यतेविहितः सरोवरे बलन्प्रख्यातं पद्मंत्रियत्रुटितंदलनात् स्रोतस्रोतसा सार्मिर्य
योतोभंमहार्णवः बबालचमहीसर्वासशैलवनकानना सचतंशैलसंचातंदे
त्याश्चलमयापरि प्रविश्यतस्मात्सलिलान्निश्चक्रामसमहामतिः इत्थंप्रसज्ञा
त्रयोगगणात्पलत्वाणां मञ्जुदेवस्मीतिसस्मार पुनरोद्धानमात्मना तत्रोवचस्पुन
धीमाननादिपुरुषोत्तमम् एकाग्रमनिवत्योजानवाक्कायमानसः मञ्जुदेवश्चा
च योनमः परमार्थार्थस्थूलसूक्ष्मनवालेन अव्यक्तव्यक्तकलातीत सकलेशनि
रंजन गुणांजनगुणाधारा निर्गुणात्मगुणस्थित मूर्तामूर्तमहामूर्ते सूक्ष्ममूर्ते
स्फुटास्फुट करालसौम्यरूपात्मविद्याविद्यमयाच्युत सदसद्रूपसद्भावसदसद्भा
वभावन नित्यानित्यप्रपंचात्मनिष्प्रपंचमलाश्रित एकानेकनमस्तुभ्यंवासुदेवा।
दिकारण यः स्थूलसूक्ष्मप्रकटप्रकाशोयः सर्वभूतोनचसर्वभूतः विश्वंयतश्चैतदवि
श्वहेतोर्नमोस्तुतस्मैपुरुषोत्तमाय श्रीनारायणउवाच नमस्तेस्तुनमोदेवस्तनिमित्त
मञ्जुदेवः आविर्बभूवभगवान्पीताम्बरधरोहरिः ससंभ्रममलमालोक्यससाध्यायाकु
लात्मन नमस्तविमलेनेन्द्रहारासकद्धिज प्रहर्षः देवप्रपन्नार्तिहरप्रसा।

किंरूपनामवं गुणाश्रयपनमस्तस्मै पुराणपुरुषायैश्वायच यानीनगोचराचांमनसांच
विशेषणानि ज्ञानपरिच्छेद्यानि वेदेष्वशेषाणि परस्य ॐ नमो वासुदेवाय तस्मै भगव
ते सदा व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोखिलस्य यः नमस्तस्मै नमस्तस्मै नमस्तस्मै
महात्मने नामरूपं न यस्यैको योस्तित्वेनोपलभ्यते यस्यावताररूपाणि समर्चन्ति दि
वौकसः अपश्यन्तः परं रूपं नमस्तस्मै परात्मने योन्तस्तिष्ठन्नशेषस्य पश्यतीशः शु
भाशुभम् तं सर्वसाक्षिणं विश्वं नमस्ये परमेश्वरम् नमोस्तु विष्णवे तस्मै यस्याभि
न्नमिदं जगत् ध्येयस्स जगतामाद्यः स प्रसीदतु मेव्ययः यत्रोतमेतत्प्रोतं च विश्व
मक्षरमव्ययम् आधारभूतः सर्वस्य स प्रसीदतु मे हरिः ॐ नमो विष्णवे तस्मै नम
स्तस्मै पुनः पुनः यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः सर्वगत्वादनन्तस्य स एवा
हमवस्थितः मत्तः सर्वमिदं सर्वं मयि सर्वं सनातने अहमेवाक्षयो नित्यः परमा
त्मात्मसंश्रयः ब्रह्मसंज्ञोहमेवाग्रे भवान्ते च परः पुमान् इति श्रीविष्णुपुराणे प्र
थमेंशे एकोनविंशोध्यायः श्रीपराशरः एवं संचिन्तयन्विष्णुमभेदेनात्मनो
द्विज तन्मयत्वमवाप्याग्र्यं मेने चात्मानमच्युतम् विसस्मार तदात्मानं नान्यत्किं
चिदजानत अहमेवाव्ययोनन्तः परमात्मेत्यचिन्तयत् तस्य तद्भावनायोगात्क्षीण

नाभिसरूसंश्वशः सवितःपूर्वतैर्नेः समस्तस्य महामतिः तदा वाक्यं कैवलायामेकाग्र
मतिरच्युतम् नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम नमस्ते सर्वलोकात्मन्नमस्ते तिग्म
चक्रिणे नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च जगद्धिताय कृष्णाय गोविंदाय न
मो नमः ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते नमः रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमू
र्तये देवा यक्षाः सुराः सिद्धा नागा गंधर्वकिन्नराः पिशाचा राक्षसाश्चैव मनुष्याः प
शवस्तथा पक्षिणः स्थावराश्चैव पिपीलकसरीसृपाः भूम्यापोऽग्निर्नभो वायुः शब्दः
स्पर्शस्तथा रसः रूपं गंधो मनो बुद्धिरात्मा कालस्तथा गुणाः एतेषां परमार्थश्च सर्व
मेतत्त्वमच्युत विद्याविद्ये भवान्सत्यमसत्यं त्वं विषामृते प्रवृत्तं च निवृत्तं च कर्म वेदोदितं
भवान् समस्तकर्मभोक्ता च कर्मोपकरणानि च त्वमेव विष्णो सर्वाणि सर्वकर्मफलं च
यत् मय्यन्यत्र तथान्येषु भूतेषु भुवनेषु च तवैव व्याप्तिरैश्वर्यगुणसंसूचिकी प्रभो त्वां
योगिनश्चिन्तयन्ति त्वां यजन्ति च यज्वनः हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् रूपं म
हत्ते स्थितमत्र विश्वं ततश्च सूक्ष्मं जगदेतदीश रूपाणि सर्वाणि च भूतभेदास्तेषु
न्तरात्माख्यमतीव सूक्ष्मं तस्माच्च सूक्ष्मादिविशेषणानामगोचरे यत्परमात्मरू
पम् किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय सर्वभूतेषु सर्वात्मन्या श

न्मवद्धिरूपेतोयंविष्णुरूपस्थत् एवंज्ञातेसभगवाननादिःपरमेश्वरः प्रसीदत्वच्यु
तस्तस्मिन्प्रसन्नेक्लेशसंक्षयः पराशरः एतच्छ्रुत्वातिकोपेनसमुत्थायवरासनात्
हिरण्यकशिपुःपुत्रंपदावक्षस्यताडयत् उवाचचसकोपेनसामर्षःप्रज्वलन्निव नि
ष्पिष्यपाणिनापाणिंहन्तुकामोजगद्यथा हेविप्रचित्तेहेराहोहेबलैषमहार्णवे ना
गपाशैर्दृढैर्बद्धाक्षिप्यतांमाविलम्बथ अन्यथासकलालोकास्तथादैतेयदानवाः
अनुयास्यन्तिमूढस्यमतमस्यदुरात्मनः बहुशोवारितोस्माभिरयंपापस्तथाप्यरेः
स्तुतिंकरोतिदुष्टानांवधएवोपकारकः ततस्तेसत्वरादैत्याबद्धातंनागबन्धनैः भर्त्तु
राज्ञांपुरस्कृत्यचिक्षिपुःसलिलार्णवे ततश्चचालचलताप्रह्लादेनमहार्णवः उद्वेलोभू
त्परंक्षोभमुपेत्यचसमन्ततः भूर्लोकमखिलंदृष्ट्वाप्लाव्यमानंमहाम्भसा हिरण्यकशि
पुर्दैत्यानिदमाहमहामते दैतेयाःसकलैःशैलैरत्रैववरुणालये निश्छिद्रैःसर्वशः
सर्वैश्चीयतामेषदुर्मतिः नाग्निर्दहतिनैवायंशस्त्रैश्छिन्नोनचोरगैः क्षयंनीतोनवातेन
नविषेणनकृत्यया नमायाभिर्नचैवोच्चात्पातितोनचदिग्गजैः बालोतिदुष्टचित्तोयंना
नेनार्थोस्तिजीवता तदेषतोयमध्येतुसमाक्रान्तोमहीधरैः तिष्ठत्वब्दसहस्रान्तंप्रा
णान्हास्यतिदुर्मतिः ततोदैत्यादानवाश्चपर्वतैस्तंमहोदधौ आक्रम्यचयनंचक्रुर्योज

प्र॰
वि॰
पु॰
८४

तत्समस्तेतन्मतंमम सामदानोपप्रदानेश्चभेददण्डेनतेनच उपायाःकथितास्तेतेमित्रा
दीनांतुसाधने नानेनाहंतपश्यामि मित्रादीस्तानमात्यपः साध्याभावेमहाबाहोसा
धनैःकिंप्रयोजनम् सर्वस्तात्मकेनातजनगान्नायेजगन्मये यस्मान्मनिगोविद्मि
त्रामित्रकथाकृतः तथ्यापिभगवानविल्लमप्यविचान्यत्रवाच्यस्मिसः यन्नतत्तोपि मि
त्रेभशत्रुश्चनिपुणकः कृतः तदेभिर्वलमत्यर्थंदेहानांभोक्तिविमितैः अविषयतमोनै
येत्वःकर्तव्यतातशोभते विद्यावृद्धिर्विद्यायामनानानान्नानजायते बालोपिकिंनु
विद्यातमस्तेप्रथमस्त्वाते तत्कर्मयत्नवेधाय साविद्यायाविमुक्तये आयासायापरं
कर्मविद्यान्याशिल्पनैपुणम् तदेतदवगम्याहंमत्सारंसाधकंतवमम निशामयम
ह्यभागायदिपप्रच्छमितम् नवित्तयतिकेवाजन्तेकोपनेनाभिवांच्छति तथापि
भाव्यमेवैतदुभयप्राप्यतेनरैः सर्वएवमहाभागमहत्वेप्रतिसोपमः तथापिपुंसां
भागपातितोघमाम्भ्रातिहेतवः जडानामविवेकानामस्वराणामपिप्रभो भोगभो
ज्यानिराज्यानिसंभवन्तीतिमतामपि तस्माद्धतेनगुणेषुयुष्मद्कंमहतीश्रियम् यतिन
येसमस्तेचनिर्वाणमपिचेच्छता देवामनुष्याःपशवःद्विकीटःसरीसृपाः रूपमे
तदनंतस्यविष्णोर्भिन्नमिवस्थितम् एतद्विज्ञाननामस्येजगात्स्यावरजंगमम् दृष्टव्यमा

त्मानीयतां त्वयम् नचैतत्कालसोऽप्यवं विविवेशापवनोऽलचुर श्रीतौ तितन्वलः शोषाय
नरेहस्यातिरुः सहः तेनाविहंससमात्मानं सप्रुञ्जा दैत्यबालकः हृदयेन मृत्युमात्मा
दध्याथ धवलीभवम् हृदयस्य स्ततस्यतेवाग मानि शोषणम् पर्याजनार्दनान्दनः
क्रुद्धः सपवैयापवनः त्वयम् होलाकसर्वेमायायाम् पवनस्य त्वयेगाते जगाम सोपिभा
वतंगोऽपि व महामतिः यहत्यहत्पयाचार्योनीतिं राज्यफलप्रदाम् ग्राहयामास
तं बालं राजा शासनसाकृतम् गृहीतनीतिशास्त्रं विनीतं सपदाग्रजः मेनेन्द्रदे
नं तत्पिनेकमथ्यपामास शिक्षितम् आचार्यउवाच गृहीतनीतिशास्त्रस्ते पुत्रो दैत्य
पतेक्षतः प्रह्लादस्तन्त्रेवेत्ति भार्गवेनपरीक्षितम् हिरण्यकशिपुरुवाच मैत्रेषु
वर्तेतकथमरिषु चैवमहापतिः प्रह्लाद त्रिषुलोकेषु मध्यस्थेषु कथं चरेत् कथं मंत्रि
षु मात्येषु बाह्येष्वभ्यंतरेषु च चारेषु पौरवर्गेषु शंकितेष्वितरेषु च कृत्याकृत्यविधा
नं च दुर्गाटविकसाधनम् प्रह्लादकथ्यतां सम्यक् तथा कार्यक शोधनम् एतच्चान्य
च्च सकलमधीतं भवता यथा तथा मे कथ्यतां ज्ञातुं तवेच्छामि मनोगतम् प्रणम्य
उवाच प्रणिपत्य पितुः पादौ तदा प्रश्रयभूषणः प्रह्लादः प्राह दैत्येन्द्रं कृतांजलि
पुटास्थितः प्रह्लादः ममोपदिष्टं सकलं गुरुणा नात्र संशयः गृहीतं च मया किं

दुःखं दैन्यं तभवेत्तथा सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः एवं सर्वेषु भूतेषु भक्तिर
व्यभिचारिणी कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयो हरिः पराशरः इति श्रुत्वा तु दैत्ये
न्द्रः प्रासादशिखरे स्थितः क्रोधान्धकारितमुखः प्राह दैत्येयकिंकरान् दुरात्मा क्षिप्यता
मस्मात्प्रासादाच्छतयोजनात् गिरिपृष्ठे पतत्वस्मिन् शिलाभिन्नाङ्गसंहतिः ततस्तं चिक्षि
पुः सर्वे बालं दैतेयकिंकराः पपात सोऽप्यधः क्षिप्तो हृदयेनोद्वहन्हरिम् पतमानं ज
गद्धात्री जगद्धातरि केशवे भक्तियुक्तं दधारैनं सम्पत्य च मेदिनी ततो विलोक्य तं स्व
स्थमविशीर्णास्थिपञ्जरम् हिरण्यकशिपुः प्राह शम्बरं मायिनां वरम् हिरण्यकशिपु उ
वाच नास्माभिः शक्यते हन्तुमसौ दुर्बुद्धिबालकः मायां वेत्ति भवांस्तस्मान्माययैनं नि
षूदय शम्बर उवाच सूदयाम्येष दैत्येन्द्र पश्य मायाबलं मम सहस्रमत्र मायानां पश्य
कोटीशतं तथा पराशर उवाच ततः स समृजे मायां प्रह्लादे शम्बरोऽसुरः विनाशमि।
च्छन्दुर्बुद्धिः सर्वत्र समदर्शिनि समाहितमतिर्भूत्वा शम्बरेऽपि विमत्सरः मैत्रेय सोऽपि प्र।
ह्लादः सस्मार मधुसूदनम् ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् आजगाम समाज्ञ
प्तं ज्वालामालि सुदर्शनम् तेन मायासहस्रं तच्छम्बरस्याशुगामिना बालस्य रक्षता दे
हमेकैकं च विशोधितम् संशोषकं तथा वायुं दैत्येन्द्रस्त्विदमब्रवीत् शीघ्रमेष ममादेशाद्दुरा

येविषंयेहुताशनः यैर्दिग्गजैरहंक्षुण्णोदष्टःसर्पैश्चयैरपि तेष्वहंमित्रभावेनसमः
पापोस्मिनकचित् तथानेनाद्यसत्येनजीवंत्वसुरयाजकाः पराशरउवाच इत्युक्तेन
तेसर्वेसंस्पृष्टाश्चनिरामयाः समुत्तस्थुर्द्विजाभूयस्तमूचुःप्रश्रयानतम् पुरोहिताः
दीर्घायुरप्रतिहतबलवीर्यसमन्वितः पुत्रपौत्रधनैश्वर्यैर्युक्तपुत्रभवोत्तम इत्युक्त्वा
तेतयातास्तथावृत्तंपुरोहिताः दैत्यराजायसकलमाचचक्षुर्महामुने इतिश्रीवि
ष्णुपुराणेमहापुराणेपाराशरीयायांसंहितायांप्रथमेंशेष्टादशोध्यायः श्रीपराशरउ
वाच हिरण्यकशिपुःश्रुत्वातांकृत्यांवितथीकृतम् आहूयपुत्रंपप्रच्छप्रभावस्या
स्यकारणम् हिरण्यकशिपुरुवाच प्रह्लादसुप्रभावोसिकिमेतत्तेविचेष्टितम् ए
तन्मंत्रादिजनितमुताहोसहजंतव पराशरः एवंपृष्टस्तदापित्राप्रह्लादोसुरबा।
लकः प्रणिपत्यपितुःपादाविदंवचनमब्रवीत् नमंत्रादिकृतस्तातनचनैसर्गि
कोमम प्रभावएषसामान्योयस्ययस्याच्युतोहृदि अन्येषांयोनपापानिचिंतयत्या
त्मनोयथा तस्यपापागमस्तातहेत्वभावान्नविद्यते कर्मणामनसावाचा परि।
पीडांकरोतियः तद्बीजंजन्मफलतिप्रभूतंतस्यचाशुभम् सोहंनपापमिच्छामि
नकरोमिवदामिवा चिंतयंसर्वभूतस्थमात्मन्यपिचकेशवम् शारीरंमानसं

सु.
वि.
९२

तेनापि किं किमित्येवमनेनेनाकिमश्याने किंवाश्चाहनोक्तेन भवेतेनायवोमम वदेनस्मा
पुवास्माकं विवेकोस्माकमल्पकः पुरोहितारुषुः दत्तमानस्तमस्माभिरस्मिनावाल
यहिनः भयोनवदसीत्येवनेवत्तातोस्मिन्डिमान् यथस्मद्वचनान्मोहग्राहनत्यज
तेभवान् ततः कल्यांविनाशायनवस्वदयामतुर्मेते महादयवाच कः केनवदत्येतेजेन
तेनः कः केनहन्यतेहं निवदति वैवान्माश्यस्मयौपुतथ्याकरन् पवाप्राप्यवाच इत्यु
कालेनतेक्रुडादेत्यराजभ्योहिताः कुत्यामन्यादयामास ज्वालामालोज्वलाकुली
श्रुतिभीमास्समाशस्यपादन्यासहतादितिः शूलेनसाभुसंक्रुद्धानंजवानाथवदय
सि तनस्यहृदयंप्राप्यशूलंबालस्यदीप्तिमत् जगामकुंठितं भस्मीनचापि शूतधाम
तम् पत्रानपायीभगवांद्धपालेहरिरीश्वरः भंगोभवतिवलस्यानयशूलस्यकाक
प्या प्रपापितञ्चस्मापिशुणानितोकत्यदायकैः तानेवमाशवानाशुकृत्याताशंतमासः
व कृत्यायाहयमानस्त्वविलोक्यस्पमहायतिः ज्ञाहिज्ञहेत्यनेनीनवदश्मभानपयत स
वेश्वाधिनाहूपत्राहसोजनार्दन काहिविश्वानिमानस्तस्मशहाकेंवभावकं यथास
र्वेषुभूतेषुसर्वव्यापाजगद्गुरुः विश्वेवनतथासर्वेज्ञीवंतेतेषुरोहिताः यथासर्वगतंविष्णुं
मन्यमानोनपावकं चिंतयामिविपक्षेपिजीवन्त्वेतेनथाद्विजाः येहन्तुमागतानाश्च

हिरण्यकशिपोर्भवान् दैत्यैः किं किमनेनेनाकिमन्येन न वाश्रयः पिता समस्तलोका
नां नत्वैव भविष्यति तस्मात्परित्यजैतां त्वं विपक्षस्तुतिसंहिताम् वादं पितास
मस्तानां गुरूणां परमो गुरुः प्रह्लादः एवमेतन्महाभागाः श्लाघ्यमेतन्महाकुलम्
मरीचेः सकलेप्यस्मिंस्त्रैलोक्ये कोन्यथा वदेत् पिता च मम सर्वस्मिन् जगत्युत्कृष्टचे।
ष्टितः एतदप्यवगच्छामि सत्यमत्रापि नानृतम् गुरूणामपि सर्वेषां पिता वः परमो।
गुरुः यदुक्तं भ्रान्तिस्तत्रापि स्वल्पापि हि न विद्यते पिता गुरुर्न संदेहः पूजनीयः प्रय
त्नतः तत्रापि नापराध्यामीत्येवं मनसि मे स्थितम् यत्त्वेतत्किमनेनेति तन्नोक्तं पृच्छामि
वीदृशम् कोत्रवीति यथायुक्तं किंत्वेतन्न वचोऽर्थवत् इत्युक्त्वा सोभवन्मौनी तेषां गौर।
वयंत्रितः प्रहस्य च पुनः प्राह किमनंतेनेति साध्विति साधु भोः किमनंतेन साधु भो गुर
वो मम श्रूयतां यदनंतेन यदि खेदं न यास्यथ धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहृ
ताः चतुष्टयमिदं यस्मात्तस्मात्किमिदं वृथा मरीचिमिश्रैर्दक्षाद्यैस्तथैवान्यैरनंततः
धर्मः प्राप्तस्तथा चान्यैरर्थः कामस्तथापरैः तत्तत्त्ववेदिनो भूत्वा ज्ञानध्यानसमाधिभिः।
अवापुर्मुक्तिमपरे पुरुषा ध्वस्तबंधनाः संपदैश्वर्यमाहात्म्यज्ञानसंततिकर्मणां वि।
मुक्तेश्चैकतो लभ्यं मूलमाराधनं हरेः यतो धर्मार्थकामाख्यं मुक्तिश्च फलं द्विजाः

ग॰
वि॰
पु॰
८१

लब्धं धर्मार्थकामैरलमल्पकास्ते समाश्रिता ब्रह्मतरोरनन्तान्निःसंशयं प्राप्स्यथ वै मह
त्फलम् ॥ इति श्रीविष्णुपुराणे [illegible] पराशरीयायां संहितायां प्रथमेंशे सप्तदशो
ध्यायः ॥ श्रीपराशर उवाच ॥ तस्यैतां दानवाश्चेष्टां दृष्ट्वा दैत्यपतेर्भयात् । आचचक्षुः स चोवा
च सूदानाहूय सत्वरः ॥ हिरण्यकशिपुरुवाच ॥ हे सूदा मम पुत्रोसावन्येषामपि दुर्म
तिः कुमार्गदेशको दुष्टो हन्यतामविलम्बितम् ॥ हालाहलं विषं तस्य सर्वभक्षेषु दीयतां
अविज्ञातमसौ पापो हन्यतां मा विचार्यताम् ॥ श्रीपराशर उवाच ॥ ततस्ते वै तथा चक्रुः प्रह्लादा
य महात्मने । विषदानं यथाज्ञप्तं पित्रा तस्य महात्मनः ॥ हालाहलं विषं घोरमनन्तोच्चा
रणेन सः । अभिमन्त्र्य सहान्नेन मैत्रेय बुभुजे तदा ॥ अविकारं स तद्भुक्त्वा प्रह्लादः स्वस्थ
मानसः । अनन्तख्यातिनिर्वीर्यं जरयामास तद्विषम् ॥ ततः सूदा भयत्रस्ता जीर्णं दृष्ट्वा महा
विषम् । दैत्येश्वरमुपागम्य प्रणिपत्येदमब्रुवन् ॥ दैत्यराज विषं दत्तमस्माभिरतिभीष
णम् । जीर्णं तेन सहान्नेन प्रह्लादेन सुतेन ते ॥ हिरण्यकशिपुरुवाच ॥ त्वर्यतां त्वर्यतां
यो हे हे दैत्यपुरोहिताः । कृत्यां तस्य विनाशाय उत्पादयत माचिरम् ॥ पराशर उवाच
सकाशमागम्य ततः प्रह्लादस्य पुरोहिताः । सामपूर्वमथोचुस्ते प्रह्लादं विनयानतम्
पुरोहिता ऊचुः ॥ जातस्त्रैलोक्यविख्यात आयुष्मन् ब्रह्मणः कुले । दैत्यराजस्य तनयो ॥

यतोऽयंप्रकृतिरहः आयासःस्मरणोकोप्यस्तेनापकृतिशोभनम् यावद्यन्नभवति
स्मरणात्तदहर्निशम् सर्वेभ्युत्थितेनतस्मिन्मतिमैत्रीदिवानिशम् भवतांजायतामे।
वंसर्वेकेषांप्रहास्यश्च नापवेयणाभिहतेयश्चेतदखिलंजगत् नथाशोघेषुभूतेषु
दुःखमात्तःकरोतिकः अथभद्राणिभूतानिहीनशक्तिरहंपरम् मुदंतथापिका।
वीतद्रानिदुःखफलंयतः बद्धवैराणिभूतानिद्वेषंकुर्वंतिचेतस्यैनः योग्यान्यनोति
मोहेनव्याप्तानीतिमनीषिणां यतेभिन्नहशादैत्याविकल्पाकाचितामया कृत्वाभ्यु
पगमंनयसेदोषः स्कृलनाममम विस्तरःसर्वेस्तस्यविलोविंष्णुमिदंजगत् दृष्टव्य।
मात्मवत्तस्मादभेदनेविचक्षणाः समस्तस्यास्वभावेतस्मात्प्रयेनत्यावयम् नयाय
त्वंकविप्मश्तोयथायाप्यामनिहुतेम् यानाग्निनानाकैननेंडनानेवबाज्ञना यनै।
स्यबहुणाभ्यागानसिद्धेनेववादनः नयदैवमवदैत्येंद्रमोदामवकिंतरैः नमनरं
नेपम्पुभिदोषैनैवार्थसंभवैः ज्वरादिकोगतीसारशसीहगुल्मादिकैस्तथा देषा।
दिपक्षाविषैवीरागलोभादिभिःतथम् नचान्यैजीयतेकस्यचिन्नित्यायत्पसर्वनिर्मलाः न
मात्तोत्यमलेत्यस्यकेपावेहदयेनरः असारसंसारविवर्तनेषुमायानतोषंप्रसभंत्र
वीमि सर्वत्रदैत्याःसमतामुपेतसमन्वमाराधनमच्युतस्य तस्मिन्प्रसन्नेकिमिवास्त्य।

कृपाविण्मूत्ररक्तस्नायुमज्जास्थिसंहतौ देहे चेष्टातिमात्रक्लेशभविता नरके पतित श्लेः श्री
नेतनोपेननष्टः भक्तेनवदायः क्रियते स्वलेकर्तनं तद्विलोमस्यचेतवैः करोति हि देन्य
सतापावन्मात्रंपविग्रहम् तावन्मात्रेसप्तवास्युदुःखं चेतसि पश्यति यावतः कुरुते जं
तः संबंधामनसः प्रियान् तावंतोस्यनिखन्यंते हृदये शोकशंकवः यद्यद्गृहे तन्मन
सियत्रनस्यावतिष्ठति तन्मन्यस्मिहाडुःखंविवियमाणस्यचापितत यातनासुयमस्यो
योगोगर्भसंक्रमणेषुच गर्भेषुस्यालेशावि भवद्भिः नमीयते यदितत्कथनासंवेस
वैदुःखमयंजगत तदेवमतिदुःखानामास्पदेत्र भवार्णवे भवतांकथनेसत्यं विष्णु
रेकः परायणम् माजानीतवयंबाला देहीदेहेषु शाश्वतः जरायौवनजन्माद्याधर्मा
देहस्य नात्मनः बालोहंतावदिच्छातो यतिष्येश्रेयसेयुवा युवाहंवार्धकेयातेकरि
ष्याम्यात्मनोहितम् वृद्धोहंममकार्याणि समस्तानिनगोचरे किंकरिष्यामिमन्दात्मा
समर्थेननयत्कृतम् एवंदुराशयाक्षिप्तमानसः पुरुषः सदा श्रेयसोभिमुखंयातिन
कदाचित्पिपासितः बाल्येक्रीडनसासक्तायौवनेविषयोन्मुखाः अज्ञानयंत्यशक्त्या
वार्धकेसमुपस्थिते तस्माद्बाल्येविवेकात्मा यतेतश्रेयसेसदा बाल्ययौवनवृद्धाद्यैर्दे
हभावैरसंयतः तदेतद्वसमाख्यातं यदिजानीतमामनम् तदः सन्तोनयविनिः स्म

तनयेनैते कोपाद्दैत्यनिकायेषु तेषु तेन सफलेषु यतः तस्मात्त्वैनं बालं ते शासितारो व
र्तय यथा विपक्षनाशाय विनीतस्ते भविष्यति बालस्तं सर्वदोषाणां दैत्यराजाज्ञया ह।
यतः ततोऽस्कोपमत्यर्थं यातक्रमहं स्तिनाहैके तत्पद्यामिहहेः पदमस्माकं इवनाय
दि ततः कृत्वा वधायस्य करिष्यामो निवर्त्तनीम् प्राशुर्वः एवमत्यर्थितस्तैस्तदैत्य
राजपुरोहितैः दैत्यो निष्कासयामास पुत्रं पावकसंचयात् ततो गुरुगृहे बालः स वा।
सन्बालदानवान् अध्यापयामास मुहुरुपदेशान्तरे गुरोः श्रूयतां परमार्थो मे दैतेय
दितिजात्मजाः न चान्यथैतन्मंतव्यं नात्र लोभादिकारणम् जन्म बाल्यं ततः सर्वो
जंतुः प्राप्नोति यौवनम् अव्याहतैव भवति ततोऽनुदिवसं जरा ततश्च मृत्युमभ्येति जंतु
र्दैत्येश्वरात्मजाः प्रत्यक्षं दृश्यते चैतदस्माकं भवतां तथा मृतस्य च पुनर्जन्म भवत्येत
च्च नान्यथा आगमोऽयं तथा यच्च नोपादानं विनोद्भवः गर्भवासादि यावत्तु पुनर्जन्मो
पपादनम् समस्तावस्थकं तावद्दुःखमेवावगम्यताम् क्षुत्तृष्णोपशमं तद्वच्छीता।
द्युपशमं सुखम् मन्यते बालबुद्धित्वाद्दुःखमेव हि तत्पुनः अत्यन्तस्तिमिताङ्गानां व्या
यामेन सुखैषिणाम् भ्रान्तिज्ञानावृताक्षाणां प्रहारोऽपि सुखायते क्व शरीरमशेषा।
णां श्लेष्मादीनां महाचयः क्व कान्तिशोभासौन्दर्यरमणीयादयो गुणाः मांसासृ।

विषज्वालाविलैर्वक्त्रैः सर्पयोनयत संक्षयम् पराशुवः इत्युक्तास्तेन ते सर्पाः कुहकतक्षका
दयः अदशंत समस्तेषु गात्रेष्वतिविषोल्बणाः स त्वासक्तमतिः कृष्णे दश्यमानो महो
रगैः न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः सर्पा ऊचुः दंष्ट्रा विशीर्णा मणय
स्फुटंति फणेषु तापो हृदयेषु कंपः नास्य त्वचः स्वल्पमपीह भिन्नं प्रशाधि दैत्येश्वर
कार्यमन्यत् हिरण्यकशिपुः हे दिग्गजाः संकटदंतमिश्रा घ्नतैनमस्मद्रिपुपक्षभि।
न्नं तज्जा विनाशाय भवंति तस्य यथारणेः प्रज्वलितो हुताशः पराशरउवाच ततः स दि
ग्गजैर्बालो भूभृच्छिखरसन्निभैः पातितो धरणीपृष्ठे विषाणैरवपीडितः स्मरतस्त।
स्य गोविंदमिभदंताः सहस्रशः शीर्णा वक्षःस्थलं प्राप्य स प्राह पितरं ततः दंता गजानां कु
लिशाग्रनिष्ठुराः शीर्णा यदेते न बलं ममैतत् महाविपत्तापविनाशनोयं जनार्दनानुस्मर।
णानुभावः हिरण्यकशिपुः ज्वाल्यतामसुरा वह्निरपसर्पत दिग्गजाः वायो समेधयाग्निं
त्वं दह्यतामेष पापकृत् महाकाष्ठचयस्थं तमसुरेंद्रसुतं ततः प्रज्वाल्य दानवा वह्निं दद
हुः स्वामिचोदिताः प्रह्लादः तातैष वह्निः पवनेरितोपि न मां दहत्यत्र समंततोहम् पश्या
मि पद्मास्तरणास्तृतानि शीतानि सर्वाणि दिशां मुखानि अथ दैत्येश्वरं प्रोचुर्भार्गवस्यात्म
जा द्विजा पुरोहिता महात्मानः साम्ना संस्तूय वाग्मिनः राजन्नियम्यतां कोपो बालेत्र

विद्यमानत्वात्॥ प्रह्लादः॥ न केवलं मद्धृदयं स विष्णुराक्रम्य लोकानखिलानवस्थितः। स
मां त्वदादींश्च पितः समस्तान्समस्तचेष्टासु युनक्ति सर्वगः॥ हिरण्यकशिपुः॥ निष्क्रम्य
तामयं दुष्टः शास्यतां च गुरोर्गृहे। योजितो दुर्मतिः केन विपक्षविषयस्तुतौ॥ पराशर उवा
च॥ इत्युक्तोऽसौ तदा दैत्यैर्नीतो गुरुगृहं पुनः। जग्राह विद्यामनिशं गुरुशुश्रूषणोद्यतः॥ का
लेऽतीतेऽतिमहति प्रह्लादमसुरेश्वरः। समाहूयाब्रवीद्गाथा काचित्पुत्रक गीयताम्॥ प्रह्ला
द उवाच॥ यतः प्रधानपुरुषौ यतश्चैतच्चराचरम्। कारणं सकलस्यास्य स नो विष्णुः प्र
सीदतु॥ हिरण्यकशिपुः॥ दुरात्मा वध्यतामेष नानेनार्थोऽस्ति जीवता। स्वपक्षहानिक
र्तृत्वाद्यः कुलाङ्गारतां गतः॥ पराशरः॥ इत्याज्ञप्तास्ततस्तेन प्रगृहीतमहायुधाः। उद्यतास्त
स्य नाशाय दैत्याः शतसहस्रशः॥ प्रह्लादः॥ विष्णुः शस्त्रेषु युष्मासु मयि चासौ यदास्थि
तः। दैतेयास्तेन सत्येन माक्रामन्त्वायुधानि मे॥ पराशरः॥ ततस्तैः शतशो दैत्यैः शस्त्रौघै
राहतोऽपि सन्। नावाप वेदनामल्पामभूच्चैव पुनर्नवः॥ हिरण्यकशिपुः॥ दुर्बुद्धे विनिवर्त
स्व वैरिपक्षस्तवादतः। अभयं ते प्रयच्छामि मात्यन्तं मतिर्भव॥ प्रह्लाद उवाच॥ भयं
भयानामपहारिणि स्थिते मनस्यनन्ते मम कुत्र तिष्ठति। यस्मिन्स्मृते जन्मजरान्तकादिभ
यानि सर्वाण्यपयान्ति तात॥ हिरण्यकशिपुः॥ भो भोः सर्पा दुराचारमेनमत्यन्तदुर्मतिं।

तावत्तायत्नेमसरागुकेनशिक्षितम् प्रह्लाद उवाच श्रूयतां तात वक्ष्यामि सारभूतं तवा
ज्ञया समाहितमना भूत्वा यन्मे चेतस्यवस्थितम् अनादिमध्यान्तमजमवृद्धिक्षयमच्यु
तम् प्रणतोऽस्मि जगन्नाथं सर्वकारणकारणम् एतच्छ्रुत्वा तु दैत्येन्द्रः कोप।
संरक्तलोचनः विलोक्य तद्गुरुं प्राह स्फुरिताधरपल्लवः ब्रह्मबंधो किमेतत्ते विप
क्षस्तुतिसंहितम् असारं ग्राहितो बालो मामवज्ञाय दुर्मते गुरुरुवाच दैत्येश्वर न।
कोपस्य वशमागंतुमर्हसि ममोपदेशजनितं नायं वदति ते सुतः हिरण्यकशिपु
रुवाच अनुशास्तोसि केनेदृग्वत्स प्रह्लाद कथ्यताम् मयोपदिष्टं नेत्येष प्रब्रवीति गु।
रुस्तव प्रह्लादः शास्ता विष्णुरशेषस्य जगतो हृद्यवस्थितः तमृते परमात्मानं तात न।
कः केन शास्यते हिरण्यकशिपुः कोयं विष्णुः सुदुर्बुद्धे यं ब्रवीषि पुनः पुनः जगतामी।
श्वरस्येह पुरतः प्रसभं मम प्रह्लाद उवाच न शब्दगोचरं यस्य योगिध्येयं परं पदम् यतो वि
श्वश्च स्वयं विश्वं स विष्णुः परमेश्वर हिरण्यकशिपुः परमेश्वरसंज्ञोऽज्ञ किमन्यो मय्यव।
स्थिते तथापि मर्तुकामस्त्वं प्रब्रवीषि पुनः पुनः प्रह्लादः न केवलं तात मम प्रजानां स
ब्रह्मभूतो भवतश्च विष्णुः धाता विधाता परमेश्वरश्च प्रसीद कोपं कुरुते किमर्थम्।
हिरण्यकशिपुः प्रविष्टः कोऽस्य हृदये दुर्बुद्धेरतिपापकृत् येनेदृशान्यसाधूनि वदत्या।

तमिच्छामिविशेषतः इतिश्रीविष्णुपुराणेब्रह्माण्डभागशृंरीयायांसंहितायांप्रथमेंशे
षोडशोध्यायः श्रीपराशरः मैत्रेयश्रूयतांसम्यक्चरितंतस्यधीमतः प्रह्लादस्यस
दोदारचरितस्यमहात्मनः दितेःपुत्रोमहावीर्योहिरण्यकशिपुःपुरा त्रैलोक्यंवशमा
निन्येब्रह्मणोवरदर्पितः इंद्रत्वमकरोद्दैत्यःसचासीत्सवितास्वयम् वायुरग्निरपां
नाथःसोमश्चाभून्महासुरः धनानामधिपःसोभूत्सएवासीत्स्वयंयमः यज्ञभा
गानशेषांस्तुसस्वयंबुभुजेसुरः देवाःस्वर्गंपरित्यज्यतत्त्रासान्मुनिसत्तम विचेरुर
वनौसर्वेबिभ्राणामानुषींतनुम् जित्वात्रिभुवनंसर्वंत्रैलोक्यैश्वर्यदर्पितः उपगी
यमानोगंधर्वैर्बुभुजेविषयांप्रियान् पानासक्तंमहात्मानंहिरण्यकशिपुंतदा उ
पासांचक्रिरेसर्वेसिद्धगंधर्वपन्नगाः अवादयंजगुश्चान्येजयशब्दंतथापरे दैत्यराजस्यपु
रतःचक्रुःसिद्धामुदान्विताः तत्रोपविष्टःशरदिस्फाटिकाभ्रमयेसुरः पपौपानंमुदा
युक्तःप्रासादेसुमनोहरे तस्यपुत्रोमहाभागःप्रह्लादोनामनामतः पपाठबालपाठ्या
निगुरुगेहंगतोर्भकः एकदातुसधर्मात्माजगामगुरुणासह पानासक्तस्यपुरतःपितु
र्दैत्यपतेस्तदा पादप्रणामावनतंतमुत्थाप्यपितासुतं हिरण्यकशिपुःप्राहप्रह्लादम
मितौजसम् हिरण्यकशिपुरुवाच पठ्यतांभवतावत्ससारभूतंसुभाषितम् कालेनै

प्र:
वि:
पु:
५०

त्मानतीविनम जगाम वल्ह्याल्नोभं पञ्चाब्धिसलिलस्थिरे बद्धं बद्धे विचलति विद्धं हि
मौग्नैः समाहितः शैलैराक्रान्तदेहोऽपि न ममार च यः पुरा त्वयैवातीवमाहात्म्यं क।
थितं यस्य धीमतः तस्य प्रभावमतुलं विस्तभं कि मतो मुने श्रोतुमिच्छामि यस्यैतच्च
रितं अमिततेजसः किंनिमित्तमसौ शस्त्रैर्विक्षतो दितिजैर्मुने किमर्थं चाब्धिसलिले।
विक्षिप्तो धर्मतत्परः आक्रान्तः पर्वतैः कस्माद् दष्टश्चैव महोरगैः क्षिप्तः किमद्रिशिख
रात् किं वा पावकसंचये दिग्दन्तिनां दन्तभूमिं स च कस्मान्निरूपितः संशोषकोऽनिलश्चा
स्य प्रयुक्तः किं महासुरैः कृत्यां च दैत्यगुरवो युयुजुस्तत्र किं मुने शम्बरस्यापि माया
नां सहस्रं किं प्रयुक्तवान् हालाहलं विषमहो दैत्यसूदैर्महात्मनः कस्माद्दत्तं महा।
भाग यच्छीर्णं तेन धीमता एतत्सर्वं महाभाग प्रह्लादस्य महात्मनः चरितं श्रोतुमिच्छा
मि महामाहात्म्यसूचकम् नहि कौतूहलं तत्र यद्दैतेयैर्न हतो हि सः अनन्यमनसो।
विष्णोः कः समर्थो निपातने तस्मिन् धर्मपरे नित्यं केशवाराधनोद्यते स्ववंशप्रभवैर्दै
त्यैः कर्तुं द्वेषोऽतिदुष्करः धर्मात्मनि महाभागे विष्णुभक्ते विमत्सरे दैतेयैः प्रहृतं यस्मा
त्तन्ममाख्यातुमर्हसि प्रहरन्ति महात्मानो विपक्षा अपि नेदृशे गुणैः समन्विते साधौ
किं पुनर्यः स्वपक्षजः तदेतत्कथितां सर्वं विस्तरान्मुनिपुंगव दैत्येश्वरस्य चरितं श्रो।

इस्य धीमतः न भिन्नं विविधैः शस्त्रैर्यस्य दैत्येंद्रपातितैः शरीरमद्रिकठिनं सर्वत्राच्यु
तचेतसः विषानलोज्वलमुखा यस्य दैत्येंद्रचोदिताः नांताय सर्पपतयो बभूवुरुरु
तेजसः शैलैराक्रांतदेहोपि यः स्मरन्पुरुषोत्तमम् तत्याज नात्मनः प्राणान्विष्णुस्म
रणदंशितः पतंतमुच्चादवनिर्यमुपेत्य महामतिम् धारदैत्यपतिनाक्षिप्तं स्वर्ग
निवासिन यस्य संशोषको वायुर्देहे दैत्येंद्रयोजितः अवाप संलयं सद्यश्चित्तस्थे मधु
सूदने विषाणभंगमुन्मत्ता मदहानिं च दिग्गजाः यस्य वक्षस्थले प्राप्ता दैत्येंद्रपरि
णामिताः यस्य चोत्पादिता कृत्या दैत्यराजपुरोहितैः बभूव नांताय यतो गोविंदासक्तचे
तसः शम्बरस्य च मायानां सहस्रमतिमायिनः यस्मिन्प्रयुक्ते चक्रेण कृष्णस्य वितथी
कृतम् दैत्येंद्रसूदोपहृतं यः सहालाहलं विषम् जरयामास मतिमानविकारं विमत्स
री समचेता जगत्यस्मिन्यः सर्वेष्वेव जंतुषु यथात्मनि तथान्येषु परं मैत्रगुणान्वितः ध
र्मात्मा सत्यशौर्यादिरत्नानामाकरः परः उपमानमशेषाणां साधूनां यः सदाभव
त् इति श्रीविष्णुपुराणे ब्रह्मण्डोपवाशावीयायां संहितायां प्रथमांशे पंचदशोध्यायः
मैत्रेय उवाच कथितो भवता वंशो मानवानां महात्मनाम् कारणं चास्य जगतो विष्णु
रेव सनातनः यत्त्वेतद्भगवानाह प्रह्लादं दैत्यसत्तमम् ददाह नाग्निर्नास्त्रैश्च क्षुण्णस्

क्षुषस्यांतरे मनोः समवायीकृताः सर्वे समागम्य परस्परम् आगच्छत द्रुतं देवा अदि
तिं संप्रविश्य वै मन्वंतरे प्रसूयामस्तन्नः श्रेयो भवेदिति एवमुक्त्वा तु ते सर्वे चाक्षुषस्य।
तरे मनोः मारीचात्कश्यपाज्जातास्त आदित्या दक्षकन्यया तत्र विष्णुश्च शक्रश्च जज्ञाते पु
नरेव हि अर्यमा चैव धाता च त्वष्टा पूषा तथैव च विवस्वान्सविता चैव मित्रो वरुण एव च अं
शो भगश्चादितिजा आदित्या द्वादश स्मृताः सप्तविंशति याः प्रोक्ताः सोमपत्न्योथ सु
व्रताः सर्वा नक्षत्रयोगिन्यस्तन्नाम्न्यश्चैव ताः स्मृताः तासामपत्यान्यभवन्दीप्तान्यमितते
जसाम् अरिष्टनेमिपत्नीनामपत्यानीह षोडश बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृ
ताः प्रत्यंगिरसजाः श्रेष्ठा ऋचो ब्रह्मर्षिसत्कृताः कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः स्मृताः
एते युगसहस्रांते जायंते पुनरेव हि सर्वे देवगणास्तात त्रयस्त्रिंशत्तु छंदजाः तेषामपी
ह सततं निरोधोत्पत्तिरुच्यते यथा सूर्यस्य मैत्रेय उदयास्तमनाविह एवं देवनिकाया
स्ते संभवंति युगे युगे दित्या पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम् हिरण्यकशिपुश्चै
व हिरण्याक्षश्च दुर्जयः सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः हिरण्यकशिपोः पु
त्राश्चत्वारः प्रथितौजसः अनुह्रादश्च ह्रादश्च प्रह्रादश्चैव वीर्यवान् संह्रादश्च महा।
वीर्या दैत्यवंशविवर्धनाः तेषां मध्ये महाभागः सर्वत्र समदृग्वशी प्रह्रादः परमां भक्तिं
य उवाह जनार्दने दैत्येंद्रदीपितो वह्निः सर्वांगोपचितो द्विज न ददाह च यं वह्निर्वासुदेवे
हृदि स्थिते महार्णवांतःसलिले स्थितस्य चलतो मही चचाल सकला यस्य पाशब।

पोध्रुवश्चसोमश्चधरश्चैवानिलोनलः प्रत्यूषश्चप्रभासश्चवसवोनामभिःस्मृताः
आपस्यपुत्रोवैतंड्यःश्रमःश्रांतोध्वनिस्तथा ध्रुवस्यपुत्रोभगवान्कालोलोकप्रका
लनः सोमस्यभगवान्वर्चःवर्चस्वीयेनजायते धरस्यपुत्रोद्रविणोहुतहव्यवहस्तथा
मनोहरायाःशिशिरःप्राणोथरमणस्तथा अनिलस्यशिवाभार्यातस्याःपुत्रोमनो
जवः अविज्ञातगतिश्चैवद्वौपुत्रावनिलस्यतु तस्यशाखोविशाखश्चनैगमेयश्चपृष्ठ
जाः अपत्यंकृत्तिकानांतुकार्त्तिकेयइतिस्मृतः प्रत्यूषस्यविदुःपुत्रमृषिंनाम्नाथदे
वलं द्वौपुत्रौदेवलस्यापिक्षमावंतौमनीषिणौ बृहस्पतेस्तुभगिनीवरस्त्रीब्रह्मचारिणी ।
योगसिद्धाजगत्कृत्स्नमसक्ताविचरत्युत प्रभासस्यतुभार्यासावसूनामष्टमस्यह वि
श्वकर्मामहाभागस्तस्यांजज्ञेप्रजापतिः कर्त्ताशिल्पसहस्राणांत्रिदशानांचवर्द्धकिः
भूषणानांचसर्वेषांकर्त्ताशिल्पवतांवरः यःसर्वेषांविमानानिदेवतानांचकारह म
नुष्याश्चोपजीवंतियस्यशिल्पंमहात्मनः अजैकपादहिर्बुध्न्यस्त्वष्टारुद्रश्चवीर्यवान्
हरश्चबहुरूपश्चत्र्यंबकश्चापराजितः वृषाकपिश्चशंभुश्चकपर्दीरैवतस्तथा मृग
व्याधश्चशर्वश्चकपालीचमहामुने एकादशैतेकथितारुद्रास्त्रिभुवनेश्वराः शतंत्वे
वंसमाम्नातंरुद्राणाममितौजसाम् अदितिर्दितिर्दनुश्चैवअरिष्टासुरसातथा सुरभि
र्विनताचैवताम्राक्रोधवशाइरा कद्रुर्मुनिश्चधर्मज्ञतदपत्यानिमेशृणु पूर्वमन्वंतरेश्रे
ष्ठाद्वादशासन्सुरोत्तमा तुषितानामतेन्योन्यमूचुर्वैवस्वतेंतरे उपस्थितेतियशसश्चा

म॰
वि॰
पु॰
५५

प्रजापतिः। तदा कस्माद्भुवो नान्तं द्रष्टुं किं यूयं बालिशाः। ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व-
तो दिशम्। अद्यापि न निवर्तन्ते समुद्रेभ्य इवापगाः। हर्यश्वेषु च नष्टेषु दक्षः प्राचेतसः पुनः।
वीरिण्यामथ पुत्राणां सहस्रमसृजत्प्रभुः। विवर्धयिषवस्ते तु शबलाश्वाः प्रजाः पुनः।
पूर्वोक्तं वचनं ब्रह्मन्नारदेनैव चोदिताः। अन्योन्यमूचुस्ते सर्वे सम्यगाह महामुनिः। भ्रातृ-
णां पदवी चैव गन्तव्या नात्र संशयः। ज्ञात्वा प्रमाणं पृथ्व्याश्च प्रजाः स्रक्ष्यामहे ततः। तेऽपि
तेनैव मार्गेण प्रयाताः सर्वतोमुखम्। अद्यापि न निवर्तन्ते समुद्रेभ्य इवापगाः। ततः प्रभृति वै भ्रा-
ता भ्रातुरन्वेषणे द्विज। प्रयातो नश्यति तथा तन्न कार्यं विजानता। तांश्चापि नष्टान्विज्ञाय
पुत्रान्दक्षः प्रजापतिः। कोपं चक्रे महाभागो नारदं स शशाप च। सर्गकामस्ततो विद्वान्स
मैत्रेय प्रजापतिः। षष्टिं दक्षोऽसृजत्कन्या वीरिण्यामिति नः श्रुतम्। ददौ स दश धर्माय कश्य-
पाय त्रयोदश। सप्तविंशति सोमाय चतस्रोऽरिष्टनेमिने। द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे त-
था। द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु। अरुन्धती वसुर्जामी लम्बा भानुर्मरुत्वती।
संकल्पा च मुहूर्ता च साध्या विश्वा च वै द्विज। धर्मपत्न्यो दश त्वेतास्तासां पुत्रान्निबोध मे।
